ISSN : 2350-0700

# शोधज्योतिः
# Śodhajyotiḥ

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य
UGC CARE अनुसूच्यां समाविष्टा एवं पुनरीक्षिता सन्दर्भिता शोधपत्रिका
UGC CARE Listed & a Peer Reviewed Research Journal of Shree Somnath Sanskrit University

वर्षम् - ०५ अङ्कः-०५ जनवरी-दिसम्बर-२०२३

***Chief Editor***
Prof. (Dr.) Sukanta Kumar Senapati,

***Managing Editor***
Prof. (Dr.) Vinod Kumar Jha

***Editors***
Dr. Narendrakumar Pandya
Dr. Janakisharan Acharya
Dr. Kartik Pandya
Dr. Jigar Bhatt
Smt. Apoorva Agrawal
Dr. Vidushi Bolla
Dr. Bhagavati Dabhi

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**
(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A+ श्रेण्या प्रत्यायितः)

ISSN : 2350-0700

# शोधज्योतिः
# ŚODHAJYOTIḤ

श्रीसोमनाथसंस्कृतविद्यालयस्य
UGC CARE अनुसूच्यां समाविष्टा एवं पुनरीक्षिता सन्दर्भिता शोधपत्रिका
UGC CARE Listed & a Peer Reviewed Research Journal
of Shree Somnath Sanskrit University

**Year – 5** **Vol. – 5** **January-December-2023**

***Chief Editor***
Prof. (Dr.) Sukanta Kumar Senapati,

***Managing Editor***
Prof. (Dr.) Vinod Kumar Jha

***Editors***
Dr. Narendrakumar Pandya
Dr. Janakisharan Acharya
Dr. Kartik Pandya
Dr. Jigar Bhatt
Smt. Apoorva Agrawal
Dr. Vidushi Bolla
Dr. Bhagavati Dabhi

**Shree Somnath Sanskrit University, Veraval**
(Accredited by NAAC with A+ Grade)

*Publisher:*

**Dr. Dasharath Jadav**

Registrar, Shree Somnath Sanskrit University, Veraval

*Managing Editor*

**Prof. (Dr.) Vinod Kumar Jha**

*Editorial Committee*

**Dr. Narendrakumar Pandya**

**Dr. Janakisharan Acharya**

**Dr. Kartik Pandya**

**Dr. Jigar Bhatt**

**Smt. Apoorva Agrawal**

**Dr. Vidushi Bolla**

**Dr. Bhagavati Dabhi**

***Note :** The statements and views expressed by the authors of articles in this Journal are their own and not necessarily of the Editorial Committee. The responsibility of the facts stated, opinions expressed, or conclusions reached, is entirely that of the author of respective research article and that Shree Somnath Sanskrit University accepts no responsibility for them.*

| | | |
|---|---|---|
| *ISSN* | : | 2350-0700 |
| *Registration No.* | : | GH/SH/4/GSU/2997/1607/Pt-III/KH-1 dated 11-04-2005 |
| *Published by* | : | Shree Somnath Sanskrit University, Veraval, Gujarat – 362265 |
| *Price* | : | ₹ 482.00 (For India) |
| *Address* | : | Shree Somnath Sanskrit University,<br>Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath,<br>Gujarat, India-362265 |
| *Telephone* | : | (+91-2876) 244531, 244532 |
| *Email* | : | shodhjyoti@gmail.com |
| *Website* | : | www.sssu.ac.in |

*Advisory Committee:*

**Prof. Shrinivasa Varakhedi**
Vice-Chencellor, Central Sanskrit University, New Delhi

**Prof. Hare Ram Tripathi**
Vice-Chancellor, Kavikulaguru Kalidas Sanskrit University, Ramtek

**Prof. Bihari Lal Sharma**
Vice-Chancellor, Sampurnanand Sanskrit Vishwavidyalaya, Varanasi

**Prof. Gopabandhu Mishra**
Former Vice-Chancellor, Shree Somnath Sanskrit University, Veraval

**Prof. Krishna Kant Sharma**
Former Dean, Faculty of Darshana, Banaras Hindu University, Varanasi

**Prof. Ravindra Muley**
Former Vice-Chairman, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain

**Prof. Bodh Kumar Jha**
Professor, Central Sanskrit University, Mumbai Campus

*Peer-Review Committee:*

**Prof. Ravindra Muley**
Former Vice-Chairman, Maharshi Sandipani Rashtriya Vedavidya Pratishthan, Ujjain

**Prof. Devendra Nath Pandeya**
Retired Professor, Shree Somnath Sanskrit University, Veraval

**Prof. Suryamani Rath**
Retired Professor, Central Sanskrit University, Puri Campus

**Prof. Mansukh Moliya**
Professor & Head, Department of Sanskrit, Saurashtra University, Rajkot

**Prof. Kamlakant Tripathi**
Professor, Sampurnanand Sanskrit Vishwavidyalaya, Varanasi

**Prof. Shreedhar Mishra**
Director, Central Sanskrit University, Shri Ranbir Campus, Jammu (J&K)

**Prof. Ram Kumar Sharma**
Professor & Head, Department of Sahitya, Central Sanskrit University, Jaipur Campus

**Prof. Ram Raj Upadhyaya**
Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

**Prof. Ganesh Ishwar Bhatt**
Professor & Head, Department of Advaita Vedanta,
Central Sanskrit University, Sringeri Campus

**Prof. Vishnu Kant Pandey**
Professor, Central Sanskrit University, Jaipur Campus

**Dr. Priyavrat Mishra**
Associate Professor, Shree Jagannath Sanskrit University, Puri

**Dr. Ramakrishna Pejathaya**
Associate Professor, Centre for Indian Knowledge Systems,
Chanakya University, Bengaluru

**Statement about the ownership and other particulars about newspapers**

# ŚODHAJYOTIḤ

**UGC CARE Listed & a Peer Reviewed Research Journal**
**of Shree Somnath Sanskrit University**

**FORM IV**

(See Rule & under Section 5 of the Press and Registration of Book Act. 1867)

| | | | |
|---|---|---|---|
| 1. | *Place of the Publication* | : | Shree Somnath Sanskrit University, Veraval, Dist. Gir-Somnath, Gujarat – 362266 |
| 2. | *Periodicity of its Publication* | : | Annual (Yearly) |
| 3. | *Printer's Name* | : | Zenith Graphic |
| | *Nationality* | : | Indian |
| | *Address* | : | 1st Floor, Vraj Plaza, Jain Derasar Road, Veraval, Dist. Gir-Somnath, Gujarat – 362266 |
| 4. | *Publisher's Name* | : | The Registrar |
| | *Nationality* | : | Indian |
| | *Address* | : | Shree Somnath Sanskrit University, Rajendra Bhuvan road, VERAVAL, Dist. Gir-Somnath, Gujarat – 362265 |
| 5. | *Editor's Name* | : | Prof. (Dr.) Sukanta Kumar Senapati |
| | *Nationality* | : | Indian |
| | *Address* | : | Shree Somnath Sanskrit University, Rajendra Bhuvan road, VERAVAL, Dist. Gir-Somnath, Gujarat – 362265 |
| 6. | *Names & Address of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital* | : | Shree Somnath Sanskrit University, Rajendra Bhuvan road, VERAVAL, Dist. Gir-Somnath, Gujarat – 362265 |

I, Dr. Dasharath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

**(Dr. Dasharath Jadav)**
Signature of Publisher

## शुभासंशनम्

"ज्ञानमिच्छेत् महेश्वरात्" इति अमृतवचनमनुसृत्य श्रीप्रभासक्षेत्राधिपतेः परमेश्वरस्य सोमनाथस्य अपारकरुणया तस्यैव देवाधिदेवस्य आशिराशिभिः भारतीयज्ञानपरम्परां भारतीयसंस्कृतिं च संवर्धयन् श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वाध्याय-प्रशिक्षण-अनुसन्धानक्षेत्रेषु सततमग्रेसरो वर्तते। एतस्मिन् क्रमे प्रकाशनायामे "शोधज्योतिः" नाम शोधपत्रिका विद्वल्लेखसमलङ्कृता प्रकाशतां याति इति ज्ञात्वा नितरां विश्वविद्यालयपरिवारः आनन्दतुन्दिलो भवति। सेयं शोधज्योतिः ज्ञानस्वरूपस्य सोमनाथदेवस्य चरणनलिनयोः सश्रद्धं समर्प्यते।

अस्मिन् अङ्के वेद-व्याकरण-साहित्य-ज्योतिष-दर्शन-पुराणादिशास्त्राणाम् उत्तमाः लेखाः ये विद्वद्भिः चिताः, प्रकाशिताः सन्त्वेव, आधुनिकविषयाणाम् इतिहासविषयकानां लेखानाम्, गर्भाधानादिसंस्कारप्रतिपादकानां लेखानामपि एतत् शोधज्योतिः विलासभूमिर्वर्तते। न हि सर्वः सर्वं जानाति इति विदितचरमेव विदुषाम्, किन्तु नूनं शोधज्योतिषः अङ्कैः जिज्ञासूनां विविधविषयावगाहनं भवितेति विश्वसिमि।

स्वाधीनतासङ्ग्रामे विदितानाम् अविदितानां बहुधा बहुत्र उल्लेखः क्रियते किन्तु संस्कृतजनानां का भूमिका स्वाधीनतासङ्ग्रामे? इति समुपपादयन् लेखः अत्र सर्वाग्रे विराजते। कुन्तकस्य वक्रोक्तिः सहृदयानां चेतांसि आविष्करोतीति प्रतिपादयन् शोधलेखोऽत्र शोभते। मुद्राराक्षसस्य व्यवसायिकदृष्ट्या वैविध्यम्, चातुर्वर्ण्यविषये पुरातनमपि नवं वदन् लेखः, चिकित्साविमर्शाः, वेदान्तानुसारं मोक्षमार्गः, शाब्दबोधप्रक्रिया, धातुसंज्ञाविचारः, वैदिककृषिचिन्तनम् इति एभिः अनेकैः रत्नैः समुल्लसितोऽयम् अङ्को मन्ये भारतीयज्ञानपरम्परासंवर्धने सहायको भवति। आङ्ग्लभाषया लिखिताः शोधलेखा अस्मिन् सुवर्णे सुगन्धवत् सुशोभन्ते।

अस्य अद्भुतस्य ग्रन्थरत्नस्य प्रकाशनाय यैः कैरपि प्रयत्नो विहितः, येन केनापि मार्गदर्शनं व्यधायि, लेखानां चयने समयदानम् अकारि, व्यवस्थादृष्ट्या सर्वविधः सहयोगः कृतः, संशोधनलेखेषु टङ्कण-भाषादिदोषाः परिष्कृताः निराकृताश्च, तेभ्यः सर्वेभ्यः साभिनन्दनं साधुवादैः सभाजयामि। अन्ते भगवतः सोमनाथस्य चरणयोः एतत् सद्ग्रन्थरत्नं समर्पयन् विरमामि।

**भवदीयः**

प्रो. (डॉ.) सुकान्तकुमारः सेनापतिः

**कुलपतिः**

## सम्पादकीयम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा शोधज्योतिः इति नाम्ना शोधपत्रिका प्रतिवर्षं प्रकाश्यते। विश्वविद्यालयस्य कार्यक्षेत्रे संशोधनं प्रकाशनं चापि एकं महत्त्वपूर्णं क्षेत्रमस्ति। शोधपत्रिकाद्वारा संशोधकानां शोधरसिकानां विदुषां समीक्षां कृत्वा चिताः लेखाः प्रकाशिताः भवन्ति। अस्यां पत्रिकायां तिसृषु संस्कृत-आङ्ग्ल-हिन्दीभाषासु लेखाः प्रकाश्यन्ते। साहित्यम्, व्याकरणम्, वेदाः, पुराणानि, दर्शनशास्त्रम्, योगशास्त्रम्, आङ्ग्लभाषासाहित्यम्, ग्रन्थालयविज्ञानम्, संशोधनपद्धतिः, ज्योतिषम् इत्यादिविभिन्नविषयेषु संशोधनलेखाः प्राप्यन्ते। प्राप्तानां लेखानां समीक्षकैः विद्वद्भिः समीक्षा क्रियते, तदनन्तरं चिताः एव लेखाः प्रकाश्यन्ते। अधीति-बोधाचरण-प्रचारणाख्याः चतस्रः दशाः विद्यानां विषये भवन्ति। संशोधनपत्रिकामाध्यमेन विविधविद्याक्षेत्रेषु विविधेषु च विषयाङ्गेषु वैविध्यपूर्णानि संशोधनानि भवन्ति, तेषामेकत्र कुम्भे समुद्र इव शोधामृतस्य उपलब्धिः भवति। शुश्रूषा-श्रवण-ग्रहण-धारणोहापोहार्थविज्ञानानि इति अष्टौ बुद्धेः गुणाः सूक्ताः सन्ति। शोधपत्रेषु ऊहापोहार्थविज्ञानानां सन्दर्शनं सञ्जायते। प्रज्ञाविवेकं लभते भिन्नैरागमदर्शनैः इति वचनानुसारं विविधविषयकलेखानामध्ययनेन परिशीलनेनापि प्रज्ञायाः परिपोषणं जायते। शोधप्रज्ञायाः समाश्रयणेन शास्त्राणि प्राचीनानि अपि नवीनानि प्रतीयन्ते। "एकं सद्विप्रा बहुधा वदन्ति" इति वचनानुसारं एकस्य एव सत्तत्त्वस्य बहुप्रकारैः विवेचनं सम्पद्यते। "नास्ति कश्चिदविषयो धीमताम्" इति वचनानुसारं विद्वांसः एकस्मिन् गृहीतपदवीका अपि नानाशास्त्रेषु स्वीयाभ्यासपरिशीलनेन वैदुष्यं समधिगम्य स्वीयज्ञानामृतं सर्वेभ्यः परिवेषयन्ति। विचक्षणानां विदुषां वाग्वैभवेन शोधपत्रिका इयं राराज्यते। अस्याः शोधपत्रिकायाः प्रकाशने सम्पादने च विश्वविद्यालयस्य अधिकारिणः कर्मचारिणश्च सहयोगं कृतवन्तः सन्ति। मान्याः कुलपतयः प्रो. सुकान्तकुमारसेनापतयः मार्गदर्शनं प्रेरणां च प्रदत्तवन्तः, मान्याः कुलसचिवाः प्रबन्धविषये सहयोगं कृतवन्तः, सम्पादकसमितिः सम्पादनकर्मणि भूरिप्रयासं कृतवती। विविधा विद्वांसः प्राध्यापकाः उत्तमान् शोधलेखान् समर्प्य सहयोगं कृतवन्तः। सर्वेषां सहकारेण सहयोगेन पत्रिका एषा प्रकाश्यमाना भवतीति महतः प्रहर्षस्य विषयः। "शोधज्योतिः"पत्रिकायाः पञ्चमोऽङ्कः २०२३ वर्षस्य असौ प्रकाशमुपगच्छति तदर्थं भृशं परितोषमनुभवामः सर्वेभ्यश्च अभिनन्दनानि वितरामः।

**सम्पादकः**

डॉ. नरेन्द्रकुमारः पण्ड्या

## विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| १ | संस्कृतज्ञैर्निर्मिता स्वाधीनतासङ्ग्रामभूमिका | रमाकान्तपाण्डेयः | ०१ |
| २ | भारतीयसाहित्यशास्त्रपरिप्रेक्ष्ये कुन्तकस्य वक्रोक्तिविचारः | प्रो. (डॉ.) ललितकुमारः पटेलः | १२ |
| ३ | मुद्राराक्षसे निरूपितव्यवसायवैविध्यम् | डॉ. डायालालः मालदेभाई मोकरिया | २२ |
| ४ | चातुर्वर्ण्यं मया सृष्टम् | डॉ. पङ्कजकुमार एस्. रावल | ३४ |
| ५ | जीवनाचारविचिकित्सानामार्षोपायाः | डॉ. उमामहेश्वरी बी. | ४० |
| ६ | अद्वैतवेदान्ते मोक्षस्वरूपविमर्शः | डॉ. जानकीशरण आचार्यः | ४६ |
| ७ | ग्रहजन्यरोगाः तच्छमनोपायाश्च | डॉ. नित्यानन्द ओझा | ५५ |
| ८ | शाब्दबोधे प्राधान्यविमर्शः | डॉ. विदुषी बोल्ला | ६५ |
| ९ | गर्भसंस्कारे गर्भसंवादस्य महत्त्वम् | डॉ. भैरवी दीक्षितः | ७२ |
| १० | श्रीमद्भगवद्गीता प्रस्थानत्रय्याम् एका दार्शनिकी धारा | डॉ. विपुल जादवः | ८० |
| ११ | धातुसंज्ञाविचारः | डॉ. के. श्यामसुन्दर | ८६ |
| १२ | कालिदासीयकाव्येषु शब्दसम्पत् | डॉ. सौम्यजित् सेनः | ९७ |
| १३ | पाणिनीयव्याकरणे नवाचारसर्जनस्य अवधारणा | पण्ड्या योगेशः एन् | १०१ |
| १४ | पाणिनीयतन्त्राभिमत: कर्मत्वविमर्श: | लोकेशकुमार:<br>प्रो. (डॉ.) विनोद कुमार झा | १०५ |
| १५ | वैदिकज्ञानपरम्परायां कृषे: स्वरूपं भेदाश्च | पद्मराज रेग्मी | ११५ |
| १६ | नामकरण संस्कार का प्रायोगिक लाभ | राजकुमार झा<br>प्रो. बृजमोहन सिंह | १२५ |
| १७ | वैदिकवाङ्मय में नारी के विविधरूप | डॉ. राहुल कुमार झा | १३१ |
| १८ | Solutions of Some Problems in Sanskrit Grammar | Prof. (Dr.) Vinod Kumar Jha | १३५ |
| १९ | Sardar Patel and Veer Nariman | Dr. Vasant Patel | १४२ |
| २० | Delineation of *Rasa* in the *Śrīkṛṣṇakarṇāmṛtam* of Bilvamaṅgala | Dr. Kartik Pandya | १६३ |
| २१ | Madhuvidyā - whether it is a Parā Vidyā or Aparā Vidyā - An Advaitic Analysis | Dr. Sebika Nag | १७० |
| २२ | Search Engines: An Introduction | Ravindra S. Kale<br>Dr. Rajeshkumar Gamit | १८२ |
| २३ | Maya Angelou's Message of Survival in the poem “And Still I Rise” | Dr. Bhagavati P. Dabhi | १९५ |
| २४ | River *Sarayū:* The Lifeline of *Ayodhyā* | Dr. Satheesh Kumar Kandoth | २०४ |
| २५ | Understanding the Agreements and Disagreements between Nyāya, Vyākaraṇa, and Mīmāṃsā school of Indian Philosophy on the concept of Ākhyāta in the light of Verbal Cognition. | Dr. Shweta A. Jejurkar<br>Swaraja G. Salaskar | २१३ |

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# संस्कृतज्ञैर्निर्मिता स्वाधीनतासङ्ग्रामभूमिका

**- रमाकान्तपाण्डेयः[१]**

**संस्कृतज्ञेषु संस्कृतज्ञेषु जन्मभूमिभक्तेः मूलम्-**

**'माता भूमिः पुत्रोऽहं पृथिव्याः'** इति निर्दिशन्तोऽस्माकं साक्षात्कृतधर्माणः ऋषयः जन्मभुवं मातृरूपेण अपूजयन्। तेषां दृष्टौ जन्मभूमेः श्रेष्ठतरं न किमपि भवितुमर्हति। ऋषयः एते जन्मभुवमेव स्वर्गं मन्वते, जन्मभूरेव अन्तरिक्षम्, इयमेव माता, पिताऽपि इयमेव। देवत्वमस्यामेव जन्मभूमिम् अधितिष्ठति। जीवनस्य सर्वस्वं जन्मभूमिं निर्दिशन्तस्ते अस्याः गुणान् गायन्ति। अस्यै कार्त्तज्ञ्यभावं च प्रकटीकुर्वन्ति। तथा चोक्तम् अथर्ववेदे –

**अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।**
**विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्।।**

**महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हवामहे।**
**तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमिदितिं सुप्रणीतिम्।।**

**सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमिदितिं सुप्रणीतिम्।**
**देवीं नावं स्वरित्रानागसो अस्रवन्तीमारुहेमा स्वस्तये।।**

**वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे।**
**यस्या उपस्थ उर्वन्तरिक्षं सा नः शर्म त्रिवरुथं नि यच्छात्।।**[२]

जन्मभूरियं सुखप्रदा कल्याणप्रदा शक्तिप्रदा विशाला योगक्षेमकरी अन्नदायिनी च वर्तते। अत इयं पूज्येष्वग्रगण्या प्रथमपूज्या वेति वैदिकर्षिः सुस्पष्टमुपदिशति। वेदानामिमानि वचनानि प्रमाणयन्ति यद् भारतीयानां मनसि अनादिकालान् मातृभूभक्तिधारा प्रवहति। सेयं परम्परा रामायणे महाभारते पुराणेषु महाकाव्येषु नाटकेषु तथा च अन्येषु चम्पूप्रभृतिकाव्येषु समनुवर्तते।

---

[१] निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयः भोपालपरिसरः, बागसेवनिया, संस्कृतमार्गः, भोपालम् (म.प्र.), पिन- ४६२०४३
[२] अथर्ववेदः, ६/७/१-४

संस्कृतसाहित्ये राष्ट्रभक्तिः पदे पदे शोभते। रामायणं रामस्य चरितं पुरस्कृत्य मातृभूमिप्रेमाणं शिक्षयति। महाभारतं च राष्ट्रभक्तिभरितानि आख्यानानि समुपस्थापयति पाठकानां सम्मुखे। क्वचित् लक्ष्मणं सम्बोधयन् भगवान् श्रीरामो ब्रूते-

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।**[३]

स्वर्णमयी सत्यपि लङ्का रामाय स्पृहणीया न भाति। जन्मदात्री जननी जन्मभूमिश्च स्वर्गादपि श्रेष्ठा भवति। स्वर्गोऽपि ताभ्यां साम्यं न भजत इति भगवतः श्रीरामस्य अभिप्रायः। आदिकविर्वाल्मीकिः राष्ट्रस्य समृद्धये राज्ञा किमाचरणीयम् इति सूचयति। राजधान्याः संरक्षणोपायमपि स बहुत्र निर्दिशति।

श्रीमद्भागवते ऋषभदेवस्य चरितवर्णनप्रसङ्गे भगवान् व्यासः भरतस्य वर्णनं कुर्वन् सूचयति यदयं देशः तस्यैव नाम्ना भारतमभवत्।3[४] भारतदेशस्य महत्त्वं प्रतिपादयन् भगवान् व्यासः उपदिशति यत् स्वर्गे कल्पायुः प्राप्यापि जीवनं तथा सुखप्रदं न भवति यथा भारते अल्पायुषा जनेन सुखं भुज्यते। भारतवर्षे धर्मप्रधान-भक्तिभावसंवलितजीवनचर्यया ब्रह्मलोकमपि तिरस्करोति। श्रीमद्भागवते व्यासस्य राष्ट्रप्रेमविषयका भावा अधोलिखितपद्येषु द्रष्टुं शक्यन्ते–

**अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।**
**यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः।**

**किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना।**
**न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात्।।**

**कल्पायुषां स्थानजयात्पुनर्भवात् क्षणायुषां भारतभूजयो वरम्।**
**क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः।।**

**न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः।**
**न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम्।।**

---

३ रामायणे

४ श्रीमद्भागवतम्, ५.४.९, ५.७.

**प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसम्भृताम्।**
**न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम्।।**

**यद्यत्र नः स्वर्गशुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।**
**तेनाजनाभेः स्मृतिमज्जन्म नः स्याद् वर्षे हरिर्यद्भजतां शं तनोति।।**[५]

भासः कालिदासः विशाखदत्तः भवभूतिः मुरारिः भोजः क्षेमेन्द्रः श्रीहर्षः तथा चान्ये संस्कृतमहाकवयो राष्ट्रस्य वर्णने तद्रक्षणवर्णने च श्रद्धां बिभ्रति। एतेन वक्तुं शक्यते यत् संस्कृतज्ञानां मनः मातृभूभक्त्या मातृभक्त्या पितृभक्त्या गुरुप्रभृतिभक्त्या च परिपूर्णं भवति सर्वदा एतादृशसूक्तीनामध्ययनात्। अतो न ते जन्मभूमिरक्षणात् मातृपितृगुरुप्रभृतिरक्षणात् तत्सेवाया वा पश्चात्पदं निदधति। यः कोऽपि संस्कृतज्ञः प्रातःकाले शय्यां त्यजन् पादस्पर्शात् पूर्वं मातृभुवं प्रार्थयते –

**समुद्रवसने देवि पर्वतस्तनमण्डले।**
**विष्णुपत्नि! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे।**[६]

एतादृशसंस्कारसंवलितमानसानां संस्कृतज्ञानां मनसि मातृभक्तिः प्रकृत्या राजते। तत्र न भवति कस्यचिदुपदेशस्य आवश्यकता।

**आङ्ग्लानां भारते प्रवेशः –**

भारतदेशे वाणिज्यमिषेणगौराङ्गा आङ्ग्लाः समागच्छन्। इतिहासे तेषां भारतप्रवेशः प्रमाणतया निरूपितो वर्तते। संस्कृतभाषानिबद्धानि बहूनि महाकाव्यानि खण्डकाव्यानि नाटकादीनि च आङ्ग्लानां भारते प्रवेशस्य तेषां दुर्व्यवहारस्य च चर्चां विशदतया कुर्वन्ति। ए.आर.राजराजवर्मा 'आङ्ग्लसाम्राज्यम्' इत्याख्ये स्वकीये त्रयोविंशतिसर्गात्मके महाकाव्ये गौराङ्गाणां भारतवर्षे प्रवेशं विस्तरेण अवर्णयत्। भिक्षुपादप्रसारणन्यायेन कथं तेषां प्रतापोऽवर्धत इति स्पष्टीकरोति कविरयम् -

**आङ्ग्लानां प्रतापश्च मन्दमन्दमदीप्यत।**
**बालातप इव प्रातस्तुषारविहितेऽम्बरे।।**

[५] श्रीमद्भागवतम्, ५.१९/२१.२८

[६] नित्यकर्मपद्धतावदुद्धृतम्

**विद्येव दुर्विनीतानां सिद्धिश्रीरिव रागिणाम्।।**
**वणिजां प्रभुशक्तिः सा कापथानभजत् क्षणात्।**

**आस्थाय कोणानिह भिक्षुपाद-**
**प्रसारणन्यायमथाचरन्तः।**

**शनैः शनैरर्जितभूविभागाः**
**समारुरुक्षन् परमं पदं ते।।**[७]

एवं प्रकारेण भारते राज्यविस्तारं कृत्वा आङ्ग्लाः राष्ट्रेऽस्मिन् शासनाध्यक्षपदमध्यगच्छन्। सर्वेऽपि भारतीयाः उद्योगाः तेषां हस्ते अभूवन्। दरिद्रकृषका अन्नोत्पादनकरदानपीडया रुरुदुः। बुभुक्षिता भारतीया जनता कणप्राप्तये इतस्ततः अधावत्। तदानीं सर्वत्र हाहाकारः प्रसृत आसीत्। मथुराप्रसाददीक्षितः आङ्ग्लानाम् अत्याचारस्य वर्णनं 'भारतविजयम्' इत्याख्ये नाटके करुणकरुणया भाषया अकरोत्। इयं घटना इतिहासे प्रतिपादिता प्रसिद्धा च वर्तत इति विस्तरेण नेह प्रतयन्ते।

**आङ्ग्लैः संस्कृतभाषाया मृतभाषात्वघोषणा –**

शासनस्थापनानन्तरं गौराङ्गानाम् आङ्ग्लशासकानां मनसि भारतभुवं सांस्कृतिकदृष्ट्या भाषादृष्ट्या च स्वायत्तीकर्तुं प्रावर्तत। ते जानन्ति स्म यत् संस्कृतभाषा एव भारतदेशस्य प्राणभूता भाषा वर्तते। समग्रापि भारतीया संस्कृतिः भारतीयवाग्व्यवहारः वेदाः पुराणानि शास्त्राणि दर्शनानि लोकमूलं तपोमूलं च यत्किमपि भारते दृश्यते तत्सर्वं संस्कृतभाषायामेव निहितं वर्तते। संस्कृतस्य विनाशात् संस्कृतिनाशः, संस्कृतिनाशाच्च भारतीयेषु तेषां परमाधिकारो भविष्यतीति नाऽत्र सन्देहलेशः। ब्रिटिशशासकैः १७७३ तमे वर्षे वारेनहेस्टिंग्सनामा कश्चन आङ्ग्लशासकः भारते गवर्नररूपेण प्रेषितः। स भारतीयसंस्कृतौ संस्कृतसाहित्ये च महतीं प्रीतिं प्रादर्शयत। स च पण्डितानां सहाय्येन विवादार्णवसेतुसदृशः एकविंशतिखण्डात्मकः महान् धर्मशास्त्रीयो ग्रन्थः व्यलेखयत्। तस्य द्वादशवर्षात्मके शासनकाले संस्कृतभाषायां पुराणार्थप्रकाशः नव्यधर्मदीपिका विवादभङ्गार्णवः तथा च तादृशा अन्ये ग्रन्थाः तत्तच्छास्त्रपण्डितैः प्रणीता अभूवन्। पाश्चात्त्यदेशीयैः पण्डितैः विविधसंस्कृतग्रन्थानाम् आङ्ग्लभाषानुवादः कृतोऽभवत्। तेषु चार्ल्स विल्किंसकृतः श्रीमद्भगवद्गीतायाः आङ्ग्लानुवादः सरविलियमजोंसकृतः अभिज्ञानशाकुन्तलानुवादश्च विशेषेण प्रसिद्धिमगच्छताम्। एतादृशप्रयासे भारतीयाः संस्कृतपण्डिताः धुरिकीर्तनीयाः सन्ति। तैः आङ्ग्लभाषायाः सम्यक् ज्ञानं प्राप्य विविधपाश्चात्त्यग्रन्थानाम् आङ्ग्लभाषानुवादाः कृता अभूवन्।

---

[७] संस्कृत साहित्य का समग्र इतिहास, चतुर्थभाग, पृ. – १७३४

किन्तु एतत्सर्वम् आङ्ग्लशासकानां दुर्मनायितमेव आसीत्। सरलहृदयभारतीयानां मनसि स्वात्मविश्वासमुत्पाद्य ते संस्कृतभाषायाः भारतीयसंस्कृतेश्च विनाशमेव व्यचारयन्। भारते सर्वविधोऽधिकार एव तेषां मुख्यं लक्ष्यं बभूव। अत आङ्ग्लदेशीया यावन्तोऽपि संस्कृतज्ञाः विद्वांसः आसन्, ते सर्वेऽपि संस्कृतसाहित्यस्य ह्रासमेव स्वीयग्रन्थेषु प्रत्यपादयन्। तेषां मतानुसारेण भारतीयानाम् अतीतकाल एव स्वर्णमय आसीत्। वर्तमानकालः ज्ञानादिदृष्ट्या न तथा। आङ्ग्लदेशीयसंस्कृतविदुषां मते भारतवासिनो बर्बरजातीया गड्डलिकाचारणनिपुणा आहितुण्डिकाश्च सन्ति। तेषां दृष्टौ भारतीयविद्या प्राचीनकाले एव विकासं वैभवं च प्राप्नोत्। सा न साम्प्रतिकी व्यवहारयोग्या वा। भारतीयविद्यासु आङ्ग्लानाम् एतत् न्यूनत्वप्रतिपादनं भारतीयानां मनसि स्वविद्याप्रस्थानेषु संस्कृतौ च जुगुप्सोत्पादनाय आसीत्। ते आङ्ग्लसाहित्ये आङ्ग्लसंस्कृतौ एव औदार्यं विकाससम्भावनां सभ्यतां च न्यरूपयन्। वस्तुतो यो हि देशः पराधीनो भवति, तस्य भाषां विनाशयन्ति, भाषाविनाशात् साहित्यविनाशः साहित्यविनाशात् संस्कृतेर्नाशः संस्कृतिनाशाच्च तद्देशीयानां स्वात्मविस्मृतिः जायेत। तस्मिन् देशे जनानां मनसि परतन्त्रतां प्रति श्रद्धा समुत्पद्यते। तत्र पराधीनचित्तवृत्तिः सन्ततिः जनिं लभते। अनेन उद्देश्येन अष्टादशशतकस्य प्रारम्भे आङ्ग्लशासकैः संस्कृतं मृतभाषात्वेन समुद्घोषितम्। 'संस्कृतभाषा सम्प्रति व्यवहारयोग्या भाषा नास्ति। इयं कर्मकाण्डमूला जातिविशेषस्य धर्मविशेषस्य भाषा' इत्येव ते प्रत्यपीपदन्।

**मैकालेनिर्मिता नवशिक्षानीतिः –**

ब्रिटिशसर्वकारस्य अयमेव सङ्कल्प आसीत् यद्भारते आङ्ग्लशिक्षायाः प्रचारः प्रसारश्च भवेत्। संस्कृतस्य विनाशाय मैकालेनाम्ना केनचित् आङ्ग्लदेशीयेन नवशिक्षानीतिः समानीता। तत्र संस्कृतस्य किमपि स्थानं नाऽभूत्। यूरोपदेशे शिक्षितेन राजाराममोहनरायेन आङ्ग्लानां नीतिः समर्थिता संस्कृतशालानां गुरुकुलानां च विरोधः कृतः। देशे नवपरम्पराणां नवचेतनायाश्च विकासाय आङ्ग्लशिक्षायाः विकासः सर्वथा अनिवार्य इति तेषां मतम् अभवत्। आङ्ग्लभाषामाध्यमेनैव भारतीयानां विकासः भवितुमर्हति इति मन्यमानास्ते शिक्षार्थं ब्रिटिशसर्वकारेण निर्धारितधनराशेः समग्रोऽपि व्ययः आङ्ग्लभाषायाः प्रचारे भवतु इति निरधारयन्। संस्कृतभाषा तदानीं राजकार्येषु व्यवहारभाषात्वेन व्यवह्रियते स्म तस्याः सर्वथा विरोधः कृतः। तेन भारते प्रचलन्ती गुरुकुलशिक्षा स्वयमेव विनाशं गता।

**संस्कृतभाषायाः संरक्षणाय संस्कृतज्ञैः कृता उपायाः –**

आङ्ग्लैः प्रवर्तितायाः नवशिक्षानीतेः समग्रेऽपि राष्ट्रे महान् विरोधः समजनि। पण्डिताः अहमहमिकया संस्कृतसंरक्षणाय बद्धपरिकरा बभूवुः। प्रिंसेपसदृशाः केचन् आङ्ग्लदेशीयाः

संस्कृतानुरागिणोऽपि पण्डितानां सहाय्यमकुर्वन्। 'नवशिक्षानीतिः न केवलं संस्कृतभाषायाः विनाशकारिणी अपितु समग्रभारतीयभाषाणां विनाशयित्री' इति वदन्तस्ते संस्कृतज्ञान् समर्थयामासुः। संस्कृतसंरक्षणतत्पराः केचन सदस्याः तस्याः समितेः सदस्यत्वमत्यजन्। सर्वत्र विशालसभाः समायोज्यन्त। कलकत्तानगरे दशसहस्रभारतीयाः विरोधपत्रे हस्ताक्षरं विधाय आङ्ग्लशासकानां सविधे प्रेषितवन्तः। प्रेमचन्द्रतर्कालङ्कारेण संस्कृतसंरक्षणान्दोलनस्य नेतृत्वं व्यधायि।

एच.एच. विल्सनमहाशयः काश्यां कलकत्तानगरे च शिक्षां प्राप्य तदानीं ऑक्सफोर्डविश्वविद्यालये संस्कृतविभागाध्यक्षपदमलङ्करोति स्म। गुरूणां शिष्येषु मित्राणां मित्रेषु पित्रोश्च सन्ततौ च स्वाभाविकी प्रीतिः भवतीति भारते लब्धविद्यः प्रथितयशाः विलसनमहोदयः अवश्यमेव अस्माकं मैकालेप्रवर्तितनवशिक्षानीतेः संरक्षणं विधास्यतीति विचार्य ०७/०८/१८३५ तमे दिनाङ्के प्रेमचन्द्रतर्कालङ्कारः विलसनमहोदयाय छन्दोबद्धं पत्रमेकं प्राहिणोत्–

**गोलश्रीदीर्घिकाया बहुविटपितले कालिकत्तानगर्य्यां**
**निःसङ्गो वर्त्तते संस्कृतपठनगृहाख्यः कुरङ्गः कृशाङ्गः।**

**हन्तुं तं धीरचित्तं विधृतखरशरो मेकले व्याधराजः**
**साधु व्रूते भो भो विलसन्महाभाग! मां रक्ष रक्ष।।**[८]

प्रेमचन्द्रतर्कालङ्कारस्य अयमेव आशयः अभूत् यत् विलसन्महोदयः संस्कृतज्ञः सन् संस्कृतसंरक्षणे भारतीयानां सहाय्यं विधास्यति। संस्कृतपाठशाला पत्रेऽस्मिन् दुर्बलहरिणरूपेण तथा च मैकाले तीक्ष्णशरधारकव्याधराजरूपेण चित्रितौ स्तः। अयं मृगः विलसन्महोदयं रक्षां याचते, इत्येव तात्पर्यं पत्रस्य। एतत्पत्रमुत्तरयन् विलसन्महाभागोऽलिखत् –

**निष्पीड्यापि परं पदाहतिशतैः शश्वद्बहुप्राणिनां**
**सन्तापाप्तऽपि करैः सहस्रकिरणेनाऽग्निस्फुलिङ्गोपमैः।।**

**छागाद्यैश्च विचर्विताऽपि सततं भ्रष्टाऽपि कुद्दालकै-**
**र्दूर्वा न म्रियते कृशाऽपि नितरां धातुर्दयादुर्बले।।**[९]

---

[८] तत्रैव, पृ. – १७१७

[९] तत्रैव, पृ. - १७१७

आङ्ग्लदेशीयः सन्नपि विलसन्महोदयः संस्कृतस्य अमृतत्वं जानाति। सः पण्डितानां सहाय्ये यद्यपि प्रवृत्तो नाऽभवत्, संस्कृतरक्षणाय कमप्युपायमपि नाऽकल्पयत तथापि संस्कृतस्य महत्त्वं चाटुशब्दैः अगायत्। संस्कृतभाषा तेन दूर्वया उपमिता। दूर्वा च न कदापि म्रियते।

कलकत्तासंस्कृतकॉलेज-प्राध्यापकः जयगोपालतर्कालङ्कारोऽपि तेषु एव दिवसेषु एतद्विषयकं पत्रं विलसन्महोदयाय प्राहिणोत्-

**अस्मिन् संस्कृतपाठसद्मसरसि त्वत्स्थापिता ये सुधी-**
**हंसाः कालवशेन पक्षरहिता दूरं गते ते त्वयि**

**तत्तीरे निवसन्ति सम्प्रति पुनर्व्याधास्तदुच्छित्तये**
**तेभ्यस्त्वं यदि पासि पालक तदा कीर्तिश्चिरं स्थास्यति।।**[१०]

प्रेमचन्द्रतर्कालङ्कारेण संस्कृतभाषाया रक्षणाय पत्रं प्रेषितमासीत्, किन्तु जयगोपालतर्कालङ्कारेण ते सर्वेऽपि सुधियः विलसन्महोदयाय स्मारिताः येषां श्रीचरणेषु स्थित्वा तेन विद्या गृहीता आसीत्, ये खलु विलसन्महोदयेन कलकत्तासंस्कृतमहाविद्यालये नियोजिता आसन्। नीरक्षीरविवेकिनः शास्त्रमानसरोवरनिवासिनः ते विद्वांसः अद्य मैकालेप्रकल्पितशिक्षानीतिकारणात् पक्षरहितहंस इव सञ्जाताः। यथा पक्षरहितो हंसः एकस्मात् स्थानात् स्थानान्तरं न गन्तुं पारयति तथैव एते संस्कृतकॉलेज-मानसरोवरनिवासिनः सुधियोऽपि पक्षरहिताः सन्ति। तेषां पक्षं गृहीत्वा कोऽपि संस्कृतरक्षणाय वक्तुं न पारयति। अतः विलसन्महोदय एव तेषां रक्षणे समर्थोऽस्ति। एतस्य पत्रस्य उत्तरमपि चाटुभाषया प्रेषितं विलसन्महोदयेन -

**विधाता विश्वनिर्माता हंसस्तत्प्रियवाहनम्।**
**अतः प्रियतरत्वेन रक्षिष्यति स एव तान्।।**

**अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।**
**देवभोग्यमिदं यस्माद् देवभाषेति कथ्यते।।**

**न जाने विद्यते किं तन्माधुर्यमेव संस्कृते।**
**सर्वदैव मधून्मत्ता येन वैदेशिका वयम्।।**

---

[१०] तत्रैव, पृ. - १७१७

**यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमालयौ।**
**यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम्।।**[११]

अस्मिन् पत्रेऽपि तेन संस्कृतस्य अमृतत्वमेव निगदितम्। विपत्तिः सम्पद्द्वारमपि उद्घाटयति। आङ्ग्लशासकैः तिरस्कृताः संस्कृतमनीषिणः तदानीं संस्कृते नवनवप्रयोगे सन्नद्धा अभवन्। सरलसरलया संस्कृतभाषया मधुरमधुराणां काव्यानां रचना नवनवोन्मेषितत्त्वानाम् आविष्कारः तथा च नवप्रयोगसंवलितगीतानां रचना तदानीं संस्कृतकविभिः संस्कृते समारब्धा। महामनीषी टी.गणपतिशास्त्री संस्कृतस्य स्वरूपं निरूपयन् आङ्ग्लभाषायाः विरोधं प्राकटयत्। 'अद्यतनी संस्कृतभाषा' कीदृशी भवेत् इति तैः स्वकाव्ये निरूपितम्।[१२]

**अद्यतनी संस्कृतभाषा**

टी. गणपतिशास्त्री

प्रायेणाऽद्य प्रथितधिष्णान् बालकानस्मदीयान्
दर्शं दर्शं ददति कथमप्याङ्गलानां कलायै।
अभ्यस्यन्तोऽप्यतिपरिमितो नोत्सहन्तेऽप्यमुष्यां
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।१।।

ज्ञातारोऽस्या विरलविरला मेलनं नैव तेषां
जातु स्याच्चेन्न पुनरनया भाषया संल्लपन्ति।
नाऽस्ति श्रोता वत वत भवत्यन्ततो न्यूनताधीः।
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।२।।

भाषा काऽपि व्यवहृतिकृते नोपयुक्ता यदि स्यात्
कोऽस्या दोषो, भवति स परं भाषकाणां हि दोषः।
इत्थं तत्त्वं सति मृतधिया दूषयन्ते यदेनां
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।३।।

---

[११] तत्रैव

[१२] अद्यतनी संस्कृतभाषा - टी. गणपतिशास्त्री

साङ्गा वेदा स्मृतिरथ पुराणाद्यमित्यस्त्यसीमे
साम्राज्येऽस्मिन् जगति वितते साधु सारस्वताख्ये।
अद्याऽस्माकं यदिदमभवच्चित्रकाव्यावसानं
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।४।।
आर्यास्सन्तोऽप्यहह महितं शास्त्रमुत्सृज्य दूरे
धर्माधर्मौ तदपि परमं ब्रह्म भाषान्तरेभ्यः।
जिज्ञासन्ते यदि वत परिक्षीणसर्वावकाशाः
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।५।।
आस्तामन्यद् गतमखिलमप्यन्ततो योग्यमस्या हौणीशालास्वपि परिमितश्चेषदीषत्प्रवेशः।
कष्टं तं च क्षपयितुमिहोद्युञ्जते चास्मदीयाः
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।६।।
नार्त्विज्यादिर्न न वितरणं नाऽधिकारोऽस्ति कश्चित्
भूपालेभ्यो न किमपि फलं जातु चेन्नाममात्रम्।
मा भूत् सर्वं विदुषि जगतां नो पुरस्कार्यबुद्धिः
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।७।।
संघीभूय स्वमहिमविदश्शक्तिमन्तोऽस्मदीयाः
पश्येयुश्चेदुदितमखिलं स्वं परावर्त्य चक्षुः।
अस्या वृद्धिर्जगति भविता ते परत्राऽपकृष्टाः
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।८।।
भूयो वादैः किमिह भविता दौरवस्थ्यं तदेतत्
दूरे धुन्वन् दुरितनिकरच्छेदिपादारविन्दः।
अस्मान् सर्वानखिलजगतामन्तरात्मा स देवः
तस्मादस्मिन् जगति समये क्षीयते संस्कृता गीः।।९।।
(विज्ञानचिन्तामणिपत्रिकायाः 4.6.1911 अङ्के प्रकाशिता)

तैः स्पष्टं प्रतिपादितं यत् संस्कृतभाषा आङ्ग्लानां तिरस्कारेण न कदापि क्षीयते। सा तु स्वजनानां भारतीयानां तिरस्कारेणैव क्षयं गच्छति। संस्कृतज्ञाः अतिविरलाः सन्ति, तेषां परस्परं मेलनं नास्ति। सत्यपि मेलने ते परस्परं संस्कृतं न भाषन्ते। नवभिः श्लोकैः तैः संस्कृतभाषायाः क्षयकारणं सरलया संस्कृतगिरा निरूपितम्। ते च श्लोकाः विज्ञानचिन्तामणौ पत्रिकायां प्रकाशिताः।

संस्कृतभाषा मृता इति गौराङ्गाणां घोषणा वस्तुतो न कस्मैचिदपि संस्कृतविदुषे अरोचत। तदानीन्तनः महान् संस्कृतज्ञः सुप्रसिद्धो समीक्षकः कुप्पूस्वामिशास्त्री 'किं संस्कृतभाषा मृता?' इति शीर्षकान्विते स्वीये निबन्धे रोषं प्रकटयन् प्रत्यपादयत् -

अनेकशः श्रुतं पठितश्चाङ्ग्ल-भाषाग्रन्थेषु यत्संस्कृतं मृता भाषेति। किन्तु नावगतं तात्पर्यं मृतशब्दस्येति। को वा शाब्दबोधोऽस्य विशेषणस्य? कोऽस्यार्थः- 'संस्कृतं यतोऽधुना न व्यवह्रियते तत एव मृता भाषा संस्कृतमिति' उत चाऽस्य भावः 'संस्कृतं यस्मान्मृतवज्जनान्विदधात्यस्मादेषा मृतेति ?'

प्रथमं विचारयामः किं संस्कृतस्य प्रचार एकपद एव लोपं गतो वेदानीमपि भारतेऽस्याः प्रचारो वर्तत इति किमस्या एतद्विशेषणं युक्तमयुक्तं वा?

यावद्भारतभूमौ सनातनोऽस्माकं वैदिको धर्मः पवित्रीकरिष्यति तावत्कालं साङ्गोपाङ्गाश्चत्वारो वेदा भूतले स्वशक्तिं घोषयिष्यन्ति तावत्संस्कृतविद्यायाः प्रचारः सेवनञ्च कदापि लोपं न यास्यति।[१३]

जयपुरवास्तव्यः सूर्यनारायणशर्मा 'संस्कृतभाषायाः निवेदनम्' इति शीर्षकान्विते स्वीये काव्ये संस्कृतभाषापक्षतः विदुषां सम्मुखे निवेदनमकरोत्-

**भो भो भारतभूमिजाः श्रृणुत मे दीनां मुहुः प्रार्थनां**
**कस्मान्मामपहाय पूर्वपुरुषैः सस्नेहमासेविताम्।**

**काप्यन्यैव नवानवा प्रतिदिनं भाषा समाश्रीयते**
**किं पत्नीं परिणीय सभ्यपुरुषैर्माता समुत्सार्यते।।१।।**

**सर्वे मां प्रहसन्ति किञ्च निगदन्त्येषा मृता निष्ठुरम्**
**श्रुत्वैतत्परिमुच्यतेऽश्रुसरणिर्नेत्रैर्हृदा खिद्यते**

---

[१३] सूर्यनारायण शर्मा, संस्कृतभाषायाः निवेदनम्, संस्कृतरत्नाकर, १९०४

**नाऽहं मृत्युमुपागतास्मि यदपि प्रेप्सुस्तथाप्यस्म्यहं**
**यस्माद् दुःखैर्क्लिश्यमानमनसो मृत्युर्वरं जीवनात्।।२।।**[१४]

संस्कृताङ्ग्लभाषयोः पारस्परिकं विवादं निरूपयितुं केरलदेशीयः आर.आर.वर्ममहोदयः 'गीर्वाणवाणीविजयम्' इति नाटकं पौराणिकशैल्या न्यबध्नात्। अस्मिन्नाटके संस्कृतभाषा आङ्ग्ली च ब्रह्मणः सम्मुखं गत्वा स्वस्वपक्षं निरूपयतः। अस्य नाटकस्य मञ्चनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशे नाट्यमहोत्सवे गुरुवायूरपरिसरेण कृतम्।

संस्कृतस्य प्रयोगे दत्तावधानतया संस्कृतकवीनां नवप्रयोगात् आङ्ग्लशासकानां संस्कृतविषयकभावे परिवर्तनमपि तस्मिन्नेव काले समभूत्। संस्कृतभाषा एतेषां पण्डितानां प्रयासेन स्वीयं पुरातनं स्वरूपं धारयन्ती अभिनवां विच्छित्तिं समवाप्नोत्। नवनवैः भावैः संवलिता इयं नवशब्दनिर्माणे समर्था बभूव। संस्कृतं पौराणिकी भाषा, न नव्यतत्त्वसमुन्मेषे समर्था इति वदतां पण्डितब्रुवां मुखं पिधातुं समर्थाऽभवदियं भाषा। संस्कृताङ्ग्लकोशनिर्माता श्रीमान् मोनियरविलियम्समहोदयः स्वकोशस्य भूमिकायां संस्कृतस्य महत्त्वं प्रतिपादयन् अलिखत् – 'Sanskrit is not a dead language even today'.

कालखण्डेऽस्मिन् महान्तः संस्कृतमनीषिणः समजायन्त। एतेषां रचनाभिः प्रेरणां प्राप्य जनाः आङ्ग्लशासकानां विरुद्धं सज्जीभूताः। स्वगुरुकुलानां विनाशात् संस्कृतभाषायाः तिरस्करणात् भारतीयजनमानसे राष्ट्रानुरागः भाषानुरागः संस्कृतेश्चानुरागः वृद्धिमगमत्। नवनवाभिः गीतिभिः संस्कृतसुकवयः जनजागरणमकुर्वन्। स्वीयं गौरवं जनान् स्मारयन्तः संस्कृतविद्वांसः स्वाधीनतासङ्ग्रामस्य कामप्यपूर्वां भूमिकां रचयामासुः।

~~~~~*~~~~~*~~~~~*~~~

---

[१४] कुप्पुस्वामी शास्त्री, किं संस्कृतभाषा मृता?, शारदा, मार्च १९१६
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# भारतीयसाहित्यशास्त्रपरिप्रेक्ष्ये कुन्तकस्य वक्रोक्तिविचारः

**- प्रो. (डॉ.) ललितकुमारः पटेलः**[१]

**जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्।**
**शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः॥**[२]

**वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम्।**
**देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्॥**[३]

आचार्यकुन्तकः वक्रोक्तिसम्प्रदायस्य प्रवर्तकः प्रतिष्ठापकः च मन्यते। स्वीयया प्रज्ञया कुन्तकः भामहप्रतिपादितां वक्रोक्तिं परमवैभवं प्रति नयति प्रतिष्ठापयति च। अयं कुन्तकः राजानक इत्युपाधिना विभूषितः वर्तते। एषा उपाधिस्तु काश्मीरवासिनां कृते प्रसिद्धा अतः कुन्तकः काश्मीरनिवासी स्यादिति ज्ञायते। काश्मीरप्रदेशः पण्डितपरिपूर्णः आसीत्। भगवत्याः शारदायाः असीमकृपा अत्र अवर्तत। संस्कृतसाहित्यस्य अनेके स्वनामधन्याः आचार्याः अत्रैव अभवन्। कुन्तकः स्वग्रन्थस्य मङ्गलाचरणे शिवस्य स्तुतिं करोति अतः सः शैवः प्रतीयते। काश्मीरे शैवागमसिद्धान्तस्य भूयान् प्रचारः आसीत्, एषः तेन प्रभावितः स्यात्। शैवागमस्य प्रसिद्धानि पदानि "स्पन्दः, परिस्पन्दः" इत्येवमादीनि विलोक्य एतदनुमानं क्रियते। विविधैः प्रमाणैः कुन्तकस्य समयः ख्रीष्टाब्दस्य ९२० तः दशमशताब्द्याः अन्तिमः भागः संलक्ष्यते।

- **वक्रोक्तेः उद्भवः विकासश्च**

साहित्यशास्त्रं काव्यशास्त्रम् अलङ्कारशास्त्रम् इत्यादिनामभिः परिचीयते एतत् शास्त्रम्। अस्य शास्त्रस्य समीक्षणीयं तत्त्वं भवति काव्यम्। काव्यस्य विविधानि तत्त्वानि प्रदर्शयन्ति एतानि शास्त्राणि। शास्त्रशब्दस्य व्युत्पत्तिः अत्र सङ्गच्छते यत् शासयति इति शास्त्रम् अथवा शासनं करोति इति शास्त्रम्। काव्यस्य तत्त्वानां नियामकं शासनकारकं भवति काव्यशास्त्रम्। एतस्य काव्यशास्त्रस्य

---

[१] प्रभारिकुलपतिः अनुस्नातकविभागाध्यक्षश्च, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्,
दूरभाषः ९८७९८३४०७१, इ-मेल plalit76@gmail.com

[२] वक्रोक्तिजीवितम् वृत्तिगतमङ्गलाचरणम्

[३] वक्रोक्तिजीवितम् ग्रन्थगतमङ्गलाचरणम्

मुख्यतया षट् सम्प्रदायाः वा विचारपरम्पराः सन्ति, ये काव्यस्य आत्मतत्त्वं विलोक्य आचार्यैः प्रथिताः सन्ति। तेषु अन्यतमो वर्तते वक्रोक्तिविचारः। अस्य प्रवर्तकः वर्तते आचार्यः कुन्तकः। तस्य च ग्रन्थः वक्रोक्तिजीवितम्। आनन्दवर्धनः "काव्यस्यात्मा ध्वनिः" इति यदुक्तवान् सः विचारः कैश्चित् आचार्यैः यथायथं स्वीकृतः, कैश्चित् पुनः परिष्कृतः। परिष्कारकेषु आचार्येषु अग्रगामी भवति आचार्यः कुन्तकः। कुन्तकस्य विचाराः मौलिकतया प्रतिपादिताः सन्ति। कुन्तकेन वक्रोक्तिजीवितं विरच्य काव्यशास्त्रपरम्परायां न केवलं पुष्टिः स्थापिता, अपितु नवीनो मार्गोऽपि प्रदर्शितः।

वक्रोक्तितत्त्वस्य प्रथमवारं प्रयोगं भामहः अकरोत्। किन्तु भामहस्य वक्रोक्तिः अलङ्काररूपेण स्थिता वर्तते। कुन्तकस्तु अस्यै वक्रोक्त्यै नवीनं जीवनं प्रयच्छन् इव प्रतिभाति। भामहः वक्रोक्तिम् अतिशयोक्त्या सह योजयति। पुनश्च "सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते" इत्यादि विलिख्य भामहः वक्रोक्तेः सर्वातिशायितामपि पुष्णाति किन्तु पारमार्थिकं स्वरूपं प्रतिपादयितुं भामहः निष्फलः प्रतीयते अथवा एषा वक्रोक्तेः आरम्भिकी अवस्था परिगण्यते।

दण्डी समस्तं वाङ्मयं स्वभावोक्तौ वक्रोक्तौ च विभज्य वक्रोक्तेः सम्पोषकं तत्त्वं श्लेषमेव अङ्गीचकार। कुन्तकः स्वभावोक्तेः अलङ्कारत्वेन निषेधं करोति इति एतत् बीजं दण्डिनः एव प्राप्तवान्। वामनस्तु पुनः वक्रोक्तिं लोकसीमातिवर्ति तत्त्वं प्रख्यापयति। रुद्रटः वक्रोक्तिं शब्दालङ्काररूपेण निरूपयामास, तस्य च अनुकरणं प्रायः अनेके आचार्याः अकुर्वन्। आनन्दवर्धनः वक्रोक्तिं वाच्यालङ्कारम् (अर्थालङ्कारम्) स्वीकरोति। एवं भामहेन यद्बीजम् उप्तं तस्य वृक्षरूपेण क्रमिकः विकासः आनन्दवर्धनपर्यन्तं दृष्टः। अधुना एतस्य वृक्षस्य फलानि कुन्तकप्रदर्शितानि पश्यामः।

- **वक्रोक्तिजीवितग्रन्थस्य प्रतिपाद्यविषयाः**

सम्प्रति यत् वक्रोक्तिजीवितम् उपलभ्यते तत्र चत्वारः उन्मेषाः सन्ति। तत्रापि आदिमौ द्वौ उन्मेषौ पूर्णौ प्रतीयेते, तृतीयस्य आदिमः भागः क्रमशः विषयान् प्रतिपादयति किन्तु ततः आरभ्य आन्तं भागः विभक्तः, अव्यवस्थितः अत एव अपूर्णः प्रतीयते। एतस्य विषये डॉ. एस. के. डे. कथयति यत् अयं ग्रन्थः असमाप्तो वर्तते। वक्रोक्तिजीवितस्य ग्रन्थस्य विषयवस्तुप्रतिपादकं विभाजनं त्रिधा वर्तते- कारिकाभागः वृत्तिभागः उदाहरणभागश्च। कारिकाः वृत्तिः च कुन्तकेन रचिताः सन्ति, उदाहरणानि क्वचित् अन्येषां विदुषां क्वचित् पुनः स्वकीयानि प्रतिपादयति।

प्रथमे उन्मेषे मङ्गलाचरणम्, ग्रन्थस्य उपादेयता, ग्रन्थस्य अभिधानम्, ग्रन्थस्य प्रयोजनम्, काव्यस्य लक्षणम्, साहित्यशब्दविमर्शः, वक्रतायाः भेदाः, तत्र वर्णविन्यासवक्रता पदपूर्वार्धवक्रता प्रत्ययाश्रयवक्रता वाक्यवक्रता प्रकरणवक्रता प्रबन्धवक्रता इति भेदाः, वक्रतानां सामान्यनिरूपणम्, काव्यबन्धस्य निरूपणम्, गौड-वैदर्भादिमार्गाणां खण्डनं तथा सुकुमारादिमार्गाणां स्थापना, अन्ते कालिदासस्य काव्येषु अनौचित्यस्थानानां वर्णनम् – इत्येते विषयाः सन्ति।

द्वितीये उन्मेषे वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता तथा प्रत्ययाश्रयवक्रता विस्तरेण प्रतिपादिताः सन्ति। पदपूर्वार्धवक्रतायाः अपि उपभेदाः रूढिवैचित्र्यवक्रता, पर्यायवक्रता, उपचारवक्रता, विशेषणवक्रता, संवृत्तिवक्रता, वृत्तिवैचित्र्यवक्रता इत्यादयः प्रतिपादिताः सन्ति।

तृतीये उन्मेषे ग्रन्थकारः वस्तुवक्रता तथा वाक्यवैचित्र्यवक्रतायाः निरूपणं करोति। वस्तु सहजम् आहार्यं वा भवितुं शक्नोति। सहजवस्तुवक्रता रसादिं पुष्णाति, आहार्यवक्रता अलङ्कारवैचित्र्यं प्रकटयति। एतत् प्रतिपाद्य मनोहारित्वं विस्तरेण वर्णयति। अस्मिन् प्रकरणे रसवद्-प्रेय-ऊर्जस्वि-समाहितादीन् अलङ्कारान मन्येरन् न वा इति चर्चा कृता वर्तते। एतन्निष्कर्षरूपेण कुन्तकः कथयति यत् एते न अलङ्काराः अपितु अलङ्कार्याः सन्ति। एतदनन्तरं विभावना-ससन्देह-अपह्नुत्यादयः अलङ्काराः निरूपिताः सन्ति।

चतुर्थे उन्मेषे प्रकरणवक्रतायाः प्रबन्धवक्रतायाः च निरूपणम् अस्ति। अनेकवाक्यानां समूहः तथा प्रबन्धस्य एकदेशः प्रकरणं कथ्यते। प्रकरणस्य रमणीयता प्रकरणवक्रता तथा प्रबन्धस्य रमणीयता प्रबन्धवक्रता कथ्यते। सम्पूर्णं प्रबन्धम् आस्वाद्य भावकः नवीनमेव भावम् अनुभवति सा कथ्यते प्रबन्धवक्रता।

- **ग्रन्थस्य अभिधानम् अभिधेयं प्रयोजनं च**

एतस्य ग्रन्थस्य नाम दृष्ट्वा प्रतीयते यदस्मिन् ग्रन्थे वक्रोक्तिः प्रमुखं तत्त्वं वर्तते किन्तु प्रथमोन्मेषे निरूपितां कारिकाम् "काव्यस्यायमलङ्कारः कोऽपि अपूर्वः" इत्यादि अवलोक्य म.म. डॉ. पी.वी. काणे कथयति यत् – अस्य ग्रन्थस्य नामाभिधानं काव्यालङ्कारः इत्येव प्रतीयते। काव्यस्य अयम् अलङ्कारः इति पदांशेन श्रीराधेश्यामः कथयति यत् नायं ग्रन्थः काव्यालङ्कारः, काव्यस्य अलङ्काररूपः असौ। नाम, वक्रोक्तिजीवितम् इति अभिधानम् अस्ति अतः अभिधेयम् अलङ्कारः न अपितु वक्रोक्तिः एव वर्तते इति भावः।

**ग्रन्थस्य प्रयोजनम्** – वाग्देवीमभिवन्द्य कुन्तकः स्वग्रन्थस्य प्रयोजनं कथयति यत्

**लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।**
**काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते॥**[४]

अर्थात् लोकोत्तरस्य चमत्कारस्य करणे यत् वैचित्र्यम् अस्ति, तस्य सिद्धये अयं ग्रन्थः लिख्यते। एतद्विलिख्य काव्यस्य त्रिविधं प्रयोजनं कुन्तकः विशिनष्टि – धर्मादिसाधनप्राप्तिः

[४] वक्रोक्तिजीवितम्-१/२

चतुर्वर्गफलप्राप्तिः वा। द्वितीयम् व्यवहारज्ञानम्। तृतीयम् आनन्दोपलब्धिः। एवम् अस्य ग्रन्थस्य प्रयोजनादि उक्तम्।

- **वक्रोक्तिविचारः**

वक्रोक्तितत्त्वस्य विचारबीजं भामहेन प्रदत्तम्। तस्य च विस्तारः क्रमेण जातः इति अग्रे वयं दृष्टवन्तः। कुन्तकः वक्रोक्तिं रस-ध्वनि-अलङ्कारैः समानं मत्वा काव्यात्मानं स्वीकरोति इति सिद्धान्तस्य चर्चा अधुना क्रियते।

कुन्तकः वक्रोक्तेः काव्यात्मरूपेण संस्थापकः आचार्यः वर्तते। तस्य मतानुसारम् अलङ्कारः अलङ्कार्यः द्वावपि भिन्नौ वर्तेते। सालङ्कारस्य एव काव्यता भवति अतः काव्यम् अलङ्कारः इति पृथक् वस्तु नास्ति।

**सालङ्कारस्य काव्यता सालङ्कारस्यालङ्करणसहितस्य**
**सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्।**[५]

एवम् काव्यस्य अलङ्कारेण सह योगः एव काव्यम् उच्यते। एवं काव्यस्वरूपभूमिकां प्रस्तूय कुन्तकः काव्यलक्षणं प्रदर्शयति यथा -

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥**[६]

अर्थात् वक्रकविव्यापारेण सुशोभितः, सहृदयानाम् आनन्दकरः बन्धः (रचना) काव्यम्। वस्तुतः कुन्तकस्य समग्रोऽपि ग्रन्थः काव्यस्य लक्षणं व्याख्यापयितुं निर्मितः स्यादिति दृश्यते। लक्षणप्रदर्शितानां शब्दानां विस्तारपूर्वकं व्याख्यानं कुन्तकः प्रतिपादयति।

- **शब्दार्थौ तत्साहित्यं च**

यथा तिलस्य प्रत्येकं कणेषु तैलं भवति तथैव शब्दार्थौ मिलित्वा काव्यं भवति। केवलं रमणीयताविशिष्टः शब्दः अथवा चारुत्वविशिष्टः अर्थः काव्यं न भवति। काव्यसर्जनाय शब्दार्थयोः द्वयोः सुन्दरता रमणीयता च आवश्यकी अस्ति।

**न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति।**

---

[५] वक्रोक्तिजीवितम्-१/६ वृत्तिः

[६] वक्रोक्तिजीवितम्-१/७

एतस्य उदाहरणानि क्रमेण प्रस्तौति यथा – भण तरुणि इत्यत्र केवलं वर्णानां सुन्दरता अस्ति। प्रकाशस्वाभाव्यम् इति पद्ये अर्थमात्रस्य शोभा अस्ति। किन्तु कविः तादृशौ शब्दार्थौ प्रयुञ्जीत येन काव्ये सौन्दर्यम् उत्पद्येत। शब्दस्य परिवर्तनमात्रेण काव्यस्य भावः विनश्येत इति आवश्यकम्। यत् तत्त्वं सहृदयान् आह्लादयति तत् स्पन्दः अस्ति। अयं कविप्रतिभापरिस्पन्दः एव काव्ये नाविन्यं जनयति। कविसमुल्लासे काव्यकर्मणि कीदृशः शब्दः, कीदृशश्चार्थः रमणीयतां वितनोति? तत्राह-

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**[७]

(उदा.- द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥)[८]

कुमारसम्भवस्य पञ्चमसर्गस्योदाहरणमिदम्। कुन्तकः शब्दस्य रमणीयतां पद्ये कथं वरिवर्ति? तत्प्रतिपादयति यथा-

**अत्र परमेश्वरवाचकशब्दसहस्रसम्भवेऽपि 'कपालिन' इति बीभत्सरसालम्बन-विभाववाचकः शब्दो जुगुप्सास्पदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति। 'सम्प्रति' 'द्वयं' चेत्यतीव रमणीयम्- यत्किल पूर्वमेका सैव दुर्व्यसनदूषितत्वेन शोचनीया सञ्जाता, सम्प्रति पुनस्त्वया तस्यास्तथाविधदुरध्यवसायसाहायकमिवारब्धमित्युपहस्यते। 'प्रार्थना'शब्दोऽप्यतितरां रमणीयः, यस्मात् काकतालीययोगेन तत्समागमः कदाचिन्न वाच्यतावहः। प्रार्थना पुनरत्रात्यन्तं कौलीनकलङ्ककारिणी। 'सा च' 'त्वञ्च' इति द्वयोरप्यनुभूयमानपरस्परस्पर्धिलावण्यातिशय-प्रतिपादनपरत्वेनोपात्तम्। 'कलावतः' 'कान्तिमती' इति च मत्वर्थीयप्रत्ययेन द्वयोरपि प्रशंसा प्रतीयत इत्येतेषां प्रत्येकं कश्चिदप्यर्थः शब्दान्तराभिधेयतां नोत्सहते।**

**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः।**[९]

(उदा.- भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशाद्धृदयनिहितादागतं त्वत्समीपम्।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥)[१०]

---

७ वक्रोक्तिजीवितम्-१/९ (पूर्वार्धः)

८ कुमारसम्भवम्-५/७१

९ वक्रोक्तिजीवितम्-१/९ (उत्तरार्धः)

१० मेघदूतम्-१/५६

मेघदूतस्य पद्येऽस्मिन् पदार्थपरिस्पन्दः कथं सुतरां सहृदयहृदयाह्लादकारी भवति, तत्प्रतिपादयति यथा-

**अत्र प्रथममात्रणपदार्थस्तदाश्वासकारिपरिस्पन्दनिबन्धनः 'भर्तुर्मित्रं मां विद्ध' इत्युपादेयत्वमात्मनः प्रथयति। तच्च न सामान्यम्, 'प्रियम्' इति विश्रम्भकथापात्रताम्। इति तामाश्वास्य उन्मुखीकृत्य च तत्सन्देशात् त्वत्समीपमागमनमिति प्रकृतं प्रस्तौति। 'हृदयनिहितात्' इति स्वहृदयनिहितं सावधानत्वं द्योत्यते। ननु चान्यः कश्चिदेवंविधव्यवहारविदग्धबुद्धिः कथं न नियुक्त इत्याह- ममैवात्र किमपि कौशलं विजृम्भते। 'अम्बुवाहम्' इत्यात्मनस्तत्कारिताभिधानं द्योतयति। यः 'प्रोषितानां वृन्दानि त्वरयति,' सञ्जातत्वराणि करोति। कीदृशानाम्- 'श्राम्यतां,' त्वरायामसमर्थानामपि। 'वृन्दानि' इति बाहुल्यात् तत्कारिताभ्यासं कथयति। केन- 'मन्द्रस्निग्धैर्ध्वनिभिः,' माधुर्यरमणीयैः शब्दैः विदग्धदूतप्ररोचनावचनप्रायैरित्यर्थः। क्व- 'पथि' मार्गे। यदृच्छया यथा कथञ्चिदहमेतदाचरामीति। किं पुनः प्रयत्नेन सुहृत्प्रेमनिमित्तिं संरब्धबुद्धिं न करोमीति। कीदृशानि वृन्दानि- 'अबलावेणिमोक्षोत्सुकानि'। 'अबला'शब्देनात्र तत्प्रेयसीविरहवैधुर्यासहत्वं भण्यते, तद्वेणिमोक्षोत्सुकानीति तेषां तदनुरक्तचित्तवृत्तत्वम्।**

**तदयमत्र वाक्यार्थः- विधिविहितविरहवैधुर्यस्य परस्परानुरक्तचित्तवृत्तेर्यस्य कस्यचित् कामिजनस्य समागमसौख्यसम्पादनसौहार्दे सदैव गृहीतव्रतोऽस्मीति। अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे परमार्थतः स एव जीवितमिति सुतरां सहृदयाह्लादकारी।**

एवम्, काव्यं शब्दार्थयोः समभावेन जातं विशिष्टं तत्त्वं वर्तते। विशिष्टमेवेह साहित्यमभिप्रेतम्। शब्दार्थौ सहितौ, तयोः साहित्यम्। अत्र नास्ति द्विवचनम्, अपितु अस्ति द्वित्वजातिः वाच्यवाचकरूपा। एवं स्थिते -

**द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते।**
**व्यक्तिद्वित्वाभिधाने पुनरेकपदव्यवस्थितयोरपि काव्यत्वं स्यात्।**

शब्दानां शब्दैः सह अर्थानाम् अर्थैः सह परस्परस्पर्धित्वं साहित्यं भवति। यथा कुमारसम्भवे द्वयं गतम् इत्यादि पद्ये। मेघदूते च भर्तृर्मित्रं प्रियमविधवे इत्यत्र च। एवं कुन्तकः साहित्यस्य लक्षणं प्रदर्शयति यथा -

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।**
**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः॥**[११]

[११] वक्रोक्तिजीवितम्-१/१७

- **वक्रोक्तिरूपः अलङ्कारः तत्स्वरूपं च**

कुन्तकस्य अनुसारं शब्दार्थयोः सहितत्वं साहित्यं भवति किन्तु अपोद्धारबुद्ध्या विचार्यते चेत् शब्दः अर्थः च अलङ्कार्यौ भवतः, तयोः सौन्दर्याधायकं तत्त्वं वक्रोक्तिः भवति। एवमुक्त्वा कुन्तकः वक्रोक्तेः स्वरूपं कथयति यत् वक्रा उक्तिः वक्रोक्तिः। शास्त्रात् लोकप्रसिद्धेः वा भिन्ना उक्तिः वक्रोक्तिः। या कविकर्मणः वैदग्ध्यं प्रदर्शयति, कवेः कौशलं प्रदर्शयति सा वक्रोक्तिः।

**वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा॥**

अर्थात् प्रसिद्धात् अर्थात् भिन्ना अभिधा वक्रोक्तिः अस्ति। **वैदग्ध्यभङ्गीभणितिः** अत्र विदग्धता अर्थात् कविकर्मणः कौशलम्। तस्य भङ्गी अर्थात् शोभा। तद्युक्ता भणितिः अर्थात् वक्रोक्तिः। **शब्दार्थौ पृथगवस्थितौ केनापि व्यतिरिक्तेनालङ्करणेन योज्यते किन्तु वक्रतावैचित्र्ययोगितयाभिधानमेवानयो-रलङ्कारः तस्यैव शोभातिशयकारित्वात्।** एवं स्थिते वक्रता अथवा वैचित्र्ययुक्तं कथनं शब्दार्थयोः अलङ्कारः भवति।

- **स्वभावोक्तेः खण्डनम्**

वक्रोक्तिरेव शब्दार्थयोः अलङ्कारः अस्ति इति स्थापयितुं कुन्तकः स्वभावोक्तेः अलङ्कारितां न स्वीकरोति। आचार्याः अलङ्कारम् अलङ्कार्यम् इत्यनयोः भेदं न जानन्ति अतः कुन्तकः कथयति यत् – "पदार्थस्य स्वभावः धर्मो वा स्वभावोक्तिः अस्ति। तत् काव्यशरीरम् अस्ति। काव्यशरीरम् अलङ्कार्यं भवति। **भवतोऽस्माद् अभिधानप्रत्ययौ इति भावः, स्वस्य आत्मनो भावः स्वभावः।** स्वभावरहितं वस्तु शब्दस्य विषयो न भवति। अर्थात् पदार्थः एव शब्दस्य विषयः भवति। एवं स्वभावः अलङ्कार्यः अस्ति, न अलङ्कारः। अन्यथा वाहकस्यापि वाक्यानि अलङ्कारयुक्तानि भवेयुः। यदि स्वभावोक्तिः अलङ्कारः स्वीक्रियते तर्हि अलङ्कार्यं किम्? इति स्थिते क्रियाविरोधस्य स्थितिः आपाद्यते। स्वस्य स्कन्धे आरोहणं न शक्यते खलु। पुनश्च स्वभावोक्तिः सर्वत्र अस्ति, तेन सह यदि अन्यम् अलङ्कारं योजयामः तर्हि संसृष्टिः भवति। अथवा अस्पष्टतायां सत्यां सङ्करः भवति अतः स्वभावोक्तेः स्वरूपं शुद्धं न भविष्यति। तस्मात् न स अलङ्कारः।

- **कविव्यापारवक्रतायाः प्रकाराः**

कविव्यापारवक्रतायाः मुख्यतया ०६ प्रकाराः सन्ति तथा अन्ये उपभेदाः सन्ति। एते षड् यथा – वर्णविन्यासवक्रता पदपूर्वार्धवक्रता प्रत्ययाश्रयवक्रता वाक्यवक्रता प्रकरणवक्रता प्रबन्धवक्रता इति। वर्णविन्यासवक्रतायां वर्णयोजनायाः सौन्दर्यं भवति। वर्णरचना कुन्तकस्य मतानुसारं रसगतौचित्यवती भवेत्, अनुप्रासादियुक्ता न। पदपूर्वार्धवक्रता नाम पदस्य पूर्वभागः मूलशब्दः प्रकृत्यंशः च, तस्य वक्रता। प्रत्ययवक्रता नाम पदस्य परार्धस्य प्रत्ययांशस्य रमणीयता। तत्र कालः

कारकम् वचनम् पुरुषः उपग्रहः प्रत्ययाः इत्यादीनां वक्रता अभियुक्ता वर्तते। एतदतिरिच्य उपसर्गाणां निपातानामपि वक्रता तेन प्रतिपादिता अस्ति। तृतीये उन्मेषे वाक्यवक्रतायाः प्रतिपादनम् अस्ति। अत्र सर्वेषाम् अर्थालङ्काराणां समावेशो भवति। चतुर्थे उन्मेषे प्रकरणवक्रतायाः प्रतिपादने कुन्तकेनोक्तं यत्- अनेकेषां वाक्यानां समूहः एवञ्च प्रबन्धस्यांशः प्रकरणमिति कथ्यते। यत्र प्रकरणेषु स्वस्य सहज-आहार्यसुकुमारतामाध्यमेन रमणीयत्वं प्राप्य प्रकरणवक्रतां जनयति कविः। तथा च प्रबन्धवक्रतायाः परिभाषां कुर्वन् कुन्तकः आह- **इतिवृत्तान्यथावृत्तरससम्पदपेक्षया। रसान्तरेण रम्येण तत्र निर्वहणं भवेत्॥ तस्या एव कथा मूर्तेरामूलोन्मीलितश्रियः। विनेयानन्दनिष्पत्त्यै सा प्रबन्धस्य वक्रता॥** अर्थात् यत्र कविः इतिवृत्तस्य रससम्पत्त्या सहृदयानां कृते आनन्दाय नवीनरसं प्रस्तौति, तत्र प्रबन्धवक्रता भवति।

- **बन्धः**

कुन्तकः शब्दार्थयोः साहित्यस्य वक्रताव्यापारस्य च व्याख्यानं प्रतिपाद्य काव्यलक्षणस्थितस्य बन्धशब्दस्य व्याख्यां करोति। बन्धः अर्थात् वाक्यस्य व्यापारशाली विन्यासः। तदुक्तम् -

**वाच्यवाचकसौभाग्यलावण्यपरिपोषकः।**
**व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते॥**[१२]

अर्थात् वाच्यवाचकयोः (शब्दार्थयोः) सौभाग्य-लावण्यगुणयोः परिपोषकः वाक्यस्य व्यापारशाली विन्यासः यत्र भवति सः बन्धः इत्युच्यते।

- **तद्विदाह्लादकारित्वम्**

बन्धस्य व्याख्यां कृत्वा कुन्तकः लक्षणस्थितं तद्विदाह्लादकारित्वं व्याख्यापयति। शब्दस्य अर्थस्य वक्रोक्तेः च स्पर्शेण उत्कर्षवत् लोकोत्तरं स्वरूपं, लोकोत्तरचमत्कारः, हृदयानुभवः रमणीयः असौ तद्विदाह्लादकारित्वं कथ्यते।

**वाच्यवाचकवक्रोक्तित्रितयातिशयोत्तरम्।**
**तद्विदाह्लाकारित्वं किमप्यामोदसुन्दरम्॥**[१३]

- **काव्यस्य त्रिविधः मार्गः**

एवमाचार्यः कुन्तकः काव्यलक्षणस्य विस्तरेण चर्चां कृत्वा काव्यस्य त्रिविधं मार्गं प्रदर्शयति। मार्गः अर्थात् कविप्रस्थानहेतुः। ते त्रयः – सुकुमारः विचित्रः मध्यमः इति।

---

[१२] वक्रोक्तिजीवितम्-१/२२
[१३] वक्रोक्तिजीवितम्-१/२३

**सम्प्रति तत्र ये मार्गाः[१४] कविप्रस्थानहेतवः।**
**सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥[१५]**

मार्ग इति व्यवहारे कुन्तकः कथयति यत् वैदर्भी गौडीत्याद्याः रीतयः देशमवलम्बन्ते। तस्मात् यावन्तो देशाः तावत्यः रीतयो भवेयुः। देशः परम्पराम् अवलम्बते, काव्यं तु शक्तिं निपुणताम् अभ्यासं च अवलम्बते। अतः रीतिर्नोचिता।

**कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते।**

कवेः स्वभावम् अवलम्बते मार्गः। कवेः शक्ति-व्युत्पत्ति-अभ्यासानुगुणो भवति मार्गः। अतः सुकुमारशक्त्या जातो मार्गः सुकुमारः, मध्यमशक्त्या जातो मार्गो मध्यमः, विचित्रप्रतिभयोत्पन्नो मार्गो विचित्रः इति स्थितम्।

कवेः दोषरहित, अपूर्वशक्त्या समुल्लसितः आह्लादकारी मार्गः भवति सुकुमारमार्गः। अयं मार्गः कैश्चित् अलङ्कारैः युक्तो भवति। अत्र पदार्थानां रमणीयता भवति। एषः शृङ्गारादिरसोत्कर्षकारी भवति। कविप्रतिभानिर्मितो भवति। अत्र कालिदासस्य सर्वसेनस्य च समावेशो भवति।

कविप्रतिभायाः प्रथमे उल्लेखे कश्चित् विशिष्टः वक्रताप्रकारः परिस्फुटो भवति। अत्र विविधा अलङ्काराः भवन्ति। अत्र अनवीना अपि पदार्थाः उक्तिवैचित्र्येण नवीना इव प्रतीयन्ते। कविः प्रतिभाबलेन अन्यदपि स्वरूपं भावकरुचिकरं प्रस्थापयति। अस्मिन् मार्गे बाणभट्टस्य भवभूतेः राजशेखरस्य च समावेशो भवति।

मध्यममार्गे सुकुमारस्य विचित्रस्य च काश्चन विशेषताः संयुक्ततया विद्यमाना भवन्ति। अस्य मार्गस्य निपुणाः कवयः मातृगुप्तः मायुराजः मञ्जीरः च वर्तन्ते।

- **मार्गस्य गुणाः**

कुन्तकः प्रत्येकं मार्गस्य चतुरो गुणान् कथयति – प्रसादः माधुर्यं लावण्यम् अभिजात्यं चेति। एतेषां चतुर्णां स्वरूपं मार्गानुसारं भिद्यते। एतेषां चतुर्णां वर्णनं कृत्वा कुन्तकः सामान्यगुणद्वयमपि वर्णितवान् – सौभाग्यगुणः औचित्यगुणश्चेति।

एवं वक्रोक्तिकारस्य अनुसारं वक्रोक्तिः, वक्रता, काव्यलक्षणम्, मार्गाः इति विषयाः अत्र प्रतिपादिताः।

---

[१४] सन्ति तत्र त्रयो मार्गाः। इत्यपि पाठः।

[१५] वक्रोक्तिजीवितम्-१/२४

## सन्दर्भग्रन्थाः


१. संस्कृत काव्यशास्त्र का इतिहास, महामहोपाध्याय डॉ. पी. वी. काणे, अनुवादक- डॉ. इन्द्रचंद्र शास्त्री, प्रकाशक- मोतीलाल बनारसीदास, प्रथम संस्करण-१९६६

२. ભારતીય સાહિત્ય વિચાર મંજૂષા, ખંડ-૨, સંપાદક- ડૉ. રમેશ સું. બેત્રઈ, સહસંપાદક - ડૉ. નારાયણ મ. કંસારા, પ્રકાશક- યુનિવર્સિટી ગ્રંથનિર્માણ બોર્ડ, ગુજરાત રાજ્ય

३. वक्रोक्तिजीवितम्, व्याख्याकार- श्री राधेश्याम मिश्र, चौखम्बा प्रकाशन, वाराणसी, ई.स.२०१६

४. वक्रोक्तिजीवितम् (प्रथमः उन्मेषः), व्याख्याकारः- डॉ.वेदप्रकाश डिंडोरिया, सम्पादक- डॉ.ओमनाथ बिमली, शिवालिकप्रकाशन, दिल्ली, प्रथमसंस्करणम्-२०१६

५. ભારતીય સાહિત્યશાસ્ત્રની વિચારપરંપરાઓ, લેખક- પ્રો.તપસ્વી નાન્દી, યુનિવર્સિટી ગ્રંથનિર્માણ બોર્ડ, ગુજરાત રાજ્ય

६. કુન્તકનો વક્રોક્તિવિચાર, લેખક અને પ્રકાશક- રમેશ મ. શુક્લ, પ્રથમ આવૃત્તિ-૧૯૭૮


~~~~~*~~~~~*~~~~~*~~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# मुद्राराक्षसे निरूपितव्यवसायवैविध्यम्

**- डॉ. डायालालः मालदेभाई मोकरिया[१]**

मानवसमाजः विकासशीलः अस्ति। प्राचीनकालात् मानवः संशोधनं कृत्वा स्वस्य आवश्यकतां पुरयति। दिने दिने मानवः समृद्धः भवति। प्राचीनकालात् अद्यावधिः मानवेन विविधाः आविष्काराः संशोधिताः सन्ति। तैः मानवस्य जीवनं सुविधापुर्णम् भवति। पूर्वस्मिन् कालस्य मानवः कीदृशः आसीत् तस्य अवलोकनं दर्शनं वा रसप्रदं भवति। मानवसमाजस्य अभ्यासाय तत्कालीनं साहित्यमपि अवलोकनीयं भवति। साहित्यं समाजस्य दर्पणमस्ति इत्यपि उक्तमस्ति। अश्वघोषः, कालिदासः, माघः, भासः, भवभूतिः इत्यादयः कवय: अपि स्वस्य समयस्य समाजस्य स्वकाव्ये निरूपणं कुर्वन्ति। अस्मिन् शोधपत्रे अपि विशाखदत्तस्य समयस्य व्यवसायानां सन्दर्भे संशोधनमस्ति। विशाखदत्तस्य एकं नाटकं मुद्राराक्षसं प्राप्यते। तेन एव तत्कालीनव्यवसायानां वैविध्यमत्र निरूपितमस्ति।

विशाखदत्तस्य कालनिर्धारणम् अपि अत्र अपेक्षितम् अस्ति। प्रायः संस्कृतकवयः स्वसन्दर्भे किमपि न लिखन्ति। स्वपरिचयं न ददति अतः विद्वान्सः तेषा कालनिर्धारणाय विविधानि प्रमाणानि एकत्रितं कुर्वन्ति। तैः कवीनां जीवनस्य परिचयं प्राप्तुं शक्नुमः। संस्कृतकवीनां जीवनस्य एवं समयस्य सन्दर्भे मतमतान्तरम् अपि प्राप्यते। विशाखदत्तस्य जीवनस्य समयस्य च सन्दर्भे अपि विद्वद्सु मतभेदाः सन्ति। डॉ. निरञ्जनः मिश्रः विविधानां विदुषां मतानां समीक्षां कृत्वा तस्य समयः षष्ठीशताब्द्याः पूर्वार्धं मनुते।[२] डॉ. विजयः पण्ड्या विदुषां विविधप्रमाणैः तस्य समयं पञ्चमशताब्दिः अथवा षष्ठशताब्द्याः उत्तरार्धं स्वीकरोति।[३] इत्थं, विशाखदत्तस्य समयः पञ्चमी शताब्दिः अथवा षष्ठी शताब्दिः अस्ति। तस्मिन् काले ये व्यवसाया: प्रचलिताः आसन् तेषां संशोधनम् अस्मिन् शोधपत्रे अस्ति।

मुद्राराक्षसे तत्कालीनसमाजे प्रवर्तितानां व्यवसायानां वर्णनं प्राप्यते। डॉ. दिव्या मिश्रा लिखति यत् – "मुद्राराक्षस नाटक में ब्राह्मणों, क्षत्रियों, वैश्यों एवं शूद्रों का उल्लेख तो प्राप्त होता है किंतु

---

[१] आसि. प्रोफेसर, अनुस्नातकभवनम्, सोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
दूरभाषक्रमाङ्कः - 9825512756, ई-मेइल - dmmokariya@gmail.com

[२] मुद्राराक्षसम् (सं. डॉ. निरञ्जन मिश्र) पृ. १९

[३] मुद्राराक्षसम्, सं. विजय पण्डया, पृ. ४

उनके जीविका के साधनों का अधिक उल्लेख नहीं मिलता।"[४] किन्तु मुद्राराक्षसस्य अध्ययनेन तत्कालीनसमयस्य केषाञ्चन व्यवसायानां सन्दर्भाः प्राप्यन्ते।

विशाखदत्तस्य काले ब्राह्मणः, क्षत्रियः, वैश्यः एवं शुद्रः इति चतुर्वर्णानां व्यवसायानां वर्णनं प्राप्यते। चतुर्वर्णेषु व्यवसायस्य चयने स्ववर्णस्य व्यवसायस्य अनुसरणम् अनिवार्यं न आसीत् तथापि प्रायः वर्णानुसारं व्यवसायस्य चयनं दृश्यते।

ब्राह्मणानाम् आदरयुक्तं स्थानम् आसीत्। केचन ब्राह्मणानां व्यवसायः कर्मकाण्डं पौरोहित्यं वा आसीत्। मुद्राराक्षसे श्राद्धकर्मणः उल्लेखः अस्ति। -

इच्छाम्यार्येणाभ्यनुज्ञातो देवस्य पर्वतेश्वरस्य पारलौकिकं कर्तुम्। तेन च धारितपूर्वाणि आभराणि ब्राह्मणेभ्यः प्रतिपादयामीति।[५]

अत्र चन्द्रगुप्तः पर्वतेश्वरस्य पारलौकिकम् अर्थात् मरणोत्तरक्रियां कर्तुम् इच्छति। तदर्थं बाह्मणेभ्यः आभूषणानां दानं कर्तुम् इच्छति। दानम् अपि गुणवद्भ्यः ब्राह्मणेभ्यः एव प्राप्तं भवेत् तदर्थमपि प्रयत्नः अस्ति। चाणक्यः कथयति –

पर्वतेश्वरधृतपूर्वाणि गुणवन्ति भूषणानि गुणवद्भ्यः एव प्रतिपादनीयानि। तदहं स्वयमेव परीक्षितगुणान् ब्राह्मणान् प्रेषयामीति।[६]

अस्मिन् नाटके मरणोत्तरस्याः तोयाञ्जल्याः अपि उल्लेखः अस्ति। मलयकेतुः कथयति -

अद्य दशमो मासस्तातस्योपरतस्य। न चास्माभिर्वृथापुरुषाभिमानमुद्वहद्भिस्तमुद्दीश्य तोयाञ्जलिरप्यावर्जितः।[७]

मलयकेतुः प्रतिशोधं नीत्वा निवापाञ्जलिं दातुम् इच्छति। -

शत्रुस्त्रीषु मया विधाय गुरवे देयो निवापाञ्जलिः॥[८]

---

[४] मुद्राराक्षस की शास्त्रीय समीक्षा, पृ. २८०

[५] मुद्राराक्षसम्, अङ्कः - २, पृ. ९०

[६] मुद्राराक्षसम्, अङ्कः २, पृ. ९०

[७] मुद्राराक्षसम्, अङ्कः ४, पृ. १५६

[८] मुद्राराक्षसम्, अङ्कः - ४/५, पृ. १५६

कर्मकाण्डम् अतिरिक्तं चाणक्यसदृशाः ब्राह्मणाः राज्ञः मन्त्रिणः अपि आसन्। इन्दुशेखरसदृशाः गुप्तचराः अपि आसन्। इत्थं, ब्राह्मणवर्गस्य व्यवसायाः कर्मकाण्डं पौरोहित्यं वा एवं राज्ञः मन्त्रिपदं, गुप्तचरस्य कार्यम् इत्यादयः आसन्।

क्षत्रियाणां व्यवसायः प्रायः रक्षणेन सह संबन्धितः आसीत्। ते राज्येन सह संलग्नाः आसन्। मुद्राराक्षसे चन्द्रगुप्तः एवं मलयकेतुः राजकुमारौ स्तः। राज्यप्राप्त्यर्थं रक्षणार्थं वा तौ प्रयत्नं कुरुतः। क्षत्रियाणां सैन्ये स्थानम् आसीत् तथापि पर्वतेश्वरस्य सैन्ये वैविध्यं दृष्टुं शक्नुमः। विराधगुप्तः कथयति यत् -

अस्ति तावच्छकयवनकिरातकाम्बोजपारसीकबाह्लीकप्रभृतिभिः चाणक्यमतिपरिगृहीतैः चन्द्रगुप्तपर्वतेश्वरबलैरुदधिभिरिव, प्रलयोच्चलितसलिलैः समन्तादुपरुद्धं कुसुमपुरम्।[९]

अत्र निर्देशः अस्ति तथैव किरातयवनपारसीत्यादयः अपि सैनिकाः आसन्।

अस्माकं देशः कृषिप्रधानः अस्ति। वेदकालात् एव कृषेः महत्त्वं प्रदत्तं वर्तते। ऋग्वेदस्य ऋषिः कितवस्य सन्दर्भं स्वीकृत्य सर्वान् कृषिं कर्तुं मार्गदर्शनं करोति। -

कृषिमित् कृषस्व।[१०]

अत्र कृषेः प्राचीनतायाः अपि सङ्केतः अस्ति। अस्माकं पूर्वजैः कृषेः संशोधनम् अपि कृतम् अस्ति। तदनन्तरम् अपि कृषिकर्म वर्धितम् अस्ति। मुद्राराक्षसे अपि कविः कृषिप्रक्रियायाः वर्णनं करोति। नाटकस्य प्रारम्भे सूत्रधारः स्वनाट्यकौशल्यस्य कृषिणा सह तुलनां करोति।

**चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः।**
**न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते॥**[११]

अर्थात् उर्वरायां भूमौ अज्ञातकृषिकर्मणा अपि रोपितं कृषिसम्बन्धितं बीजं वर्धते। धान्यस्य स्तम्बकरितायाः ( गुच्छरूपेण वृधेः ) कृते वपनकर्तुः कृषिनैपुण्यं नापेक्षते। अत्र शालेः वर्णनं वर्तते। तत्प्रमाणं स्वीकृत्य आचार्यः माधवः जनार्दनः रटाटेमहोदयः कथयति यत् – "नाटक में गौडदेश की प्रथाओं, रीति - रिवाजों तथा सूक्ष्मातिसूक्ष्म बातों का वर्णन होने से ऐसा प्रतीत होता है कि ये

---

[९] मुद्राराक्षसम्, अङ्कः - २, पृ. ११२

[१०] ऋग्वेदः, १०/३४/१३

[११] मुद्राराक्षसम्, अङ्कः १/३

(विशाखदत्त) गौडदेश के वासी थे। उनके प्रदेश में धान की खेती अधिक मात्रा में होती थी। इसी कारण धान की सघनता से वे पूर्णतः परिचित थे।”[१२]

अत्र तत्कालीनस्य कृषेः तु निर्देशः अस्ति तेन सह प्रदेशविशेषस्य पाकस्य अपि सन्दर्भः प्राप्यते। अनेन एव आचार्यः माधवः विशाखदतस्य निवासस्थानं गौडदेशं मनुते। अस्मिन् पद्ये तदपि उक्तम् अस्ति यत् अप्रगल्भजनेन अपि उत्तमे क्षेत्रे कृता कृषिः सफला भवति। प्रदेशविशेषस्य कृषेः उर्वरायाः अपि सङ्केतः अस्ति। इत्थम्, अस्मिन् पद्ये कविः कृषिं, वप्तारं, क्षेत्रं, धान्यं च निर्देशयति। प्राचीनसमये कृषिः महत्त्वपूर्णा आसीत्। कृष्यर्थं क्षेत्रम् अपि महत्त्वपूर्णम् अस्ति। उत्तमं क्षेत्रम् उत्तमम् उत्पादनं ददाति।

कविः शालीकृषिफलस्य निर्देशं करोति यत् -

दधत्या शालीनामवनतिमुदारे सति फले।[१३]

अर्थात् धान्यानां अत्यधिके फले सति नम्रतां दधति। अत्र सत्क्षेत्रस्य निर्देशं कृत्वा कृषेः उर्वरायाः एवम् अधिकोत्पादनस्य सङ्केतः दृश्यते। तस्मिन् काले क्षेत्राणि उर्वरानि फलप्रदानानि आसन्। अतः जनाः सहजतया अधिकम् उत्पादनं प्राप्तवन्तः आसन् तदपि सङ्केतः अस्ति।

शिल्पस्थापत्यकलानां प्रचलनम् आसीत् तदपि सूचितं भवति। विराधगुप्तस्य उक्तौ शिल्पी दारुवर्मणः उल्लेखः अस्ति।

युष्मत्प्रयुक्तेन दारुवर्मणा सूत्रधारेण चन्द्रगुप्तोऽयमिति मत्वा तस्योपरि पातनाय सज्जीकृतं यन्त्रतोरणम्।[१४]

अत्र शिल्पकारस्य व्यवसायस्य निर्देशं कृत्वा तस्य कार्यस्य अपि निर्देशः कृतः वर्तते। दारुवर्मसदृशाः शिल्पकाराः कलात्मकतोरणानां निर्माणं कुर्वन्तः आसन्। शिल्पकाराणां शिल्पविद्यायाः उपयोगः शत्रुणां विनाशाय अपि भवति स्म। अत्र दारुवर्मा राजशत्रोः विनाशाय यन्त्रतोरणस्य निर्माणं करोति।

मुद्राराक्षसे वैद्यस्य अपि उल्लेखः प्राप्यते। राक्षसः वैद्यस्य अभयदत्तस्य उल्लेखं करोति -

---

[१२] मुद्राराक्षस नाटकम् (आचार्य माधव जनार्दनरटाटे), प्राक्कथन, पृ. iii

[१३] मुद्राराक्षसम्, अङ्कः ३/८

[१४] मुद्राराक्षसम्, अङ्कः २, पृ. ११६

अथ तत्रत्येन भिषजाऽभयदत्तेन किमनुष्ठितम्?[१५]

वैद्यस्य महत् स्थानम् आसीत्। अस्मिन् नाटके वैद्यस्य कृते महान् विज्ञानराशिः शब्दप्रयोगः कृतः अस्ति।

अहो महान्विज्ञानराशिरुपरतः।[१६]

चतुर्थे अङ्के क्षपणकस्य उक्तौ वैद्यः, व्याधिः एवं कटुतायाः उल्लेखः अस्ति।

**शासनमर्हतां प्रतिपद्यध्वं मोहव्याधिवैद्यानाम्।**
**ये मुहूर्तमात्रकटुकं पश्चात्पथ्यमुपदिशन्ति॥**[१७]

वैद्यस्य राजकीयकपटविधौ अपि उपयोगः आसीत्। अस्मिन् नाटके अपि वैद्यः अभयदत्तः चन्द्रगुप्ताय विषमिश्रितम् औषधम् आनयति। विराधगुप्तः कथयति यत् -

कल्पितमनेन योगचूर्णमिश्रितमौषधं चन्द्रगुप्ताय।[१८]

वैद्यः औषधीनां नर्माणम् अपि अकरोत्। वैद्यः अभयदत्तः एव चन्द्रगुप्तस्य विनाशाय विशिष्टम् औषधं निर्मायति। वैद्यस्य अभयदत्तस्य इदं कार्यं चाणक्यस्य ध्याने आगच्छति अतः तस्मै मृत्युदण्डः अपि प्राप्यते। विराधगुप्तः कथयति यत् -

तदेवौषधं पायितो मृतश्च।[१९]

इत्थं, वैद्यः अयोग्यं कार्यं कुर्यात् तदा राजदण्डमपि अप्राप्नोत्। अत्र अभयदत्तः राजद्रोहात् मृत्युदण्डमपि अप्राप्नोत्।

पर्वतेषु औषधीनां भण्डारः आसीत्। विशिष्टेषु पर्वतेषु विशिष्टाः औषधयः आसन्। हिमालयसदृशदिव्यपर्वते सर्पस्य विषहारकाः औषधयः अपि अस्ति। मुद्राराक्षसनाटके उल्लेखः वर्तते यत् –

---

[१५] मुद्राराक्षसम्, अङ्कः २, पृ. ११८
[१६] मुद्राराक्षसम्, अङ्कः २, पृ. ११८
[१७] मुद्राराक्षसम्, अङ्कः - ४/१८, पृ. १६८
[१८] मुद्राराक्षसम्, अङ्कः २, पृ. ११८
[१९] मुद्राराक्षसम्, अङ्कः २, पृ. ११८

हिमवति दिव्यौषधयः ...।[२०]

इत्थम्, अस्मिन् नाटके औषधीनां परिचयः, प्राप्तिः, निर्माणम्, उपयोगः, उपचारः इत्यादीनां कृते अनेके सङ्केताः सन्ति।

मुद्राराक्षसे लेखनकलायाः व्यवसायस्य अपि उल्लेखः अस्ति। अस्मिन् नाटके शकटदासः इति नाम्नः कायस्थस्य उल्लेखः अस्ति।

आर्य अपरोऽप्यमात्यराक्षसस्य प्रियवयस्यः कायस्थः शकटदासो नाम।[२१]

तस्य प्रमुखं कार्यं लेखनस्य आसीत्। लेखने अभ्यासः अपि अपेक्षितः भवति। यस्य लेखनसन्दर्भे अधिकः अभ्यासः नास्ति तादृशाणां लेखनं स्पष्टं न भवति। चाणक्यः वेदपाठीनां लेखनस्य उल्लेखं करोति। -

श्रोत्रियाक्षराणि प्रयत्नलिखितान्यपि नियतमस्फुटानि भवन्ति।[२२]

वेदपाठिनां मन्त्राणाम् उच्चारणस्य अधिकः अभ्यासः भवति किन्तु तेषां लेखनस्य विशेषः अभ्यासः न भवति अतः अत्र तेषां निर्देशेन स्पष्टं कृतम् अस्ति यत् लेखनं सततं प्रयोगस्य अपेक्षां करोति। कायस्थाः लीपिकाः वा लेखनस्य व्यवसायं कुर्वन्ति अतः तेषाम् अक्षराणि सुन्दराणि भवन्ति। चाणक्य: शकटदासस्य अक्षराणां प्रशंसां करोति।

अहो दर्शनीयान्यक्षराणि।[२३]

शकटदासः कायस्थः अस्ति अतः तस्य अक्षराणि अपि सुन्दराणि सन्ति। कायस्थानां राज्यस्य कार्ये अपि स्थानम् आसीत्। तस्य अपराधः भवति तदा तस्य वधः अपि भवति एवं परिवारः बन्धनागारं प्राप्नोति। चाणक्यस्य उक्तिः अस्ति-

योऽयमपरः कायस्थः शकटदासो नाम राक्षसप्रयुक्तो नित्यमस्मच्छरीरमभिद्रोग्धुमिह प्रयतते स चाप्येनं दोषं प्रख्याप्य शूलमारोप्यतां गृहजनश्चास्य बन्धनागारं प्रवेश्यतामिति।[२४]

[२०] मुद्राराक्षसम् (डॉ. निरञ्जन मिश्रः सम्पादितः), मुद्राराक्षसम्, अङ्कः १/२२, पृ. १३८

[२१] मुद्राराक्षसम्, अङ्कः १ पृ. ८६

[२२] मुद्राराक्षसम्, अङ्कः १, पृ. ४६

[२३] मुद्राराक्षसम्, अङ्कः १, पृ. ९२

[२४] मुद्राराक्षसम्, अङ्कः १, पृ. ९४

अत्र शकटदासः शत्रुपक्षस्य कायस्थः अस्ति एवं तस्मै चाणक्यः वधाय आज्ञां ददाति। कायस्थाः लेखनकार्यं कृत्वा आजीविकां प्रातवन्तः आसन्।

मुद्राराक्षसे व्यापारवाणिज्यस्य अपि उल्लेखः अस्ति। पं. परमेश्वरदीनः पाण्डेयः मुद्राराक्षसस्य देशकालयोः स्थितिसन्दर्भे व्यापारस्य कृते लिखति यत् – "व्यापार उन्नत दशा में था"।[२५]

चन्दनदासः वणिक् वर्तते। तस्य कृते चाणक्यः कथयति यत् -

दुरात्मन् दुष्टवणिक् अनुभूयतां तर्हि नरपतिकोधः।[२६]

सः एकः आपणिकः अर्थात् व्यापारी वर्तते। सः शत्रुपक्षे अस्ति अतः तस्य कृते चाणक्यः इत्थं वदति। व्यापारी नृपाणां क्रोधस्य भोगः अपि भवितुं शक्नोति। चन्दनदासस्य कृते श्रेष्ठिन् शब्दः अपि प्रयोजितः अस्ति।

भो श्रेष्ठिन् चन्दनदासः! अपि प्राचीयन्ते संव्यवहाराणां वृद्धिलाभाः।[२७]

तस्मिन् समये व्यापारिणां कृते श्रेष्ठी शब्दः अपि प्रचलितः आसीत् तत् अद्य शेठ - इति रुपेण गुजरात्यादिसु प्रादेशिकभाषासु प्रचलितः अस्ति। तेन तस्य संमानस्य निर्देशः प्राप्यते। चाणक्यः चन्दनदासम् उपवेशनाय संमानपूर्णम् आसनम् अपि ददाति। चाणक्यः तं व्यापारस्य संदर्भे पृच्छां करोति। -

आर्यस्यप्रसादेन अखण्डिता मे वाणिज्या।[२८]

अत्र चन्दनदासस्य उत्तरम् अस्ति यत् आर्यस्य कृपया सम्यक् प्रचलति। अनेन ज्ञायते यत् व्यापारिणां व्यवसाये राज्यस्य कृपा अपि अपेक्षिता आसीत्। वणिक् वाक्पटुः अपि भवति। बुद्धिमान् अपि भवति। चाणक्यः चन्दनदासं नृपविरोधिकार्यं न करणीयम् इत्यपि कथयति। चन्दनदासः अपि व्यापारी अस्ति अतः जनानां मनांसि ज्ञातुं शक्नोति। चाणक्यः तम् आह्वयति तदा सः शङ्कां करोति यत् -

**चाणक्येनाकरुणेन सहसा शब्दायितस्यापि जनस्य।**
**निर्दोषस्यापि शङ्का किं पुनर्मम जातदोषस्य॥**[२९]

---

[२५] मुद्राराक्षसम्, (संपादक - परमेश्वरदीन पांडेय) पृ. ९

[२६] मुद्राराक्षसम्, अङ्कः १, पृ. १००

[२७] मुद्राराक्षसम्, अङ्कः १, पृ ९६

[२८] मुद्राराक्षसम्, अङ्कः १, पृ. ९६

[२९] मुद्राराक्षसम्, अङ्कः १/२१

अर्थात् चाणक्यः निर्दोषजनम् अपि आह्वयति तदा अपि भयम् उत्पादयति तर्हि अद्य तु सः अपराधं कृतवान् अस्ति। राक्षसस्य गृहजनं स्वगृहे आश्रयं दत्तवान् आसीत् अतः सः शङ्कां करोति। चन्दनदासः जनानां चित्तं जानाति अतः एव सः राक्षसस्य गृहजनम् अन्यत्र प्रेषयति। चाणक्यः तं निवेदयति यत् राक्षसस्य पत्नीं प्रददातु इति। किन्तु चन्दनदासः राक्षसस्य पत्न्याः सङ्केतं न ददाति तदा चाणक्यः क्रोधं करोति। यदि राजतन्त्रं कुपितं भवेत् तदा दण्डः अपि भवति। चाणक्यः शार्ङ्गरवं कथयति यत् अस्माकं वचनात् तस्य वणिजः निगृहणं भवेत् -

उच्यतामस्मद्वचनात्कालपाशिको दण्डपाशिकश्च। शीघ्रमयं दुष्टवणिक् निगृह्यताम्। अथवा तिष्ठतु। उच्चतां दुर्गपालो विजयपालः गृहीतगृहसारमेनं सपुत्रकलत्रं सयम्य तावद्रक्ष यावन्मया वृषलाय कथ्यते। वृषल एवास्य प्राणहरं दण्डमाज्ञापयिष्यति।[३०]

अत्र तु चाणक्यस्य योजना अस्ति किन्तु अनेन ज्ञायते यत् व्यापारी नृपविरोधी भवति तदा हानिम् अप्राप्नोत् एवं राजतन्त्रस्य कृपया लाभम् अपि अप्राप्नोत्। आपणिकाः मित्राय दण्डम् अपि स्वीकृत्य प्राणसहितं परिवारस्य अपि त्यागाय सज्जाः आसन्।

विशाखदत्तस्य काले अपि जनाः मांसभक्षणम् अकुर्वन्। मुद्राराक्षसे मांसस्य विक्रयस्य सङ्केतः अपि प्राप्यते। मलयकेतुः राक्षसस्य उपरि विश्वासं न करोति एवम् आरोपं करोति यत् शत्रोः मन्त्रिणः पदस्य प्राप्त्यर्थं मांसवत् अस्माकं विक्रयं करोसि ? -

....प्रारब्धाः प्रलयाय मांसवदहो विक्रेतुमेते वयम्।[३१]

अनेन ज्ञायते यत् तस्मिन् काले मांसस्य विक्रयः अपि आसीत्।

विशाखदत्तस्य काले जनाः सर्पादिभिः जीवैः मनोरञ्जनं कृतवन्तः आसन्। मुद्राराक्षसे सर्पोपजीवीजनानाम् अपि उल्लेखोऽस्ति। यथा अस्मिन् नाटके अहितुण्डिकः कथयति यत् अहम् अमात्यराक्षसस्य समीपं सर्पैः खेलितुम् इच्छामि अतः प्रियंवदः राक्षसं कथयति -

एष खलु सर्पोपजीवी इच्छति सर्पं दर्शयितुम्।[३२]

---

[३०] मुद्राराक्षसम्, अङ्कः १ ,पृ. १००

[३१] मुद्राराक्षसम्, अङ्कः५/२१ पृ. १९४

[३२] मुद्राराक्षसम्, अङ्कः २ ,पृ. ११०

सर्पादिभिः प्रायः सामान्यजनाः आनन्दं प्राप्तवन्तः आसन् किन्तु अमात्यसदृशाः अधिकारिणः तत् मनोरञ्नं नापि इच्छन्ति। आहितुण्डिकस्य प्रसङ्गेन ज्ञायते यत् अयं व्यवसायः तस्मिन् काले अपि आसीत्। अस्य कृते कविः लिखति -

**जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति।**
**ये मन्त्ररक्षणपरास्ते सर्पनराधिपावुपचरन्ति॥**[३३]

अर्थात् इमं व्यवसायं कुवन्तः जनाः तन्त्रस्य युक्तिं यथार्थरूपेण जानन्ति। वर्तुलाकारं महेन्द्रादि देवतायन्त्रं भूमौ लिखन्ति। ते गारुडादिमन्त्रैः रक्षणे त्राणे वा निपुणाः भवन्ति। ते सर्पम् आश्रित्य व्यवहरन्ति। ते मञ्जुषापुटेषु सर्पादीन् स्थाप्य भ्रमणं कुर्वन्तः आसन्। योग्यस्थाने सर्पाणां प्रदर्शनं कृत्वा ते आजीविकां चालितवन्तः आसन्। अत्र तथापि उक्तम् अस्ति यत् अमन्त्रकुशलः व्यालग्राही नष्टो भवति।

अमन्त्रौषधिकुशलो व्यालग्राही प्रमत्तो मतङ्गजारोही लब्धाधिकारो जितकाशी राजसेवक इत्येते त्रयोऽप्यवश्यं विनाशमनुभवन्ति।[३४]

अस्य व्यवसायस्य कृते सर्पविद्यायां कुशलता अपि आवश्यकी अस्ति। अकुशलस्य व्यालग्राहीणः नाशस्य अत्र उल्लेखः अस्ति।

मुद्राराक्षसे ज्योतिषशास्त्रस्य अपि उल्लेखः अस्ति। तस्मिन् काले सांवत्सरिकाणां व्यवसायः आसीत्। चतुर्थाङ्कस्य अन्तिमे भागे क्षपणकः सांवत्सरिकरुपेण आगच्छति। अमात्यः राक्षसः आक्रमणाय प्रस्थानदिवसस्य मुहूर्तं पृच्छति तदा क्षपणकः कथयति यत् –

**अस्ताभिमुखे सूर्ये उदिते संपूर्णमण्डले चन्द्रे।**
**गमनं बुधस्य लग्ने उदितास्तमितेच केतौ॥**[३५]

अस्मिन् अभिप्राये राक्षसः कथयति यत् तिथिः अशुद्धा अस्ति। तदा पुनः प्रमाणं ददाति यत् –

**एकगुणा भवति तिथिश्चतुर्गुणं भवति नक्षत्रम्।**
**चतुः षष्टिगुणं लग्नमेष ज्योतिषतन्त्रसिद्धान्तः॥**

---

[३३] मुद्राराक्षसम्, अङ्कः २/१

[३४] मुद्राराक्षसम्, अङ्कः २, पृ. १०४

[३५] मुद्राराक्षसम्, अङ्कः ४/१९, पृ. १७०

**लग्नं भवति सुलग्नं सौम्ये ग्रहे यद्यपि दुर्लग्नम्।**
**वहसि दीर्घां सिद्धिं चन्द्रस्य बलेन गच्छन्॥**[३६]

अत्र राक्षसः क्षपणकस्य मतस्य विमर्शम् अपि इच्छति। तस्य प्रसन्नताम् अपि इच्छति। अनेन ज्ञायते यत् तस्मिन् काले सांवत्सरिकानां व्यवसायः अपि प्रचलितः आसीत्।

केचन जनाः राजकुलस्य सेवकाः अपि आसन्। मुद्राराक्षसस्य द्वितीयाङ्कस्य आकाशभाषितेन ज्ञायते यत् एकः जनः सर्पेण क्रीडितुम् इच्छति तदा आहितुण्डकः तस्य व्यवसायं पृच्छति तदा सः उत्तरं ददाति - राजकुलसेवक इति।[३७]

अत्र राजकुलस्य सेवायाः तुलना सर्पक्रीडया सह कृता अस्ति। तेन ज्ञायते यत् राज्यस्य सेवा कठिना आसीत्। राज्यस्य सेवायां संयमः अपेक्षितः भवति। कश्चिदपि अधिकारी पदं प्राप्य सत्तां वा लब्ध्वा गर्वं कुर्यात् तदा तस्य हानिः अवश्यम् आसीत्। कविः लिखति -

अमन्त्रौषधिकुशलो व्यालग्राही प्रमत्तो मतङ्गजारोही लब्धाधिकारो जितकाशी राजसेवक इत्येते त्रयोऽप्यवश्यं विनाशमनुभवन्ति।[३८]

अधिकारप्राप्तः इति विचिन्त्य गर्विष्ठः राजसेवकः विनष्टः भवति। -

विशाखदत्तस्य काले कवयः काव्यरचनां कृत्वा जनानां मनोरञ्जनं कुर्वन्तः आसन्। अमात्यराक्षसः आहितुण्डिकस्य सर्पक्रीडां द्रष्टुं नेच्छति तदा सः राक्षसं प्रति सन्देशं कथयति यत् अहं केवलं सर्पोपजीवी एव नास्मि अपितु कविः अपि अस्मि। -

एष खल्वामात्यं विज्ञापयति न केवलमहं सर्पोपजीवी प्राकृतकविः खल्वहम्।[३९]

अमात्यः राक्षसः आहितुण्डिकं मेलितुं नेच्छति किन्तु कविं प्रति आदरं प्रकटं करोति। अमात्यराक्षसस्य अत्र प्रयोजनं भिन्नम् अस्ति तदपि तस्मिन् कालस्य व्यवसायस्य आदरभावस्य सङ्केतम् अवश्यं प्राप्नोति। एकं पद्यं पठित्वा सः तस्य प्रसंशाम् अपि करोति।

---

[३६] मुद्राराक्षसम्, अङ्कः ४-२०,२१, पृ. १७०
[३७] मुद्राराक्षसम्, अङ्कः २, पृ. १०४
[३८] मुद्राराक्षसम्, अङ्कः २, पृ. १०४
[३९] मुद्राराक्षसम्, अङ्कः २, पृ. ११०

प्रवेशयैनं सुकविरेषः। श्रोतव्यमस्मात्सुभाषितम्।[४०]

अमात्यसदृशाः प्रतिष्ठितजनाः काव्यानाम् आस्वादं कुर्वन्तः आसन्। अत्रापि सुभाषितस्य श्रवणस्य निर्देशः अस्ति।

मुद्राराक्षसे केचन निम्नस्तरस्य व्यवसायानाम् अपि निर्देशः अस्ति। मुद्राराक्षसे व्याधानाम् उल्लेखः अस्ति। चन्दनदासः वधस्तम्भं प्रति गच्छति तदा सः आत्मानं तृणाहारिणं हरिणं कथयित्वा व्याधस्य उल्लेखं करोति –

**मुक्त्वा आमिषाणि मरणभयेन तृणैर्जीवन्तम्।**
**व्याधानां मुग्धहरिणं हन्तुं को नाम निर्बन्धः॥**[४१]

व्यधानां जीविका मृगया आसीत्। तेषां व्यवसायः हरिणादीनां आखेटम् आसीत्। राजाज्ञया चाण्डालाः मृत्युदण्डस्य कार्यम् अकुर्वन्। यथा सप्तमे अङ्के चाण्डालौ चन्दनदासं वधस्थानं प्रति आनयति। तत्र चन्दनदासं प्रति उक्तिः अस्ति।

आर्य, चन्दनदास निखातः शूलस्तत्सज्जो भव।[४२]

अत्र चाण्डालः चन्दनदासं वधाय निर्देशं करोति।

मुद्राराक्षसे मणिकाराणामपि व्यवसायः आसीत्। चन्दनदासः मणिकाराणां श्रेष्ठी अस्ति। चाणक्यः कथयति यत् -

मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।[४३]

मणिकारः चन्दनदासः अमात्येन चाणक्येन आहूतः तदा भयम् अनुभवति। कथनस्य भावः अस्ति यत् तस्मिन् काले अपि सुवर्णरत्नमणीत्यादीनां व्यापारः व्यवसायः वा आसीत्।

विशाखदत्तस्य काले व्यवसायस्य अनुरुपानि नामानि अपि दृश्यन्ते। आहितुण्डिकः सर्पोपजीवीरुपेण आगच्छति। तस्य नाम अपि व्यवसायानुसारं जीर्णविषः अस्ति।

[४०] मुद्राराक्षसम्, अङ्कः २, पृ. ११२
[४१] मुद्राराक्षसम्, अङ्कः ७, पृ. २१८
[४२] मुद्राराक्षसम्, अङ्कः ७, पृ. २२२
[४३] मुद्राराक्षसम्, अङ्कः १, पृ. ९४

अहं खलु आहितुण्डिको जीर्णविषो नाम।[४४]

वणिक् जनानां नामानि दासपदयुक्तानि दृश्यन्ते। चन्दनदासः वणिक् अस्ति। विराधगुप्तः गुप्तचरः अस्ति। अस्मिन् नाटके सर्वत्र अयं नियमः न दृश्यते।

इत्थं, मुद्राराक्षसे विविधानां व्यवसायानां सङ्केताः सन्ति। एतेषां व्यवसायकाराणाम् उपरि राज्यस्य नियंत्रणम् आसीत्। राजतन्त्रे तेषां योगदानम् अपि आसीत्। समाजे तेषां विशेषं प्रदानम् आसीत्।

## सन्दर्भग्रन्थाः


१. मुद्राराक्षसम्, सम्पादकः - डॉ. विजयः पण्ड्या, पार्श्व पब्लिकेशन, अहमदाबाद , १९९७

२. मुद्राराक्षसम्, सम्पादकः - डॉ. निरञ्जन मिश्रः, हंसा प्रकाशन, जयपुर, २०१५

३. मुद्राराक्षसम्, सम्पादकः - परमेश्वरदीनः पाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२

४. मुद्राराक्षसनाटकम्, व्याख्याकार - आचार्य माधव जनार्दन रटाटे, भारतीय विद्या प्रकाशन, दिल्ली, २०१७

५. ऋग्वेदः, स्वाध्याय मंडल, पारडी, गुजरात, षष्ठ संस्करणम्, १९९७

६. मुद्राराक्षस की शास्त्रीय समीक्षा, सम्पादिका - डॉ. दिव्या मिश्रा, विद्यानिधि प्रकाशन, दिल्ली, २०१२


~~~~~*~~~~~*~~~~~*~~~~~

[४४] मुद्राराक्षसम्, अङ्कः २, पृ. ११०
~~~~~

# चातुर्वर्ण्यं मया सृष्टम्

**- डॉ. पङ्कजकुमार एस्. रावल[१]**

वर्णाश्रमव्यवस्था सनातनधर्मस्यैका अनन्या अद्वितीया परम्परया विद्यते। एषा व्यवस्था अत एव विशिष्टा विलक्षणा अनन्या एवम् अद्वितीया वर्तते कारणं मानवेन कल्पिता सृष्टा विचारिता आचारे च स्थापिता नास्ति सनातनसंस्कृतौ एकमेव शास्त्रं विद्यते तस्योद्घोषकः एक एव देवो विद्यते यस्य मुखपद्मात् विनिःसृता इयं परम्परा विद्यते तेनैव कारणेन गीतामाहात्म्ये प्रोक्तं यत् -

**एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव।**
**एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा।।**

(गीतामाहात्म्यम्)

कलियुगस्यैतत् कार्यं नास्ति पुनश्च मानवेन कृतं स्यात् तथापि नास्ति। अत एव श्रीमद्भागवद्गीतायाः मूलभूतः सिद्धान्तः भगवता एव समाजव्यवस्थायै आविष्कृतः।

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**
**तस्य कर्तारमपि मां विद्ध्य कर्तारमव्ययम्।।**

(गीता ४/१३)

जगद्गुरुश्रीमद्वल्लभाचार्येण प्रमाणभूताः चत्वारः ग्रन्थाः प्रोक्तास्सन्ति। अध्यात्मजगति व्यवहारजगति संस्कृतजगति एतेषां चतुर्णां ग्रन्थानां सन्दर्भत्वेनानिवार्यता निगदिता विद्यते। यथा -

**वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि।**
**समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्।।**

(तत्त्वार्थदीपनिबन्धः)

अत्र श्रीकृष्णवाक्यानि नाम श्रीमद्भागवद्गीता। अत्र भगवता वर्णाश्रमव्यवस्था स्वयमेव कृता विद्यते तत् सत्यं किन्तु प्रवर्तमानकाले तस्य पूर्णतया पालनं न भवति तदपि सत्यम्। एषा परम्परा जन्माधारेण नासीत् अपितु गुणकर्मविभागशः इति स्पष्टं प्रोक्तं विद्यते। श्रीमद्भागवतमहापुराणे दशमस्कन्धे पूर्वार्धे यदा कृष्णजन्मनि गोकुले श्रीगर्गाचार्यः श्रीकृष्णस्य परमात्मनः नामकरणसंस्कार

---

[१] आसि. प्रोफेसर, श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालितमहाविद्यालयः, वेरावलम्।

निमित्तमागच्छति तदा आचार्योऽपि वदति अस्य तु बहूनि नामानि सन्ति तथा अयं युगषुरुषो भविष्यति तत्रावसरेऽपि गुणकर्मशब्दयोः प्रयोगः भवति। यथा -

**प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः।**
**वासुदेव इति श्रीमानभिज्ञाः सम्प्रचक्षते।।**

**बहूनि सन्ति नामानि रूपाणि च सुतस्य ते।**
**गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः।।**

(श्रीमद्भागवतमहापुराणम् १०/८/१४-१५)

अर्थात् वर्तमानसन्दर्भे वर्णाश्रमव्यवस्था जनेभ्यः मान्या नास्ति कारणं ते जन्मानुसारं विचारयन्ति शास्त्रे च गुणकर्मानुसारं प्रोक्ता विद्यते। किन्तु अत्र एतदर्थमेवायं विषयः चितो विद्यते। यदा महाभारतकाले भगवता साक्षात् स्वयं स्वोपस्थितौ स्वमुखादेतद् वाक्यं समुच्चारितं तदापि अस्य सिद्धान्तस्य पूर्णतया पालनं न जातं विद्यते। अस्याः परम्परायाः अस्याः व्यवस्थायाः पूर्णरूपेण पालनं न जातं विद्यते। एकेनोदाहरणेन द्रष्टव्यं चेत् महाभारतकाले कौरवपक्षात् गुरुद्रोणाचार्यः युद्धं कृतवान् यः जन्मना विप्रः गुणकर्मविभागशः सः क्षत्रियः तथैव तस्य पुत्रः अश्वत्थामा सोऽपि युद्धं कृतवान् यदा पाण्डवानां पुत्राः तेन व्यापादिताः तदा तस्य वधाय भीमार्जुनाभ्यां प्रतीज्ञा कृताऽऽसीत् किन्तु द्रोपद्या प्रोक्तं यत् -

**उवाच चाहसन्त्यस्य बन्धनानयनं सती।**
**मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः।।**

**सरहस्यो धनुर्वेदः सविसर्गोपसंयमः।**
**अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात्।।**

(श्रीमद्भागवतपुराणम् १/७/४३-४४)

इत्थं युद्धावसरेऽपि मृतपुत्रे सति सती तं मारणाद्वारयति यत् द्विजोऽयं गुरुपुत्रोऽयम् इति।

अर्थात् महाभारतकालेऽपि गुणकर्मविभागशः किमपि नासीत् किन्तु अस्माभिः तज्ज्ञेयं भवति भगवता ये विविधाः धर्माः विविधेभ्यः प्रोक्ताः विद्यन्ते ते च के ? तर्हि ते सन्ति यथा - सामान्यधर्माः, विशिष्टधर्माः, विशिष्टधर्मेषु समावेशः भवति वर्णधर्माणाम्, आश्रमधर्माणाम् तथैव राजधर्माः, स्त्रीधर्माः, दानधर्माः तत्र वर्णधर्मेषु चतुर्ण्णां वर्णानां धर्माः समागच्छन्ति ये खलु भवन्ति गुणकर्मानुसारं तथैव आश्रमधर्मेषु समावेशः भवति चतुर्ण्णामाश्रमाणां यत्र ब्रह्मचर्याश्रमः गृहस्थाश्रमः वानप्रस्थाश्रमः सन्यास्याश्रमश्च।

अत्र प्रतिपाद्योऽयं विषयः वर्तते 'चातुर्वर्ण्यं मया सृष्टम्' तर्हि ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः चत्वारः वर्णाः सन्ति। या वर्णव्यवस्था वेदकालादेवासीत्। यथा -

**ब्राह्मणोऽस्य मुखमासीद् बाहु राजन्यः.....**

(शु. यजु.रु २/१३)

अनया परम्परया अस्माभिः चतुर्णां वर्णानां धर्माः अवलोक्यन्ते चेत् तथा विचारणीयं यत् तस्य तस्य धर्मस्य वा तेषां तेषां धर्माणां च पालनं करोति तदनुगुणं यः जीवति स तस्मिन् तस्मिन् वर्गे समागमिष्यतीति। यथा विशेषतः मनुस्मृतौ प्रोक्तं यत् "वर्णानां ब्राह्मणो गुरुः" किन्तु केषां धर्माणां परिपालनेन ब्राह्मणत्वं वर्णत्वं वर्णविशेषत्वं च परिगण्यते चेत्

**ब्राह्मणधर्माः -**

**शान्तः साधुः सुशीलत्वं सर्वभूतहिते रतः।**
**क्रोधकर्तुं न जानाति एतद् ब्राह्मणलक्षणम्।।**

(स्मृतिसन्दर्भः)

ब्राह्मणेन एतेषां धर्माणां गुणानां समाश्रयः कर्तव्यः भवति नान्यथा एतेषां गुणानां यत्र निदर्शनं भवति स ब्राह्मणः। केचन वदन्ति -

**जन्मना जायते शूद्रः संस्कारात् द्विज उच्यते।**
**वेदैः विप्रत्वमायाति त्रिभिः श्रोत्रिय उच्यते।।**

(मनुस्मृतिः)

किन्तु तत्र प्रथमपङ्क्तौ तथा नास्ति "जन्मना जायते जन्तुः" जन्मना सर्वे समानाः किन्तु अग्रे संस्काराः तस्योपरि भवन्ति वेदाभ्यासः भवति चेत् तस्यां कोटौ सः आगच्छति। ब्राह्मणस्य लक्षणमस्ति "ब्रह्म जानाति स ब्राह्मणः" ब्रह्मणि चरति विचरति विचारयति स ब्रह्मचारी तथैव ब्राह्मणस्य ब्राह्मणत्वं कदा सिद्ध्यति वा कीदृशः ब्राह्मणः समाजं सामाजिकान् च तारयितुं प्रभवति तदर्थं वसिष्ठस्मृतौ प्रोक्तं विद्यते। यथा -

**ये शान्तदान्ताः श्रूतिपूर्णकर्णाः जितेन्द्रियाः प्राणिवधान्निवृत्ताः।**
**प्रतिग्रहे सङ्कुचिताग्रहस्ताः ते ब्राह्मणास्तारयितुं समर्थाः।।**

(वसिष्ठस्मृतिः)

यस्य ग्रन्थाश्रयेण अस्माभिः एषा चर्चा क्रियते तदनुसारं भगवता गीतायां ब्राह्मणधर्माः इत्थं प्रोक्ताः सन्ति ते च यथा -

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमस्तिक्यं ब्रह्मकर्म स्वभावजम्।।**

(गीता १८/४२)

विषयव्यासभयाद् विवेचनं न क्रियते कः शमः? कः दमः? किं तपः? किं शौचम् ? का क्षान्तिः?......

श्रीमद्भागवतमहापुराणेऽपि तत्समानमेव विप्रलक्षणम् -

**शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम्।**
**ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम्।।**

(श्रीमद्भागवतपुराणम् ७/११/२१)

एतानि लक्षणानि यत्र जीवन्ति यस्मिन् जीवन्ति स ब्राह्मणः। समासतो विप्रस्य यानि कर्माणि प्रोक्तानि सन्ति। १) अध्ययनम् २) अध्यापनम् ३) दानम् ४) प्रतिग्रहः ५) यज्ञः करणीयः ६) यज्ञः कारणीयः।

इत्थं ब्राह्मणस्य लक्षणानि कर्माणि गुणाश्च प्रोक्ताः सन्ति।

वर्णव्यवस्थायां विप्रस्य जागरुकता महती आवश्यकी विद्यते। अतः वर्तमानकाले विप्रत्व सम्पादनाभिलक्षणा निर्दिष्टाः गुणाः सेवनीयाः।

**क्षत्रियधर्माः -**

वर्णव्यवस्थायां द्वितीयः वर्णः क्षत्रियः यः खलु बाहु राजन्यः अर्थात् यथा ब्राह्मणाः भगवतः मुखाद् समायताः तथैव क्षत्रियाः बाह्वोः विनिर्गताः। तेषां क्षत्रियाणां केचन नियमाः धर्माः गुणाः कर्माणि च शास्त्रे यथा -

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**
**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।**

(गीता १८/४३)

श्लोके निर्दिष्टाः गुणाः क्षत्रियेषु भवितव्याः तथा नास्ति किन्तु श्लोके निर्दिष्टाः ये धर्माः सन्ति तादृशः एव यस्य स्वभावः विद्यते स तु क्षत्रियः वर्तते। एतत् कर्म स्वभावजं स्वभावेन स्वभावात् सहजं जायते स क्षत्रियः क्षत्रियस्य धर्माः नियमाः तथैव भागवतेऽपि प्रोक्ताः सन्ति। यथा-

**शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा।**
**ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम्।।**

(श्रीमद्भागवतपुराणम् ७/११/२२)

क्षत्रियस्य इमे निर्दिष्टाः धर्माः नियमाः गुणाः सन्ति किन्तु प्रधानतया गुणः विद्यते गोब्राह्मणप्रतिपालः। गवां रक्षणं विप्ररक्षणं तथा सर्वे स्व-स्वधर्मपरिपालनं कुर्वन्तः सन्ति वा न तद् ध्यानेन परिपालनं भवेत् तादृशः व्यवहारः।

**वैश्यधर्माः -**

तृतीयोऽयं वर्णः यः खलु समुत्पन्नः उरुतः जघनतः गीतायां भगवता वैश्यवर्णस्य गुणाः इमे प्रोक्ताः सन्ति कर्माणि च इमानि सन्ति यथा -

**कृषि गौरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजम्।**

(गीता १८/४४)

ब्राह्मणेन ऋषिकर्म वैश्येन कृषिकर्म समाचरणीयं भवति। पशुपालनं व्यापारः तथा अर्थोपार्जनाय एव यस्य दृष्टिः स वैश्यः। भागवतेऽपि प्रोक्तं यथा -

**देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम्।**
**आस्तिक्यमुद्यमो नित्यं नैपुणं वैश्यलक्षणम्।।**

(श्रीमद्भागवतपुराणम् ७/११/२३)

**शूद्रधर्माः -**

भगवतः पद्भ्यां वर्णविशेषोऽयं समुत्पन्नः। भगवता तस्य गुणः दर्शितः सेवा अस्य प्रधानं कर्म परिचर्या मुख्यो धर्मः शुश्रूषा इति।

गीतायां भगवता स्पष्टमुदीरितं यत् -

**परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्।**

(गीता १८/४४)

स्वभावात् यस्मै सेवा रोचते सः शूद्रः। भागवतेऽपि देवर्षि नारदः वर्णाश्रमधर्माणां निरूपणं करोति युधिष्ठिराग्रे तत्र देवर्षि नारदः भणति यथा -

**शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया।**
**अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम्।।**

(श्रीमद्भागवतपुराणम् ७/११/२४)

एवं प्रकारेण भगवता श्रीकृष्णेन महाभारतस्य युद्धकालेऽपि वर्णव्यवस्थायाः समुपदेशः प्रदत्तः विद्यते तेन ज्ञानं भवति यत् वर्णव्यवस्थाया कियती आवश्यकी विद्यते येन युद्धावसरे प्रसङ्गोऽयं निर्गतः।

यथा अस्माभिः भगवता सृष्टस्य जगतः उपभोगः पालनं रक्षणं वा स्वीकारः क्रियते तथैव गुणकर्मानुसारं तर्हि गुणकर्मानुसारं किन्तु 'चातुर्वर्ण्यं मया सृष्टम्' यदुदीरितम् तत् परिपालनीयं वा स्वमूल्याङ्कनेन चिन्तनीयमिदं यत् केषां धर्माणां ? कस्य वर्णस्य नियमानां मया जीवने परिपालनं क्रियते? तद् विचिन्त्य भगवतः गुणकर्मानुसारं वर्णव्यवस्थायाम् अहं कुत्रास्मि ? तेन समाजे स्वस्थानं निर्धारणीयम्।

भगवता कतृत्वेन एतद् कृतमपि तथा चान्ते प्रोक्तं विध्यकर्तारमव्ययम्।

**"इति शम्"**

**सन्दर्भग्रन्थाः -**

१) महाभारतम्

२) श्रीमद्भगवद्गीता

३) श्रीमद्भागवतमहापुराणम्

४) तत्त्वार्थदीपनिबन्धः

५) गीतामाहात्म्यम्

६) शुक्लयजुर्वेदः

७) स्मृतिसन्दर्भः

८) वसिष्ठस्मृतिः

९) मनुस्मृतिः

~~~~~*~~~~~*~~~~~*~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# जीवनाचारविचिकित्सानामार्षोपायाः

- डॉ. उमामहेश्वरी बी.[१]

अस्माकं भारतीयज्ञानपरम्परा अत्यन्तविपुला विशाला अनन्ता च। अनादिकालत एव शिष्टाचारपरम्परायाः पौराः भारतीया इत्यस्ति लोकोक्तिः। तस्यां परम्परायां प्रबोधितसूक्ष्मतत्त्वानाम् आलोडनं कृत्वा 'रामादिवद्वर्तितव्यं न रावणादिवदि'ति सततं प्रेरणादायकवचांसि उद्बोधितानि। तानि प्रेरकवाक्यानि सुहृद्वाक्यानि सत्यवाक्यानि मनसि निधाय व्यवहारे लौकिकजीवने आचरणेन अहं मम इति स्वार्थ-परिच्छिन्नभावनातः विभज्य वसुधैवकुटुम्बकमिति एकत्वभावना प्रतिपद्यते। तेन सर्वसमस्याः स्वयमेव निराकरिष्यन्ते सर्वत्र शान्तिः प्रसार्यते। तर्हि सर्वत्र उपनिषत्सु कथं ते उपायाः प्रतिपादिता इति विचारयामः।

**"आचारहीनं न पुनन्ति वेदाः"**.[२] **'आचारः परमो धर्मः'**.[३] इत्याचारस्य प्रामुख्यम् अनादिकालादद्यापि द्रष्टुं शक्यते। तत्र उपनिषत्सु आचारव्यवहारविषये भूतानां विषये भोगादृष्टादीनां विषये स्पष्टोपदेशः कृतो वर्तते। जीवनं कथं यापनीयं, लक्ष्याः के स्युः? तत्सिद्धिसाधनानि कानि? इत्यादिविषयेषु उपनिषदः अस्मान् बोधयन्ति शिक्षयन्ति च।

दृश्यमानदृष्टान्तैः अदृश्यमानविषयान् तत्त्वानि प्रबोध्य जीवनं सुखमयकरणाय मार्गं प्रशस्तीकुर्वन्ति उपनिषदः। वेदानामन्तिमभागत्वेन प्रतिपन्नाः एताः मानवजीवनस्य अन्तिमलक्ष्यैकनिष्ठस्थिरीकरणाय आत्यन्तिकतया सर्वदुःखनिवारणाय मानससरोवरे नीरक्षीरविवेकहंसवद् भारतीयज्ञानपरम्परायां राराजमानाः अद्यापि सर्वैः वास्तविकरूपेणाद्रियमानाः दृश्यन्ते। मातरं विना पुत्रस्य गतिर्यथा नास्ति, गुरुं विना आत्मज्ञानं नास्ति। तथैवोपनिषदः विना आत्मज्ञानं नास्ति।

दृश्यमानसंसारे जरायुजाण्डजश्वेदजोद्भिज्जादिशरीरवन्तः सर्वे प्राणिनः केनचित् लौकिकाऽलौकिककारणेन द्वैविध्यवशात् वा चिन्ताक्रान्ताः सन्तः क्वचिद्विचारे मग्ना दृश्यन्ते। यथा- पिता पुत्रस्य विवाहाय चिन्तयति, विवाहात्परं तस्य पुत्रो न जातः इति विचारयति, जाते पुत्रे काणो

---

[१] सहायिकाचार्या, दर्शनविभागः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्।

[२] वसिष्ठस्मृतिः- ६/३ एवं देवीभागवतम् – ११/२/१।

[३] मनुस्मृतिः १.१०८।

वा मूकश्चेत्पुनः असन्तुष्टो भवति, अथवा सम्यग्विद्यार्जनं न करोति तर्हि विचिन्तयति, सम्यग्विद्यामर्जयति तथापि प्रथमस्थानं नास्तीति व्यथां प्राप्नोति, प्रथमस्थाने प्राप्ते उद्योगः नास्तीति खिन्नो भवति, उद्योगप्राप्ते सति तस्य विवाहो न जात इति क्लिष्णाति, विवाहे सति पुत्रवधूविषये विचारयति, पुनस्तेषां पुत्राणां पौत्राणामेवं रूपेण सर्वदा सामान्यसमस्याभिः क्वचिद्विशिष्टसमस्याभिर्वा विवेकिनोऽपि क्वचित् विचारयन्तः दरीदृश्यन्ते। **"न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्"**[४] इति गीता तत्र प्रमाणम्। एवं विचारं कृत्वापि तस्य परिवर्तनं ते कर्तुमसमर्थाः। अत व्यर्थविचारान् त्यक्त्वा सुकर्माणि करणीयाणीति ईशावास्योपनिषदि – **'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'**[५] इति मन्त्रेण उपदिष्टमस्ति। अर्थात् इह अग्निहोत्रादीनि कर्माणि निर्वहन्नेव शतसङ्ख्याकाः समाः जीवितुमिच्छेत् इति विधितं वर्तते। एवं निःसङ्गभावेन कर्माणि आचरिते सति शुभाशुभकर्मभ्यां न लिप्यते। तेन सर्वप्राणिभिः कामितं दुःखं मे कदापि मा भूयादिति यत् तस्य सिद्धिर्भवति।

मातापितरौ चिन्तयतः यत् मे पुत्रः सदा आवाभ्यां सहैव वसेत्, सोऽस्मान् परित्यज्य कदापि कुत्रापि न व्रजेत्, आवाभ्यां न द्विषेत्, स्नेहेन नः परिचर्यां कुर्यात्, स्वमित्राणां पुरतः अवहेलनं न कुर्यात्, मातापित्रोः मनसः असौविध्ययुक्तं कर्म कदापि नाचरेत्, सदा भक्तिश्रद्धावान् भवेत् इत्यनेकशः परिचिन्तयतः। परन्तु पुत्रेषु ईदृशभावनाः स्वभावाः आचाराश्च कथमुत्पद्यन्ते? **'यद्बीजं वपते येन तत्फलं लभते ध्रुवम्'** यादृशं बीजं क्षितौ निक्षिप्यते तदेव कार्यम् अङ्कुररूपेणोत्पद्यमान् वृक्षो भूत्वा फलं ददाति। आम्रफलमपेक्षितं तर्हि कारवेल्लबीजवपनेन तदशक्यमिति सर्वैः सुविज्ञैः अवगन्तव्यम्। अथ च स्वयम् आचर्य जीवनं सार्थकं कर्तव्यम्। तद्दृष्ट्वा पुत्राः शिष्या अपि शिक्षेरन्। तदपि आचरणं कर्मण्यनासक्तो भूत्वा कुर्यात्। **"कर्मण्येवाधिकारस्ते'** [६] इति गीतोपनिषदः वचनात्।

आचारव्यवहारविषये स्नातकोत्तरदीक्षासमये **गुरुः शिष्याननुदिशति** तत्सर्वैः सर्वदा स्मर्तव्यम् – **"सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान् न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। श्रद्धया देयम्। अश्रद्धया अदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।**[७] इति। एवं विधोपदेशेन शिष्यः स्वकर्तव्यं स्वजीवनशैलीं आचारव्यवहारविषयञ्च ज्ञात्वा लौकिकसमस्याभ्यः मुक्तो भवितुमर्हति।

---

[४] श्रीमद्भगवद्गीता अध्यायः-३, श्लोकः-५।

[५] ईशावास्योपनिषत् – २।

[६] श्रीमद्भगवद्गीता – २.४७।

[७] तैत्तिरीयोपनिषद् – शिक्षावल्ली-प्रश्नः-१, मं-१९-२२।

**लालसाविषये** प्रतिपादिमस्ति यथा - **"मा गृधः कस्यस्विद्धनम्"**[८], अर्थात् स्वस्य वा परस्य धनविषयाकाङ्क्षां मा कुरु। **शोकमोहविषये** प्रतिपादितम्-

**"यस्तु सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥**[९]

यस्य सर्वाणि भूतानि आत्मैवाभूत् तस्य पुरुषस्य को मोहः, कः शोकः। शोकश्च मोहश्च कामकर्मबीजम्। यत्रैकत्वं सिद्धं तत्र कामः क्व (न भवतीति तात्पर्यम्)। **ईर्ष्याघृणाविषये** प्रोक्तमस्ति-

**'यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते'॥**[१०]

यः पुरुषः सर्वभूतानि आत्मन्येव पश्यति आत्मानं च सर्वभूतेषु चानुपश्यति सः विजिगुप्सां घृणां न करोति।

जीवने स्वस्य जिह्वा स्वाधीने भवति तर्हि सर्वोऽपि लोकः स्वाधीने भवति। अतः " **जिह्वा मे मधुमत्तमा"**[११] मे जिह्वा मधुमती-अतिशयेन मधुरभाषिणी स्यात् इति प्रार्थना वर्तते। तेन अनवसरविवादेभ्यः दूरतां प्राप्नुमः। एवमेव प्रातः सर्वप्रथमं पृथिव्याः वन्दनं दैनन्दिनचर्या भवेत् तत्र निर्दिष्टो वर्तते मृत्तिकोपनिषदि यथा –

**'भूमिर्धेनुर्धरणी लोकधारणी। मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम्। मृत्तिके ब्रह्मदत्तासि। काश्यपेनाभिमन्त्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्।**[१२] अर्थात् 'हे धरणि! मया यत् दुष्कृतं कृतं पापमाचरितं तत् नाशय। हे भूमि! त्वं ब्रह्मणा दत्तासि, कश्यपर्षिणा अभिमन्त्रिताऽसि। हे लोकधारिणि! त्वयि सर्वं प्रतिष्ठितमस्ति अतः मे पुष्टिं देहि' इति प्रातरुत्थाय सर्वशक्तिमय्यां धरण्यां पादक्षेपणात्पूर्वमेवं प्रार्थनायां कृतायां सत्यां सा लोकपावनी धरणी अस्मान् अनर्थेभ्यः सततं रक्षति।

जीवनं प्रतिनित्यं दैवस्मरणेन यापनीयम्, तेन मनोबुद्धी च पवित्रे भवतः। तर्हि तदर्थं प्रार्थनामन्त्रो यथा - **"यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तत्र इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः"।** तथैव **ज्येष्ठवन्दनेन तेषां सङ्गत्याः** फलमेवमुट्टङ्कितमस्ति – **"चरणं पवित्रं विततं पुराणं**

---

[८] ईशावास्योपनिषद्- मन्त्रः-१।

[९] ईशावास्योपनिषद् – मं-७।

[१०] ईशावास्योपनिषद् – मं-६।

[११] तैत्तिरीयोपनिषद्- १.७।

[१२] मृत्तिकासूक्तम् – ३-१। महानारायणोपनिषत्।

**येन पूतं तरति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूता अतिपाप्मानम् अशति तरेम"॥** अर्थात् येषामाचरणं पवित्रं भवति तेषां सेवनेन वयमपि तरेमेति।

**सत्यकथनफलम्** – कलियुगे तावत्सर्वैः स्वात्मनः लौकिकलाभाय सत्यमिवासत्यमुपयुज्यमानाः अहं सत्यमेव वच्मीति वदन्तः इतोपि पापं प्राप्नुवन्ति। तर्हि सत्यकथनेन किं भवतीति चेत्, **"सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः"**[१३] ॥ अर्थात् सत्यवानेव जयति सत्येन अनृतं, सत्यवादिना अनृतवाद्यभिभूयते। सर्वदा सत्यस्यैव जयो भवति। सत्येन स्वस्य कीर्तिरपि विश्वे जेगीयते सत्यहरिश्चन्द्रचरित्रवत्। तथा सर्वदा श्रोतृभ्यां भद्रवाक्यान्येव श्रोतव्याणि भद्रमेव द्रष्टव्यम् इति प्रतिपादितं यथा – **'भद्रं कर्णेभिः श्रृणुयाम देवाः, भद्रं पश्ये माक्षभिर्यजत्राः"**[१४]। सर्वेषामपि जीवानां जीवनपोषकस्य अन्नस्य महिमा सर्वप्राणिभिः ज्ञातव्या।

**अन्नमन्त्राः** - तस्य विषये तैत्तिरीयोपनिषदि प्रतिपादितमस्ति – **'अन्नं ब्रह्मेति व्यजानात्'**[१५]। अन्नं ब्रह्मेति जानीहि। **अन्नाद्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं न निन्द्यात्, तद्व्रतम्**। अन्नस्य निन्दां तिरस्कारं च कदापि न कुर्यात्। तत् व्रतमस्ति। **'अन्नं न परिचक्षीत'** अर्थात् अन्नस्य परीक्षणं कदापि न कुर्यात्। **'अन्नं बहु कुर्वीत'** अर्थात् अन्नम् अधिकं सम्पादयेत्। **अद्यतेऽत्ति च भूतानि**। अन्नं भुज्यमपि भोक्तापि च भवति। **अन्नवान् अन्नादो भवति** अर्थात् यो अन्नवान् भवति स एव अन्नस्य स्वामी एवम् अन्नभोक्ता अपि भवति। तेन प्रजया पशुभिः ब्रह्मवर्चसेन च महान् भवति, महतीं कीर्तिं च विन्दति।[१६] इति।

**अतिथिसत्कारमहिमा** – अतिथिसत्कारोऽस्माकं धर्मः **'अतिथिदेवो भव'**[१७] इति श्रुतिवचनात्। **'वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्'**[१८]। अर्थात् अतिथिरूपेण साक्षात् अग्निरेव गृहान् दहन्निव प्रविशति। तस्य दाहप्रशमनाय अर्घ्य-पाद्य-आसनादिद्वारा तस्य शान्तिं परिचर्यां च कुर्यात्।

**'आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्।**
**एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे'** ॥[१९] इति कथोपनिषदि।

---

[१३] मुण्डकोपनिषद् – ३-१-६।

[१४] गणपत्यथर्वशीर्षोपनिषत् शान्तिमन्त्रः।

[१५] तैत्तिरीयोपनिषद्- ब्रह्मानन्दवल्ली २-२

[१६] तैत्तिरीयोपनिषद्-३-१।

[१७] तैत्तिरीयोपनिषद् – १.२०।

[१८] कठोपनिषद् – १.१.७।

[१९] कठोपनिषद्-८।

अर्थात् यस्य गृहे अतिथिः भोजनं विना तिष्ठति तस्य गृहे **आशा-** अनिर्ज्ञातप्राप्येष्टार्थप्रार्थना, निर्ज्ञातप्राप्यार्थप्रतीक्षणं **प्रतीक्षा, सत्सङ्गफलम् प्रियवाक्फलम् इष्टापूर्तफलम्** (इष्टं यागादि पूर्तं वाप्यारामादिजन्यम्) **पुत्रान् पशूंश्च** सर्वं विनश्यतीति। अतः अतिथिः यः कोऽपि वा भवतु सः पूज्य इति मत्वा सर्वविधपरिचर्याः निष्ठयाऽचरणीयाः। **'अभ्यागतः स्वयं विष्णुः'** इति स्मृतिः। सदाचारवर्जितजीवनेन तत्फलभूतं मशकसूकरादिजन्म स्यादिति जीवं सचेतयन् प्रतिबोधयति श्रुतिः **"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥**[२०] येषां जीवनं सदाचारवर्जितं भवति ते शुनकसूकरादि अथ च तरुगुल्मादिजन्मानि प्रपद्येरन्। अथ च **'यथा प्रज्ञं हि संभवाः'** जन्म स्वस्वबुद्ध्यनुसारं भवतीति अन्यापि श्रुतिस्तत्र प्रामाणिकी।

**इन्द्रियनिग्रहफलम् – 'यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥**[२१] **यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥**[२२] श्लोकयोरनयोः प्रतिपादितं वर्तते यत् यः सर्वदा अविवेकी असंयमितमनस्को भवति तस्य इन्द्रियाणि स्वाधीने न भवन्ति, अकुशलसारथेः दुष्टाश्वा इव प्रवर्तन्ते। परन्तु यः कुशलः सर्वदा समाहितमनस्को भवति तस्याधीने इन्द्रियाणि तथैव भवन्ति यथा कुशलसारथेः सदश्वाः। अतः मनः स्वाधीने भवति तर्हि ब्रह्माण्डं स्वाधीने, यदि पराधीनं मनः सर्वं भयाह्वयं भवति। अतः एतेषां नियन्त्रणम् अत्यन्तमावश्यकम्। **'मन एव मनुष्याणां कारणं बन्धमोक्षयोः'** इति विवेकचुडामण्यां श्रीमच्छङ्कराचार्यैः प्रशस्तम्। अथ च **'आशायाः ये दासाः ते दासाः सर्वलोकस्य। आशा येषां दासी तेषां दासायते लोकः'॥** इत्यपि प्रसिद्धलोकोक्तिः श्रूयते।

रात्रौ दुःस्वप्नदूरीकरणाय प्रोक्तमस्ति – दूर्वा दुःस्वप्ननाशिनी अर्थात् यदि शयनसमये दूर्वां समीपे स्थापयित्वा शयनं कुर्मस्तर्हि दुःस्वप्नानि नश्यन्तीति।

**स्वाध्यायप्रशंसा –** यदस्माभिः श्रुतं तस्य सततं स्वाध्यायप्रवचनाभ्यां मन्तव्यम्। यतो हि स्वाध्यायप्रवचनाभ्यां यत्फलं तत् यथा "ऋतं च स्वाध्याय प्रवचने च। सत्यं च स्वाध्यायप्रवचने च। शमश्च दमश्च अग्नयश्च अग्निहोत्रञ्च मानुषञ्च स्वाध्यायप्रवचने च समं भवति। तप इति तपोनित्यं

---

[२०] कठोपनिषद् – वल्ली-५, मं-७।

[२१] कठोपनिषद् – वल्ली-३, मं-५।

[२२] कठोपनिषद् – वल्ली-३, मं-६।

पौरुशिष्टिः पौरुष इष्टिः। तद्धितास्तद्धि तपः। एवं प्रकारेण प्रत्येकमपि विषयं सूक्ष्मतया विशदीकुर्वन् जिज्ञासया प्राप्तं शिष्यं करुणया दयया च बोधयति गुरुः। तर्हि गुरोः महिमा विषये छान्दोग्योपनिषदि hप्रतिपादितमस्ति यत् – **'श्रुतं ह्येव मे भगवद्दृश्येभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति तस्मै हैतदेवोवाचात्र ह न किञ्चन वीयायेति वीयायेति'**.[२३] ॥

**"मा हिंस्यात्सर्वभूतानि" "सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि"** इत्यादीनि वज्रतुल्यानि वाक्यानि उपनिषत्सु बहूनि प्रतिपादितानि सन्ति। येषां सम्यगाचरणेन व्यवहारे क्षुद्रविषयानादाय प्रवर्तमानसमस्याभ्यः तीर्त्वा प्रसादं प्राप्तुं विविधोपायान् परिपालितुं प्रभवामः।

## सन्दर्भग्रन्थसूची


१. मन्त्रपुष्पम् – परिष्कर्ता स्वामी श्री देवरूपानन्दः, रामकृष्ण मठ, मुम्बई, २००३।

२. कठोपनिषत्, मुद्रक तथा प्रकाशक – घनश्यामदास जालान, गीताप्रेस- गोरखपुर, २००८।

३. मुण्डकोपनिषत् – सानुवाद शाङ्करभाष्यसहित, प्रकाशक – गीताप्रेस-गोरखपुर, १९९२।

४. छान्दोग्योपनिषत्- सानुवाद शाङ्करभाष्यसहित, प्रकाशक – गीताप्रेस-गोरखपुर, १९९२।

५. ईशावास्योपनिषत् – सानुवाद शाङ्करभाष्यसहित, प्रकाशक – गीताप्रेस-गोरखपुर, १९९२।

६. गणपत्यथर्वशीर्षोपनिषत् – मन्त्रपुष्पम् – परिष्कर्ता स्वामी श्री देवरूपानन्दः, रामकृष्ण मठ, मुम्बई, २००३।

७. महानारायणोपनिषत्, मन्त्रपुष्पम्, रामकृष्णमठ, खार, मुम्बई।

८. ईशादि नौ उपनिषद्, व्याख्याकार- हरिकृष्णदास गोयन्दका, मुद्रक् एवं प्रकाशक- मोतीलाल जालान, गीताप्रेस्, गोरखपुर।


~~~~~*~~~~~*~~~~~*~~~~~

[२३] छान्दोग्योपनिषद् – ४.९.३
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# अद्वैतवेदान्ते मोक्षस्वरूपविमर्शः

**- डॉ. जानकीशरण आचार्यः**[१]

श्रुतयो हि ब्रह्मविदां ब्रह्मप्राप्तिं जेगीयन्ते। तथा हि "**ब्रह्म प्राप्तो विरजोऽभूद्विमृत्युः**[२]", "**ब्रह्मविदाप्नोति परम्**[३]" इत्याद्याः। येयं ब्रह्मप्राप्तिः सङ्कीर्तिता सा न अप्राप्तस्य प्राप्तिः, तथा सति ब्रह्मप्राप्तिरूपस्य मोक्षस्य अनित्यत्वं दुर्वारं स्यात्। यथा कश्चिज्जनः गमनेन अप्राप्तं देशं प्राप्नोति, न तथा जीवः, ब्रह्मणः विभुत्वात्, स्वस्वरूपतया नित्यप्राप्तत्वाच्च। किन्तु सा प्राप्तस्यैव प्राप्तिः। अर्थात् जीवत इहैव ब्रह्मात्मैक्यसाक्षात्कारेण समूलाविद्यानिवृत्तिरेव नित्यशुद्धमुक्तमुक्तस्वरूपाखण्ड-सच्चिदानन्द-स्वरूपेणैव स्वात्मना स्थितिः मुक्तिः, सा स्थितिर्ब्रह्मात्मैक्यबुद्ध्या सम्पद्यते। सा मुक्तिः प्राप्तस्य प्राप्तिः। विषयोऽयं वेदान्तशास्त्रे कण्ठचामीकरन्यायेन स्पष्टीक्रियते। तथा हि काचित् कण्ठ एव विद्यमानतया प्राप्तमपि चामीकरं विस्मृत्य बहिरन्वेषते। यदा त्वन्येन "तव कण्ठे चामीकरम्" इति बोध्यते तदा सा अप्राप्तमिव प्राप्तमेव चामीकरं प्राप्नोति।

एवमेव अनाद्यविद्या अनात्मविषयानेव आत्मत्वेन मन्वानो जीवः यदा "**तत्त्वमसि**[४]" इत्याचार्येण उपदिष्टः तद्वाक्यजन्यया विद्यया स्वस्वरूपं ब्रह्म अप्राप्तमिव प्राप्नोति। भगवता भाष्यकारेण विषयोऽयमेवं प्रस्तुतम् "**प्रकृतसङ्ख्यापूरणस्यात्मनः अव्यवहितस्यापि बाह्यसंख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत् परमार्थब्रह्मस्वरूपाभावदर्शन-लक्षणया अविद्यया अन्नमयादीन्बाह्याननात्मन आत्मत्वेन प्रतिपन्नत्वात् अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते। एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्तं स्यात्। तस्यैवमविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृतसङ्ख्यापूरणस्यात्मनः अविद्ययानाप्तस्य सतः केनचित्स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण**

---

[१] दर्शनसङ्कायाध्यक्षः एवञ्च सहायकाचार्यः, दर्शनविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

[२] कठ.उ. २.३.१८

[३] तै.उ. २.१.१

[४] छा.उ. ६-८-७

**आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव**[५]” इति। भाष्यकारस्य भाष्यवाक्यमिदं दृष्टान्तगर्भितम्। यथा स्नानार्थं नदीं गतानां दशजनानां मध्ये, एकैकोऽपि प्रत्यागमनकाले आत्मानं विहाय अन्यानेव नवान् गणयन् “दशमो नष्टः” इति धिया शुशोच। यदा तु तत्रागतः कश्चिद्दयालुः तमेव गणयन् तमुद्दिश्य “दशमस्त्वमसि” इत्युपदिदेश, तत्र दशमः पूर्वं प्राप्त एव पुनः प्राप्यते। एवमेव प्रकृते स्वस्वरूपब्रह्मावगतिरेव प्राप्तिः। सोऽयमर्थः **“स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति**[६]”, **“तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्**[७]” इत्यादिश्रुतिभिः प्रतिपादितः। अतो जीवगता या नित्यप्राप्तब्रह्मणः अप्राप्तत्वभ्रान्तिः, तस्या निवृत्तिरेव प्राप्तिरित्युपचर्यते।

अयं ब्रह्मप्राप्तो मुक्तो जीवो ब्रह्मस्वरूपत्वाद् ब्रह्माभिन्नः। श्रुत्युपन्यासपूर्वकं सूत्रकारेणायमर्थः अधिकरणद्वयेन सिद्धान्तितः। तथा च श्रुतिः **“अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते**[८]” इति। अत्र शरीरात् समुत्थानं शरीराद्यनात्मभ्य आत्मविवेकः। तद्यथा मुखं व्यादाय स्वपिति इति वाक्यं सुप्त्वा मुखं व्यादत्त इति व्याख्यायते, तथैव उपसम्पद्य अभिनिष्पद्यत इत्यत्र, अभिनिष्पद्य स्वस्वरूपं साक्षात्कृत्य, परं ज्योतिः ब्रह्म उपसम्पद्यते प्राप्नोति इति श्रुत्यर्थो ज्ञेयः। अत्र मुक्तजीवरूपस्य स्वेन इति विशेषश्रवणात् **“सम्पद्याविर्भावः स्वेनशब्दात्**[९]” इत्यस्मिन्नधिकरणे केवलात्मस्वरूपेण मुक्त आविर्भवतीति इति सिद्धान्तितम्। पुनः **“अविभागेन दृष्टत्वात्**[१०]” इति सूत्रेण मुक्तस्य ब्रह्माभेदेनावस्थानं समसाधि। सूत्रे दृष्टत्वात् इत्यस्य जीवब्रह्मणोरभेददर्शनात् इत्यर्थः। तथा च भवन्ति श्रुतयः – **“तत्त्वमसि**[११]”, **“अहं ब्रह्मास्मि**[१२]”, **“ब्रह्मैव सन् ब्रह्माप्येति**[१३]”, **“यत्र नान्यत्पश्यति**[१४]”, **“न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्**[१५]” इत्याद्याः। कठोपनिषदि अपि

---

[५] तै.उ.शां.भा. २.१

[६] मुण्ड.उ. ३.२.९

[७] बृह.उ. १.४.१०

[८] छा.उ. ८.१२.३

[९] ब्र.सू. ४.४.१

[१०] ब्र.सू. ४.४.४

[११] छा.उ. ६.८.७

[१२] बृह.उ. १.४.१०

[१३] बृह.उ. ४.४.६

[१४] छा.उ. ७.२४.१

[१५] छा.उ. ४.३.२३

अयमर्थः सदृष्टान्तं समसूचि। तथा हि –

**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।**
**एवं मुनेर्विजानत आत्मा भवति गौतम ॥**[१६] इति।

एवञ्चोक्तरीत्या मोक्षस्य केवलब्रह्मरूपेण अवस्थानात् मोक्षो ब्रह्मस्वरूपादनतिरिक्तः। अतो ब्रह्मैव मोक्षः। अमुमर्थमालक्ष्य मोक्षस्य निरतशयपुरुषार्थत्वं साधयामास सूत्रकारः **"एवं मुक्तिफलानियमस्तदवस्थाऽवधृतेः**[१७]" इति। भाष्यकारेण "**मुक्त्यवस्था हि सर्ववेदान्तेषु एकरूपैव अवधार्यते। ब्रह्मैव हि मुक्त्यवस्था। न च ब्रह्मणः अनेकाकारयोगोऽस्ति**[१८]" इति सूत्रार्थेन मोक्षस्य ब्रह्मस्वरूपत्वं विवृत्य "**न च तस्यामपि उत्कर्षनिकर्षात्मकः अतिशय उपपद्यते। निकृष्टायाः विद्यात्वाभावात्, उत्कृष्टैव विद्या भवति। तस्मात्तस्यां चिराचिरोत्पत्तिरूपः अतिशयो भवन् भवेत्, न तु मुक्तौ कश्चिदतिशयसम्भवोऽस्ति**[१९]" इत्यनेन ब्रह्मरूपत्वाद् आनन्दात्मकमुक्त्यवस्थायां सातिशयत्वं निराकृतम्।

ननु, आनन्दात्मकब्रह्मप्राप्तिः न मोक्षः, तस्याः नित्यत्वेन तद्रूपस्य मोक्षस्य तत्त्वज्ञानासाध्यत्वप्रसङ्गात्, सर्वैः दार्शनिकैः मोक्षस्य तत्त्वज्ञानसाध्यत्वाभ्युपगमात्, अविद्यानिवृतेश्च मोक्षत्वाभ्युपगमात् "**अविद्यास्तमयो मोक्षः स च बन्ध उदाहृतः**[२०]" इति वचनाद् इति चेत्। उच्यते– शोकनिवृत्तिश्च मोक्षः। अविद्याजनितशोकस्य निवृत्तिः अपि मोक्षः इत्यर्थः। मोक्षस्य आनन्दात्मकब्रह्मरूपत्वे च "**ब्रह्मविद् ब्रह्मैव भवति**[२१]" इत्यादिश्रुतिर्मानम्, दुःखनिवृत्तिरूपत्वे च "तरति शोकमात्मवित्", "**तत्र को मोहः कः शोकः एकत्वमनुपश्यतः**[२२]" इत्यादिश्रुतिर्मानम्।

इयं स्वस्वरूपब्रह्मप्राप्तिः अविद्यानिवृत्तावेव सम्भवति। अविद्या हि जीवस्य स्वस्वरूपतया नित्यप्राप्तमपि ब्रह्म अप्राप्तमिव दर्शयति। विद्यया अविद्यानिवृत्तौ तु अविद्याप्रभवं जैवरूपमपि

---

[१६] कठ.उ. २.१.१५
[१७] ब्र.सू. ३.४.५२
[१८] ब्र.सू.शा.भा. ३.४.५२
[१९] ब्र.सू.शा.भा. ३.४.५२
[२०] ब्र.सि. २.१०६
[२१] मुण्ड.उ. ३.२.९
[२२] छा.उ. ७.१.३

निवर्तते। तदा अविद्यानिवृत्त्युपलक्षितः अद्वैतात्मा मुक्तो भवति। मोक्षस्वरूपमपि स एव। तथा चोक्तं तत्त्वप्रदीपिकाकारैः **"निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः**[२३] " इति। अस्मिन्नर्थे भवन्ति श्रुतिस्मृतयः **"विश्वमायानिवृत्तिः**[२४] ", **"तरति शोकमात्मवित्**[२५] ", **"तत्र को मोहः कः शोक एकत्वमनुपश्यतः**[२६]", **"मायामेतां तरन्ति ते**[२७]" इति। अत्र तरणं सेतुतरणवन्नास्ति अपितु "तरति ब्रह्मत्याम्" इत्यादाविव निवृत्तिरेव, मायाया अमूर्तत्वेन अन्यादृशस्य तरणस्य असम्भवात्। इयं निवृत्तिरपि निवृत्तनिवृत्तिः। यथा रज्ज्वारोपितः सर्पः आरोपितत्वेन अतात्त्विकत्वात्, पूर्वमपि निवृत्त एव सन्, नायं सर्पः किन्तु रज्जुरेव इति रज्जुतत्त्वज्ञानेन निवर्तते, तथैव असङ्गे असंसारिणि चात्मनि आरोपिता माया तत्प्रयुक्ता अनर्थाश्च पूर्वमपि निवृत्ता आत्मतत्त्वज्ञानेन पुनर्निवर्तन्ते।

**जीवन्मुक्तिः —**

अद्वैतवेदान्ते जीवन्मुक्तिविदेहमुक्तिविषये भाष्यतद्व्याख्याग्रन्थेषु विचारोऽभूत्। गीतायामपि ब्राह्मी स्थितिरित्युक्त्वा जीवन्मुक्तिराख्याता। तत्समर्थनं भाष्यकारेणापि कृतम्। विदेहमुक्तिर्ब्रह्म-निर्वाणरूपेण चर्चिता। तत्र जीवन्मुक्तिर्नाम स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्याणां सञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वात् अखिलबन्धरहितत्वे सति ब्रह्मनिष्ठत्वम्। तथा च जीवन्मुक्तलक्षणं जगदुरद्वैतसिद्धिकाराः **"जीवन्मुक्तश्च तत्त्वज्ञानेन निवृत्ताविद्योऽपि अनुवृत्तदेहादिप्रतिभासः**[२८]" इति। ब्रह्मात्मैक्यसाक्षात्कारे दृढीभूते अविद्यातत्कार्यात्मकसंसारनिवृत्तौ जायमानायां काकतालीयन्यायेन यदि प्रारब्धकर्मक्षयवशात् तस्मिन्नेव काले देहपातः स्यात्, तदा सद्य एव मुक्तिः स्यात्। यदा तु ज्ञानोत्पत्तिकाले प्रारब्धकर्म न क्षीयते तदा तत्कर्मक्षयपर्यन्तं शरीरावस्थानात् जीवन्नेव मुक्तसंसारः कर्तृत्वभोक्तृत्वसुखदुःखरहितो भवति। तथा च श्रुतिः **"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये**[२९]" इति। येन कर्मणा शरीरमारब्धं तस्योपभोगेन क्षयाद् यावन्न देहपातः तावदेव आचार्यवतः विज्ञानवतः पुरुषस्य

---

[२३] त.प्र. ४.८
[२४] श्वे.उ. १.१०
[२५] छा.उ. ८.४.२
[२६] ई.उ. ७
[२७] भ.गी. ७.१४
[२८] अ.सि. पृ. ८९०
[२९] छा.उ. ६.१४.२

सदात्मसम्पत्तेः कालक्षेपः। यदैव च प्रारब्धकर्मणाम् उपभोगेन क्षयः तदैव सत्सम्पद्यते इति देहपातस्य सत्सम्पत्तेश्च न कालभेदः।

यदुक्तं प्रारब्धकर्मक्षयवशाद् देहपातः इति, तत्कर्म त्रिविधं भवति—प्रारब्धम्, आगामि, सञ्चितञ्च। तत्र आगामिसञ्चितकर्मणोः "**क्षीयन्ते चास्य कर्माणि**[३०]", "**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते**[३१]" इत्यादि श्रुतिस्मृतिभ्यां ज्ञानाग्निना नाशो भवति। एतच्छरीराम्भकं प्रारब्धं कर्म तु "**भोगेन त्वितरे क्षपयित्वा सम्पद्यते**[३२]" इत्यनुसारेण भोगवशादेव क्षमयति।

अत्रेयं शङ्का—प्रारब्धकर्मफलभोगार्थं ब्रह्मविदः शरीरधारणं कथं सम्पद्यते? न हि ज्ञानकर्मणोरेकस्मिन् अवस्थितिसम्भवः तत्त्वज्ञानस्य कर्मनाशकत्वात्। ज्ञानकर्मणोर्विरोधः भाष्यकृता असकृत्सिद्धान्तितत्वात्। अपि च "**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते**[३३]" इति स्मृतेः, "**क्षीयन्ते चास्य कर्माणि**[३४]", "**तद् यथेषीका तूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वपाप्मानः प्रदूयन्ते**[३५]" इत्यादिश्रुतेः प्राप्तब्रह्मविज्ञानस्य अविशेषेण सर्वेषां सुकृतानां दुष्कृतानां च कर्मणां क्षयश्रवणात्। "**ब्रह्मैव सन् ब्रह्माप्येति**[३६]" इति च ब्रह्मप्राप्तेः विद्योदयसमकालत्वेन विद्योदयसम-कालम् एव विदेहकैवल्यं स्यात्। विद्यया अविद्यानाशे च अविद्याकार्याणां शरीरादीनामपि नाशः स्यात्।

अत्रेवं समाधानम्—यानि प्रवृत्तफलानि कर्माणि, यैः विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयः, न ज्ञानेन। यद्यपि कर्माणि ज्ञाननाश्यानि, ज्ञानलाभानन्तरं कर्मणः कर्मजन्यस्य भोगायतनस्य देहस्य च नाशप्रसङ्गः ततापि कर्म स्वभावेनैव प्रारब्धवेगक्षयावधि स्थातुमर्हति। यथा लक्ष्यमुद्दिश्य मुक्तस्य आरब्धवेगस्य इषोः लक्ष्यभेदादूर्ध्वं गतिप्रयोजनं नास्ति, न वा स्थितिः अपि तु वेगक्षयं यावत्, तथैव ब्रह्मविदः विद्यालाभानन्तरं प्रयोजनं नास्तीति न कर्माणि निवर्तन्ते, किन्तु भोगानन्तरम् एव क्षीयन्ते। अन्यानि तु इह प्राग्ज्ञानोत्पत्तेः ऊर्ध्वं च कृतानि क्रियमाणानि अतीतजन्मान्तरकृतानि वा

[३०] मुण्ड.उ. २.२.८
[३१] भ.गी. ४.३७
[३२] ब्र.सू. ४.१.१९
[३३] भ.गी. ४.३७
[३४] मुण्ड.उ. २.२.८
[३५] छा.उ. ५.२४.३
[३६] बृह.उ. ४.४.६

अप्रवृत्तफलानि कर्माणि ज्ञानाग्निना दह्यन्ते। अतो ब्रह्मविदो जीवनप्रयोजनाभावेऽपि प्रवृत्तफलानां कर्मणाम् स्थितिः अवश्यमेव स्यात्। तदैव **"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये**[३७]" इत्यादिश्रुतयः सङ्गच्छन्ते।

**जीवन्मुक्तानां लक्षणानि —**

वस्तुतः अद्वैतब्रह्मज्ञानेन अज्ञानस्य निवृत्तौ अज्ञानप्रयुक्तः द्वैतप्रपञ्चोऽपि निवर्तते। तथापि विक्षेपशक्त्यंशस्य अज्ञानसंस्कारस्य वा अनिवृत्तिः ज्ञानिनः प्रारब्धकर्मोत्थशरीरस्थितिं घटयति। तदा केवलज्ञानिनः ज्ञानिनं शरीरेन्द्रियप्राणादिमन्तमिव पश्यन्ति। ज्ञानी त्वात्मातिरिक्तं न किञ्चिद्वस्तु पश्यति। अत एव श्रुतिः **"यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति**[३८]" इत्यादिना संसारिणः अविदुषः कर्तृकर्मप्रयुक्तं व्यवहारं दर्शयित्वा, **"यत्र त्वस्य सर्वमात्मैवाभूत्तत् केन कं पश्येत्**[३९]" इति विदुषः तादृशव्यवाहाराभावमाह। अयं जीवन्मुक्तः स्मृतिषु स्थितप्रज्ञगुणातीतब्राह्मणादिशब्दैः लक्षितः।

प्राचीनकर्मणामनेकत्वात् ब्रह्मविदामाचारादिकं वृत्तयोऽपि नैकविधा दृश्यन्ते। केचिद् धर्मव्याधप्रभृतयो ब्रह्मविदः वाणिज्यं कुर्वन्ति, केचित्तपोऽनुतिष्ठन्ति। शुकादयः केचिद्भिक्षाचर्यं परित्यज्य परमहंसाः भवन्ति। केचन जनकादयो ब्रह्मविदो राज्यं कुर्वते। सोऽयं ब्रह्मविदां महिमा स्वाभाविकः। ईदृशं वर्तनं तेषाम् अलङ्कारः। एवञ्च कदाचिद् ब्रह्मविदां हृदि प्राचीनकर्मवासनावशात् कामादयो रोषादयश्च भवेयुः तथापि ते **"पुष्करपलाश आपो न श्लिष्यन्तम्**[४०]" तत्र सक्ता न भवन्ति। ज्ञानी स्वज्ञानमाहात्म्यं बहिर्न प्रकाशयति। तथा च श्रुतिः **"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्**[४१]" इति। अत्र बाल्यं नाम न तिष्ठन्मूत्रपुरीषत्वादि यथेष्टाचरणम्, किन्तु अप्ररूढेन्द्रियतया बालेषु विद्यमाना भावशुद्धिः। तदाह सूत्रकारः **"अनाविष्कुर्वन्नन्वयात्**[४२]" इति। यथा बालो न परेषां पुरत आत्मानमाविष्कर्तुम् इच्छति, तथैव ज्ञानी अपि ज्ञानाध्ययनधर्माचरणादिभिः आत्मानमप्रदर्शयन्

[३७] छा.उ. ६.१४.२
[३८] बृह.उ. ४.५.१५
[३९] बृह.उ. ४.५.१५; २.४.१४
[४०] छा.उ. ४.१४.३
[४१] बृह.उ. ३.५.१
[४२] ब्र.सू. ३.४.५०

दम्भदर्पादिरहितो भवेत्, तथा सति मोक्षसाधनं निरन्तरायं स्वकार्यं साधयति इति सूत्रार्थः। श्रुत्यन्तरं च भवति "**अव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः**[४३]" इति।

वासिष्ठे च जीवन्मुक्तानां वर्णनम् इत्थं प्राप्यते—

**यथास्थितमिदं यस्य व्यवहारवतोऽपि च**
**अस्तङ्गतं स्थितं व्योम स जीवन्मुक्त उच्यते॥**

**नोदेति नास्तमायाति सुखे दुःखे मुखप्रभा।**
**यथाप्राप्ते स्थितिर्यस्य स जीवन्मुक्त उच्यते॥**

**यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते।**
**यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते॥**

**रागद्वेषभयादीनामनुरूपं चरन्नपि।**
**योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते॥**

**यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।**
**कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते॥**

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।**
**हर्षामर्षभयान्मुक्तः स जीवन्मुक्त उच्यते॥**

**शान्तसंसारकलनः कलावानपि निष्कलः।**
**यः सचित्तोऽपि निश्चित्तः स जीवन्मुक्त उच्यते॥**

**यः समस्तार्थजातेषु व्यवहार्य्यपि शीतलः।**
**परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते॥**[४४] इति।

---

[४३] जा.उ. ६

[४४] ल.यो.वा. उत्पत्तिप्रकरणम्, १.९०-९७

"**आत्मक्रीडाः आत्मरतिः क्रियावान् एष ब्रह्मविदां वरिष्ठः**[४५]" इति श्रुतौ जीवन्मुक्तानां स्थितेः वर्णनं प्राप्यते। ज्ञानभूमिकातारतम्यात् जीवन्मुक्तेष्वपि तारतम्यं दृश्यते। तत्र शुभेच्छा, विचारणा, तनुमानसा, सत्त्वापत्तिः, असंसक्तिः, पदार्थाभावनी, तुर्यगा चेति सप्तज्ञानभूमिकाः भवन्ति। आद्यत्रयं ज्ञानस्य भूमिका भवन्ति। तत्र आद्यभूत्रस्य अभ्यासवैराग्याभ्यां ब्रह्माकारवृत्तिः उदेति तदा तत्त्वम्पदार्थयोः ऐक्यमनुभूयते। इयं "सत्त्वापत्तिः" इत्यभिधेया ज्ञानस्य चतुर्थी भूमिका वर्तते। तत्र स्थितः पुरुषः "ब्रह्मविद्" इत्यभिधीयते। पञ्चम्यां "असंसक्तिः" इति भूमिकायां स्थितः पुरुषः "ब्रह्मविद्वर" इत्युच्यते। पदार्थाभावनी इत्याख्यां षष्ठज्ञानभूमौ स्थितः आत्मज्ञानी "ब्रह्मविद्वरीयान्" इति प्रोच्यते। इयं भूमिका विदेहमुक्तेः प्रथमभूमिका वर्तते। अन्तिमा ज्ञानभूः "तुर्यगा" इत्यवस्थायां स्थितः "ब्रह्मविद्वरिष्ठः" इति संज्ञायते। इयं विदेहमुक्तेः अन्तिमा भूमिका

**विदेहमुक्तिः —**

ज्ञानाग्निना अविद्याख्यं कारणशरीरं विनष्टम्, स्थूलशरीरमिदं कालवशेन प्रारब्धकर्मक्षये सति वृक्ष इव पतेत्, तदा जीवन्मुक्तपुरुषो विदेहमुक्तिं लभते। तथा चोक्तम्—

**जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात् कृते।**
**विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतमिव॥**[४६] इति।

एतादृशः विदेहमुक्तः आत्मा निष्कलब्रह्मरूपेण अवतिष्ठते। एतादृशः आत्मा ब्रह्मात्मतां प्राप्य— "**ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी। स्वच्छरूपो महामौनी वैदेही मुक्त एव सः**[४७]" इत्युक्तदिशा ब्रह्मानन्दरूपं नित्यं सुखमवाप्नोति।

एवञ्च जीवन्मुक्तिं प्राप्तः तत्त्वज्ञानी भोगेन प्रारब्धकर्मावसाने वर्तमानशरीरपाते विदेहकैवल्यमाप्नोति। तदाह सूत्रकारः "**भोगेन त्वितरे क्षपयित्वा सम्पद्यते**[४८]" इति। इतरे

---

[४५] मुण्ड.उ. ३.१.४
[४६] मुण्ड.उ. २.७६
[४७] तै.उ. ४.३३
[४८] ब्र.सू. ४.१.१९

प्रारब्धफले पुण्यपापे इत्यर्थः। **"विमुक्तश्च विमुच्यते**[४९]", **"भूयश्चान्ते विश्वमायानिवृत्तिः**[५०]" इत्यादिश्रुतयः जीवन्मुक्तस्य विदेहमुक्तिमाहुः। तस्य मुक्तस्य प्राणाः नोत्क्रामन्ति, किन्तु परमात्मन्येव प्रलीयन्ते। तथा च श्रुतिः **"यत्रायं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्त्याहो नेति**[५१]" इति प्रश्नमुद्भाव्य **"नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते**[५२]" इत्याह। अत्र प्राणशब्दः चक्षुरादिपरः। समवनीयन्ते प्रलीयन्त इत्यर्थः। सूत्रकारेणापि **"तानि परे तथा ह्याह**[५३]" इति सूत्रेण श्रुतिप्रमाणपूर्वकं प्राणानां परब्रह्मणि लयः समसाधि। एवमात्मभिन्नानां सर्वेषां कल्पितपदार्थानाम् आत्मज्ञानेन बाधे सति जीवः अखण्डं ब्रह्मैव भवति। तथा च विदेहकैवल्यम् अद्वैतब्रह्मरूपेणैव अवस्थानम् इति शम्॥

~~~~~*~~~~~*~~~~~*~~~~~

[४९] कठ.उ. २.२.१

[५०] श्वे.उ. १.१०

[५१] बृह.उ. ३.२.११

[५२] तत्रैव, ३.२.११

[५३] ब्र.सू. ४.२.१५
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# ग्रहजन्यरोगाः तच्छमनोपायाश्च

- डॉ. नित्यानन्द ओझा[१]

सृट्यादिकालतः भूस्थाः मनुष्येण सह सर्वे जीव-जन्तवः विविधैः रोगैः ग्रस्ताः सन्तः भवन्ति। वैदिककालादेव रोगाणां शमनार्थं विविधानाम् औषधीनां पानम् अथ च ग्रहशान्त्यर्थं जपानुष्ठानादिकार्याणि भवन्ति।

अथर्ववेदेऽपि दृश्यते यत् –

**"अरिष्टाः सर्वहायसो मा च नः किंचनाममत्..."**[२]

अर्थात् वयं स्वस्थाः भवेम पूर्णायुः स्यात् कोऽपि रोगः न भवेत्।

**"मा नो रुद्र तक्मना मा विषेण..।**[३]

अर्थात् भो रूद्र ! रोगेण विषेण वा अस्मान् कष्टः न भवेत् वस्तुतस्तु वैदिककालतः अरिष्टकारकाणां ग्रहाणां शान्तिप्रक्रियाःप्रचलिताः आसन् तत्र दृश्यतेऽपि यत्

**"शं नो दिविचरा ग्रहाः.."**[४]

आकाशस्थाः ग्रहाः अस्माकं कृते शुभाः भवेयुः।

**"वि क्षेत्रियस्य मुञ्चताम् अधमं पाशमुत्तमम्...."**[५]

मूलनक्षत्रस्य तारकाः अनुवांशिकरोगेभ्यो मुक्तिं प्रदद्युः।

**"सुहवमग्ने कृत्तिका रोहिणी चास्तु...."**[६]

कृत्तिकारोहिण्यादिनक्षत्राणि अस्माकं कृते शुभानि भवेयुः।

वस्तुतः **"यत् पिण्डे तत् ब्रह्माण्डे"** इत्यनेन जनाः प्रत्यक्षाप्रत्यक्षरूपेण आकाशस्थैः ग्रहनक्षत्रपिण्डैः प्रभाविताः भवन्ति। तेषां ग्रहाणां भूस्थानामुपरि प्रभावस्य अध्ययनं विवेचनं वा

---

[१] सहायकाचार्यः ज्योतिषविभागः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

[२] अथर्ववेद १०.५.२३

[३] अथर्ववेद ११.२.२६

[४] अथर्ववेद १९.९.७६

[५] अथर्ववेद ३.७.४

[६] अथर्ववेद १९.७.२

ज्योतिषशास्त्रस्य मुख्यप्रयोजनं विद्यते। यादृशी प्रकृतिः यस्य ग्रहस्य भवति तादृशीमेव प्रकृतिं ददाति जनान्। स्वकीयप्रभावेण जनान् प्रभावयति। वैज्ञानिकदृष्ट्यापि तत्र कफपित्तवातप्रकृतयः, सत्वरजस्तमो गुणाः पिण्डेषु भवत्येव यदि कस्मिन् अपि निर्दिष्टबिन्दौ शुभाशुभग्रहाणां युतिः भवेत् तर्हि मिश्रितफलं आचार्यैः निर्दिष्टमस्ति अथवा आकाशे निर्दिष्टबिन्दौ सत्वरजोगुणयोः ग्रहयोः युतिः स्यात् तर्हि तस्य जनस्य शरीरे, स्वभावे च एतयो गुणयोः मुख्यत्वेन प्रभावः दृश्यते।ग्रहगुणविषये उक्तमस्ति-

**गुरुशशिरवयः सत्त्वं रजः सितज्ञौ तमोऽर्कसुतभौमौ।**
**एतेऽन्तरात्मनि स्वां प्रकृतिः जन्तोः प्रयच्छन्ति॥**[७]

वस्तुतः ग्रहाणां प्रभाववशेन कफपित्तवात्तेषु विकृतिवशात् रोगाणाम् उत्पत्तिः भवति।तत्रापि केचन कर्मजव्याधयः भवन्ति येषामुत्पत्तिः अस्माकं जीवने निर्दिष्टेषु आहारादिकेषु विषमत्वेन भवति। तथा च केचन पूर्वाजितकर्मभिः रोगाः उत्पद्यन्ते।

हारितसंहितायां लिखितमस्ति यत्-

**जन्मान्तरकृतं पापं व्याधिरूपेण बाधते।**
**तच्छान्तिरौषधैर्दानैर्जपहोमसुरार्चनैः॥**

तत्र च ज्योतिषशास्त्रस्य महत्त्वविषये एव कथयति आचार्यवराहमिहिरः यत्-

**यदुपचितमन्यजन्मनि शुभाऽशुभं तस्य कर्मणः पक्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव॥**[८]

ज्ञातव्यमस्ति यत् ज्योतिषशास्त्रानुसारं सरलतया सम्भावितानां रोगाकां ज्ञानवशात् तेषां शमनं अस्माभिः कर्तुं शक्यते। अत्र जातकशास्त्रानुसारं सूर्यादिग्रहैः प्रभतानां रोगानां विवेचनं क्रियते। रोगज्ञानविषये यथोक्तमस्ति आचार्यमन्त्रेश्वरेण-

**रोगस्य चिन्तामपि रोग भावस्थितैर्ग्रहैर्वा व्ययमृत्युसंस्थैः।**
**रोगेश्वरेणापि तदन्वितैर्वा द्वित्र्यादिसम्भवादवशद्वदन्तु॥**[९]

इत्यादिना यो ग्रहः षष्ठाष्टमद्वादशभावेषु स्यात्, यो हि ग्रहः षष्ठेशः स्यात् षष्ठेशेन सह युतिर्वा स्यात्तस्मात् रोगस्य आदेशः करणीयः। एतस्मिन् प्रसङ्गे अन्विष्यते मयाऽपि यत् षष्ठस्थाने येषां दृष्टिः स्यात् यो ग्रहः अष्टमेशः स्यात् येषां ग्रहाणां जन्माङ्के नवांशे वा अष्टमस्थानेऽपि स्थितिः स्यात् अथवा

---

[७] लघुजातकम् अ.६ श्लो. ७

[८] लघुजातकम् अ. १ श्लो. ७

[९] फलदीपिका अ.१४ श्लो. २

दृष्टिः स्यात्तर्हि तस्माद्वशादपि रोगनिर्धारणं करणीयम्। रोगनिर्धारणक्रमे यदि बहुविधैः कस्यचिदेकस्य रोगस्य एव सम्भावना भवेत् तर्हि तस्य रोगस्य आदेशः करणीयः। अत्र सूर्यादिरोगकारकग्रहाणां विवेचनपूर्वकं तेषां शमनोपायः कर्तुं शक्यते।

**सूर्यः –**

**"पैत्तिकोऽस्थिसारश्च"** इत्यनेन सूर्यः शरीरस्यावयवेषु अस्थिकारकः ग्रहोऽस्ति। "जगतस्तस्थुषश्च" इत्यनेन जगतः आत्मा सूर्यः एवेति मन्यते। अतः आत्मकारको ग्रहोऽस्ति कथनमप्यस्ति।

**"आत्मा रविः शीतकरस्तु चेतः"**[१०] वस्तुतः सूर्यः अग्नितत्त्वप्रधानमस्ति। कोऽपि ग्रहः स्वकीयस्वभावा-नुगुणमेव रोगं ददाति। सूर्यस्य स्वभावविषये उक्तमस्ति-

**सूर्यो नृपो ना चतुरस्रमध्यं दिनेन्द्रदिक् स्वर्णचतुष्पदोग्रः।**
**सत्त्वं स्थिरस्तिक्तपशुक्षितिस्तु पित्तं जरन्पाटलमूलवन्यः॥**[११]

अतोऽत्र सूर्यः यदा रोगकारको भवति तदा अस्थि-रोगः, हृदय-रोगः, नेत्र-रोगः, ऊष्ण-ज्वरः, शिरोरोगः, अपस्मार-रोगः (मिर्गीरोगः), पित्त-जन्य-रोगः भवितुम् अर्हति।

सूर्यस्य रोगविषये मन्त्रेश्वरेण कथितमस्ति यत्-

**पित्तोष्णज्वरतापदेहतपनापस्मारहृत्कोऽजव्याधीन्वक्ति रविर्दृगार्त्यरिभयं त्वगदोषमस्थिस्रुतिम्।**
**काष्ठग्न्यस्त्रविषार्तिदारतनयव्यापच्चतुष्पाद्भयं चोरक्ष्मायतिधर्मदेवफणमृद्भूतेशभूतं भयम् ॥**[१२]

अत्र आचार्येण चतुष्पाद्भयं, सर्पाद्भयं विषवशात् रोगः त्वग् रोगः एतेषां रोगाणाम् इतोऽपि समावेशः कृतः वर्तते।

अथ च वीरसिंहावलोकेऽपि कथयति-

**नीचस्थितस्य भानोर्दशाक्षिनाशं ज्वरं शिरोरोगम्।**
**बन्धनमत्य ध्वरुजः कुष्ठस्य च दर्शनं चिह्नम्॥**[१३]

यदि सूर्यजन्यरोगाः स्युस्तर्हि सूर्यदोषशमनार्थं **"आकृष्णेन रजसा......"** इत्यनेन सूर्यस्य वैदिकमन्त्रेण जपपूर्वकं मन्दारकाष्ठैः हवनं पूजनं च करणीयम्।

---

[१०] लघुजातकम् ग्रहप्रभेदाऽध्यायः श्लो. ७

[११] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो.१

[१२] फलदीपिकाअ.१४ श्लो.२

[१३] वीरसिंहावलोकः ज्वराधिकारः पृ. ३

एतेन सह शिलैला, देवदारुः, अर्जुनस्य अर्कः, कुङ्कुमं रक्तपुष्पं एताभिः सामग्रीभिः मिश्रितजलेन स्नानेनाऽपि शान्तिः भवति। यथोक्त-

**मनः शिलैलासुरदारुकुङ्कुमैरुशीरयष्टीमधुपद्मकान्वितैः।**
**सताम्रपुष्पैर्विषमस्थिते रवौ शुभावहं स्नानमुदाहृतं बुधैः॥**[१४]

**चन्द्रः -**

यदा चन्द्ररोगकारकः स्यात्तदा स्वस्वभावानुगुणमेव रोगं ददाति। चन्द्रस्य प्रकृतिविषये उक्तमस्ति ताजिकनीलकण्ठीग्रन्थे यत्-

**वैश्यः शशी स्त्री जलभूस्तपस्वी गौरोपराह्णाम्बुगधातुसत्त्वम्।**
**वायव्यदिक्श्लेष्मभुजङ्गरूप्यस्थूलो युवा क्षारशुभः सिताभः ॥**[१५]

इत्यादिना चन्द्रः सत्त्वगुणप्रधानो भवति एतस्य कफप्रकृतिर्भवति लवणरसप्रधानश्च भवति। अत एव चन्द्रः रोगकारकः भवति तदा शीतज्वरः, अतिसारः मन्दाग्निः,पाण्डुरोगः, रक्तसम्बन्धिरोगाः जलस्थैः जीवैः पीडा भवति, नेत्ररोगो भवति –

**प्रालेयांशौ रिपुस्थे खलखगसहिते मानवो रोगवान् स्यात्**
**क्रूरैर्निष्पीडितश्चेत्तनुसदनगतः शीतरश्मिस्तदानीम्।**
**क्रूरेकेन्द्रालयस्थे यदि शुभविहगैर्नेक्षिते रोगवान् स्यात् ........ ॥**[१६]

इतोऽपि अनिद्रा, क्षयरोगः जलोदररोगो भवति। प्रसङ्गेस्मिन् उक्तमस्ति -

**निद्रालयस्य कफातिसारपिटकाः शीतज्वरं चन्द्रमाः।**
**शृङ्ग्यब्जाहतिमाग्निमान्द्यमरुचिं योषिव्द्यथाकामिलाः॥**

**चेत् शान्तिमसृग्विकारमुदकाभ्दीति च बालग्रहाद्**
**दुर्गाकिन्नरधर्मदेवफणभृद्यक्ष्माश्च भीतिं वदेत् ॥**[१७]

अत्र निद्रायाः आलस्यस्यश्च प्रयोगः कृतः वर्तते अतोऽत्र कथयितुं शक्यते यत् थायराइडरोगस्य कारकः चन्द्रः अपि भवति। यतोहि थायराइड गण्डरोगो भवति जातकालङ्करे उक्तमस्ति **"ज्ञेयश्चन्द्रेण गण्डो"**[१८] चन्द्रवशात् कृमिरोगः अपि भवति। वीरसिंहावलोके उक्तमस्ति-

---

[१४] वीरसिंहावलोकः व्यख्याकारः – पं श्री राधाकृष्णपराशरः

[१५] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो. २

[१६] जातकालंकारः भावाध्याय श्लो. २१

[१७] फलदीपिकाअ. १४ श्लो. ३

[१८] जातकालंकारः योगाध्यायः श्लो ७

**“अष्टमस्थानस्थितचन्द्रजनितकृमिरोगप्रतिकाराय प्रागुक्तम्”** [१९]

पुनश्च चन्द्रः जठराग्निसम्बन्धितानां रोगाणां मानसिकरोगाणाञ्च कारको भवति। उक्तमस्ति जातके-

**सिंहस्थो द्विजनाथःकरोति जातं जठर रोगार्तम्।**
**स्त्रीद्विषिणं च पुरुषं तथा पिपासा क्षुधाविष्टम् ॥** [२०]

**निवारणम् -**

चन्द्रकृतरोगाणां शमनार्थं चन्द्रस्य वैदिकमन्त्राणां जपः, पुनः पलाशसमिधाभिः होमः करणीयः। तद्यथा -

**क्षीणेन्दुदशाजनितबाधोपशान्तये यथा “इमं देवेति” जपः।**
**पलाशीभिः समिद्भिर्जुहुयात्, शङ्खं दद्यात् ॥** [२१]

पुनः शङ्खशुक्तिकुमुदस्फटिकादिभिः मिश्रितैः जलैः स्नानं करणीयम् –

**पञ्चगव्यगजदानविमिश्रैः शङ्खशुक्तिकुमुदस्फटिकैश्च।**
**शीतरश्मिकृतवैकृते हितं स्नानमेतदुदितं नृपतीनाम् ॥** [२२]

रौप्यमुक्ताफलं च धार्यम्”

**मङ्गलः –**

भौमस्य स्वभावविषये उक्तमस्ति -

**भौमस्तमः पित्तयुवोग्रवन्यो मध्याह्नधातुर्यमदिक् चतुष्पात्।**
**ना राट् चतुष्कोणसुवर्णकारो दग्धाऽवनीव्यङ्गकटुश्च रक्तः ॥** [२३]

इत्यादिना भौमः तमो गुणप्रधानः भवति प्रकृतिश्च पित्तोऽस्ति अत एव यदा भौमः रोगकारको स्यात्तदा पित्तज्वरः , गुल्मरोगः, मज्जारोगः, अग्निभयः, सहोदरजन्यकष्टः, शत्रुजन्यकष्टः, अपस्मारो भवति पुनः विषावशादपि रोगाणामुत्पत्तिः उक्तमस्ति-

---

[१९] वीरसिंहावलोकः

[२०] वीरसिंहावलोकः पृ. १८३

[२१] वीरसिंहावलोकः पृ. ५

[२२] वीरसिंहावलोकः पृ.५

[२३] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो.३

**तृष्णासृक्कोपपित्तज्वरमनलविषास्त्रार्तिकुष्ठाक्षिरोगान्,**
**गुल्मापस्मारविहतिपरुषतापामिकादेहभङ्गान्। भूपारिस्तेनपीडां.......... ॥**[२४]

वस्तुतः विशेषतः व्रणरोगकारको भवति भौमः। द्वादशभावेषु स्थानवशेन शरीरस्याङ्गे व्रणचिह्नं ददाति भौमः।

ध्यातव्यमस्ति यत् रक्तविकारस्य कारकोऽपि मङ्गलो भवति स्त्रीषु अपि रक्तविकारकारकः शल्यचिकित्साकारकः भौमः एव दृश्यते अस्माभिः -

**कौमारदारमाढ्यं हेमालङ्कारभूषितं प्राज्ञम्।**
**शूरं सव्रणगात्रं रुधिराङ्गनिरीक्षितो जीवः ॥**[२५]

**अथ च**

**रक्तपीत्तज्वरं दाहमाग्निचौरैरुपद्रुतम्।**
**लभते नात्र सन्देहश्चचन्द्रमध्ये यदा कुजः॥**

**निवारणम् –**

मङ्गलस्य वैदिकमन्त्रस्य जपः, तिलघृतवकुलैः होमः प्रातःकाले बिल्वचन्दनारुणपुष्पमिश्रितेन जलेन स्नानवशात् भौमदोषात् निवृतिः भवति। उक्तमस्ति-

**बिल्वचन्दनवलारुणपुष्पैर्हिंगुलकफालिनीबकुलैश्च।**
**स्नानमद्भिरिहमांशियुताभिर्भौमदोषनिवारणमाहुः ॥**[२६]

पुनः हनुमतः उपासना करणीया।

**बुधः -** बुधस्य प्रकृतिविषये उक्तमस्ति –

**ग्राम्यः शुभो नीलसुवर्णवृत्तः शिश्विष्टकोच्चः समधातुजीवः।**
**श्मशानयोषोत्तरदिक्प्रभातं शूद्रः खगः सर्वरसो रजो ज्ञः ॥**[२७]

इत्यादिना बुधः रजोगुणप्रधानः कफपित्तवातैः मिश्रितप्रकृतिः भवति। यदा बुधः रोगकारको भवति तदा त्रिदोषजन्यरोगः, त्रिदोषजन्यज्वरः, त्वग्रोगः, दुःस्वप्नः, मानसिकरोगो भवति –

**भ्रान्तिं दुर्वचनं दृगामयगलघ्राणोत्थरोगं ज्वरं**
**पित्तश्लेष्मसमीरजं विषमपि त्वग्दोषपाण्ड्वामयान्।**

---

[२४] फलदीपिका अ. १४ श्लो. ४

[२५] वीरसिंहावलोकः पृ. ४१७

[२६] वीरसिंहावलोकःरक्तपिताधिकार श्लो. ३

[२७] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो. ४

**दुःस्वप्नं च विचर्चिकाग्निपतने पारुष्यबन्धश्रमान् ,**
**गन्धर्वक्षितिहर्म्यवाहिभिरपि ज्ञो वक्ति पीडां ग्रहैः ॥**[२८]

वस्तुतः चन्द्रस्य दशायां यदा बुधस्य अन्तर्दशा भवति तदा कदाचित् बुधः क्षयरोगकारकोऽपि भवति-

**चन्द्रक्षेत्रे यदा चाद्रिर्जायते यस्य जन्मनि।**
**स जातक्षयरोगी स्यात्कुष्ठादिभिरुपद्रुतः ॥**[२९]

यद्यपि त्वग्रोगस्यान्तर्गते कुष्ठरोगस्य कण्डूरोगस्य च समावेशः भवति। मुख्यतया कुष्ठरोगस्यादेशः क्रियते-

**कुष्ठकण्डूविकारैश्च क्षयकुष्ठभगन्दरैः।**
**गजादिवाहनभयं भवेच्चन्द्रान्तगे बुधे॥**[३०]

**निवारणम्-**

बुधजन्यदोषशमनार्थं बुधस्य वैदिकमन्त्रस्य जपः अपमार्गसमिधाभिर्होमः करणीयः।

अथ च गोमयाक्षतपुष्पमिश्रितजलेन स्नानं करणीयम्। पुनश्च दुर्गादेवीनामुपासना करणीया, यथोक्तं वीरसिंहावलोके-

**गोमयाक्षतफलैः सरोचनैः क्षौद्रशुक्ति भवमूलहेमभिः।**
**स्नानमुक्तामिदमत्र भूभृतां वोधनाशुभविनाशनं बुधैः ॥**[३१]

**गुरुः –** गुरोः स्वभावविषयेऽपि उक्तमस्ति -

**गुरुप्रभाते नृशुभेशदिग् द्विजः पीतो द्विपाद्-ग्राम्यसुवृत्तजीवः।**
**वाणिज्यमाधुर्यसुरालयेशो वृद्धः सुरत्नं समधातुसत्त्वम् ॥**[३२]

गुरुग्रहः सत्त्वगुणप्रधानो भवति कफपित्तवातानां मिश्रितप्रकृतिः भवति। कैश्चित् गुरोः कफप्रकृतिः मन्यते। " **कफात्मको गौर** " इति लघुजातके अस्ति।

मयाऽपि एवमेवानुभूयते यत् गुरुग्रहः कफात्मकः एव भवति। यतोहि प्रायः दृश्यते गुरोर्वशात् कफजन्यरोगादयः।

---

[२८] फलदीपिका अ.१४ श्लो. ५

[२९] वीरसिंहावलोकः क्षयाधिकारः श्लो. २

[३०] वीरसिंहावलोकः भगन्दारोगधिकारः श्लो. ३ पृ.४४०

[३१] वीरसिंहावलोकः

[३२] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो.६

यदा गुरुः रोगकारकः स्यात्तदा कर्णरोगः, गुल्मरोगः, ब्राह्मणशापवशात् कष्टो भवति –

**गुल्मान्त्रज्वरशोकमोह...........”**।[३३]

वस्तुतः गुरुः अजीर्णरोगस्य मुख्यकारको भवति। पुनः उदरे वायुरोगः नाम (Acidity) रोगं ददाति

**“अल्पोदराग्निपुंस्त्वः परिभूतो दुर्वलोलसः षष्ठे”।**
**स्त्रीवियुतो रिपुहता जीवे पुरुषोतिविख्यातः ॥**[३४]

अश्मरीरोगस्य शूलरोगस्य च कारको भवति गुरुः। अनन्तरं गण्डरोगकारकोऽपि गुरुः भवति अत्रापि थायराइड रोगः भवतीति मयानुमीयते।

**निवारणम् –**

गुरोः शान्त्यर्थम् अस्य वैदिकमन्त्रस्य जपः**“बृहस्पतये अतियद.......”** १९००० तथा च तिलघृतमिश्रित अश्वस्थस्य समिधाभिः होमः करणीयः।

पुनश्च वस्त्रदानं करणीयम्। मालतीपुष्पसर्पिषमिश्रितेन - उष्णजलेन स्नानं करणीयम्, यथोक्तं वीरसिंहावलोके-

**मालतीकुसुमशुभ्रसर्षपैः पल्लवैश्च मदयन्तिकोद्भवैः।**
**मिश्रमम्बुमधुकेन च स्फुटं वैकृतं गुरुकृतं निकृन्तति ॥**[३५]

अस्य दोषशमनार्थं हरेः उपासनाऽपि श्रेयस्करी भवति।

**शुक्रः –**

शुक्रस्य स्वभावविषये उक्तमस्ति यत्-

**शुक्रः शुभः स्त्री जलगोऽपराह्णः श्वेतः कफी रूप्यरजोऽम्लमूलम्।**
**विप्रोऽग्निदिङ्मध्यवयो रतीशो जलावनीस्निग्धरुचिर्द्विपाच्च ॥**[३६]

इत्यादिना शुक्रः कफप्रधानः रजोगुणी भवति।

यदा शुक्रः भवति रोगकारकः तदा प्रमेहः वीर्याल्पता तथा च स्त्री पुरुषेष्वपि जननेद्रियेषु रोगो भवति। तत्र प्रोस्टेट ग्रन्थौ अपि रोगो भवति। तत्र कफवायुजनितनेत्ररोगः शरीरस्यान्तरिके भागे

---

[३३] फलदीपिकाअ.१४ श्लो. ६

[३४] वीरसिंहावलोकः पृ.सं. ८२

[३५] वीरसिंहावलोकः पृ सं. ८३

[३६] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो. ६

शुक्र-रजः सम्बन्धिताः रोगाः उत्पद्यन्ते। तत्र स्त्रीषु रजोधर्मे या काऽपि विकृतिः भवति तत्र मुख्य कारकः शुक्रः एव मन्यते।

**पाण्डूश्लेष्म..........”**[३७]

शुक्रः यदा वक्री स्यात्तदा पौरुषत्वस्य हानिं करोति उक्तं यत् -

**याते वक्रग्रहर्क्षे जनुषि भृगुसुते मानवस्तोषदायी.......।**[३८]

अथ च

**अलसं सुखिनं स्थूलं पतितं मिष्टाशनं भृगोस्तनयः।**
**शयनोपचारकुशलं द्वादशगः स्त्रीजितं जनयेत्॥**[३९]

तत्र मेदवृद्धिमपि करोति शुक्रः।

**निवारणम् -**

शुक्रस्य वैकिकमन्त्रस्य जपः पञ्चगव्यपुष्पमिश्रितजलेन स्नानं करणीयम् लक्ष्मीदेव्याः उपासना करणीया।

**शनिः –**

शनिविषये उक्तमस्ति यत् -

**शनिविहङ्गोऽनलवन्यसन्ध्याशूद्राङ्गनाधातुसमः स्थिरश्च।**
**क्रूरः प्रतीची तुवरोऽतिवृद्धोत्करक्षितिट् दीर्घसुनीललोहम्॥**[४०]

इत्यादिना शनेः तमोगुणः वातप्रकृतिश्च भवति। यदा शनिः रोगकारको भवति तदा कुक्षिरोगः भृत्यात् कष्टः मनसि सन्तापः, पिशाचादिभिः पीडा भवति। सर्पाद्भयं, भ्रान्तिः पादयोः पीडा स्नायुरोगोभवति–

**वातश्लेष्मविकारपादविहतिं चापत्तितन्द्रश्रमान्,**
**भ्रान्तिकुक्षिरुगन्तरुष्णभृतकध्वंसं च पार्श्वाहतिम्।**

**भार्यापुत्रविपत्तिमङ्गविहतिं हृतापमर्कात्मजो**
**वृक्षाश्मक्षतिमाह कश्मलगणैः पीडां पिशाचादिभिः॥**[४१]

---

[३७] फलदीपिका रोगनिर्णयाध्यायः श्लो. ७

[३८] जातकालङ्कार (योगाध्याय श्लो-१९)

[३९] वीरसिंहावलोकः मेदोऽधिकारः श्लो. १

[४०] ताजिकनीलकण्ठी दृष्टिफलाध्यायः ग्रहस्वरूपम् श्लो. ७

[४१] फलदीपिका अ. १४ श्लो. ८

शनिवशात् मूत्रकृच्छ्ररोगोऽपि भवति-

**जन्मकाले यदा यस्य स्मरे भवति भास्करिः।**
**राहुदृष्टः प्रकुरुते मूत्रकृच्छ्रादिका रुजः ॥**[४२]

**निवारणम्-**

शनेः वैदिकमन्त्रस्य जपः शमीसमिधाभिः होमः, तिलमिश्रितजलेन स्नानं करणीयम्।

**असिततिलाञ्जनलोध्रबलाभिः शतकुसुमाघनलाजयुताभिः।**
**रवितनये कथितं विषमस्थे दुरितहृदाप्लवनं मुनिमुख्यैः ॥**

हनुमतः उपासनाऽपि करणीया।

वस्तुतः सर्वेषां कष्टकारकग्रहाणां दोषनिवारणार्थं तेषां रत्नधारणेन तेषाम् अधिपतिदेवस्य पूजनात् दोषस्य शमनं भवति अथवा न्यूनो भवति दोषः।

रोगनिर्धारणे ग्रहाणां बलाबलस्य निर्धारणम् अवश्यं करणीयम् यतोहि तेनाधारेण एव रोगः हानिकारको भवति।

वस्तुतः रोगाणां स्वतन्त्रेण अपि चर्चा दैवज्ञैः कृता वर्तते। तेषां वर्णनं ज्योतिषशास्त्रे विस्तृतरूपेण विद्यते। यथा स्वतन्त्ररूपेण हृदयरोगस्य कारणस्य विवेचनं स्नायुरोगस्य विवेचनम् इत्यादयः। तत्र ग्रहाः स्वदशायामेव शुभाशुभफलं ददति अर्थात् यस्य योगस्य कारको यो हि ग्रहो भवति स रोगः तस्य दशायां ज्ञातव्यम्-

**"करोति यद्भावगतः स्वपाके तद्भावजन्यं त्वशुभं शुभं वा"**

**इति शम्**

~~~~~*~~~~~*~~~~~*~~~~~

[४२] वीरसिंहावलोकः
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# शाब्दबोधे प्राधान्यविमर्शः

- डॉ. विदुषी बोल्ला[१]

व्याकरणेन प्रकृतिप्रत्ययबोधः प्रकृत्यर्थप्रत्ययार्थबोधः प्रकृत्यर्थप्रत्ययार्थयोश्च सम्बन्धबोधो जायते। प्रकृत्यर्थप्रत्ययार्थयोः बोधानन्तरं तत्तदर्थसम्बन्धे सति यः अर्थः बुद्ध्यते स एव शब्दजन्यः बोधः शाब्दबोधः। अस्मिन् शाब्दबोधे कतरस्य कतमस्य वा अर्थस्य प्राधान्यमित्यत्र उत्सर्गापवादभेदेन द्विविधो नियमः प्रसिद्ध्यति। अत्रोत्सर्गनियमस्तु – 'प्रकृत्यर्थप्रत्यार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यमि'ति अस्याऽर्थः – प्रकृत्यर्थस्य प्रत्ययार्थस्य च परस्परमन्वये सति प्रत्ययार्थस्यैव विशेष्यता प्रधानता भवति। यथा – 'पाचकः' इत्यत्र 'पाकक्रियाश्रय' इति वाक्यार्थे प्रत्ययार्थाऽऽश्रयस्य प्राधान्यं वर्त्तते। तथैव 'औपगवः' इत्यत्र 'उपगुसम्बन्ध्यभिन्नापत्यमि'ति शाब्दबोधे तद्धिताऽण्प्रत्ययार्थस्य[२] अपत्यार्थस्य विशेष्यताऽस्ति।

किन्तु उत्सर्गनियमोऽयं वाच्यार्थस्थले एव मान्यः। तथा हि अर्थस्तु द्विविधः – वाच्यार्थः, द्योत्यार्थश्च। एवञ्च वाच्यार्थस्थले एव प्रत्ययार्थस्य प्राधान्यम् उत्सर्गनियमेन भवति। अपरत्र द्योत्यार्थस्थले प्रत्ययार्थस्याऽप्राधान्यमेव। यथा – 'अजा' इत्यत्र 'स्त्रीत्वविशिष्टपशुविशेषः' इति शाब्दबोधे टाप्प्रत्ययार्थस्य स्त्रीत्वरूपद्योत्यार्थस्य अप्रधानत्वात् प्रकृत्यर्थे पशुविशेषे विशेषणतयाऽन्वेति।

अथेदानीम् उत्सर्गस्यास्य अपवादनियमोऽस्ति – 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति यास्कवचनम्। तिङन्तानि क्रियाप्रधानानि, सुबन्तानि द्रव्यप्रधानानि भवन्तीति एतदर्थः। एतेनापवादवचनेन तिङन्तस्थले क्रियायाः एव प्राधान्यं शाब्दबोधे अङ्गीकरणीयम्, न तु प्रत्ययार्थस्य आख्यातार्थस्य। **अत्राऽऽक्षेपः** – 'भावप्रधानमाख्यातमि'त्यत्र आख्यातपदेन तिङ्मात्रस्य ग्रहणम्। एवं 'भावस्य प्रधानमि'ति षष्ठिसमासात् 'क्रियायाः विशेष्यः तिङ्प्रत्ययः' इत्यनेन प्रत्ययार्थस्यैव प्राधान्यं बोध्यते, न तु प्रकृत्यर्थस्य धात्वर्थस्य। अनेन वचनोऽयं अनुवादः एव भवति, न तु अपवादः।

---

[१] सहायिकाचार्या, व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गिरसोमनाथः, गुजरातम् – ३६२ २६५, दू.स. – ९८१९१ १८०२४, ई-मेल – vidushisssu@gmail.com

[२] तस्यापत्यम् इत्यनेन षष्ठ्यन्तात् अपत्यार्थेऽण्प्रत्ययो विधीयते, ४-१-९२ पा.अ. पृ.सं.-३१

**समाधानम् –** आख्यातमित्यस्य यस्तिङ्गात्रमर्थः कृतः, तन्नोचितः, आख्यातस्य शब्दस्य तिङन्तवाचकत्वात्। अत्र प्रमाणम् – 'आख्यातमाख्यातेन क्रियासातत्ये' इति पाणिनीयं सूत्रम्। अत्र तिङ्गात्रस्य प्रयोगाभावात् आख्यातस्य तिङर्थत्वे समासविधानं व्यर्थं स्यात्। अतः आख्यातमित्यनेन तिङन्तमेव ग्राह्यम्। एवमेव षष्ठीतत्पुरुषाश्रयणमपि न सम्यक्, यतः उत्सर्गेणैव प्रकृत्यर्थप्रत्ययार्थयोरिति व्युत्पत्त्यैव निर्वाहे यास्ककृतं वचनं व्यर्थं स्यात्। तदेवं यास्कवचनमनुरुध्य 'भावप्रधानमि'त्यत्र 'भावः प्रधानं यस्मिन्, तत् आख्यातमि'ति बहुव्रीहिरेव वर्त्तते। अथ च तद्वचने आख्यातपदेन तिङन्तस्यैव ग्रहणं बोध्यम्। विषयममुम् एतेषु बिन्दुषु विभज्य विमर्श्यते। अत्र विवेच्यमानांशाः सन्ति –

- **प्रथमान्तार्थमुख्यत्वनिराकरणम्**
    - **तार्किकमते आपत्तयः, समाधानञ्च।**
        1. **मृगन्धावत्यापत्तिः।**
        2. **प्रयोगविलयापत्तिः।**
        3. **अत्र तार्किकद्वारा प्रदत्तं समाधानम्।**
    - **शाब्दिकद्वारा कृतखण्डनम्, स्वसिद्धान्तोपस्थापनञ्च।**
        1. **'अनभिहिते' इति सूत्रे परिगणनभाष्यम्।**
        2. **अनभिहिते इति सूत्रे परिगणनस्य प्रत्याख्यानभाष्यम्।**
        3. **मीमांसकाभिमतिः।**
        4. **शाब्दिकमते दोषाभावः।**
        5. **भाष्यप्रामाण्यम्।**
        6. **कारिकाप्रामाण्यम्।**
- **उपसंहारः।**

## प्रथमान्तार्थमुख्यत्वनिराकरणम्

आख्यातार्थे धात्वर्थो विशेषणम्, प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यात्। प्रथमान्तार्थे आख्यातार्थो विशेषणमिति तार्किकमतानुसारं पश्य मृगो धावतीति वाक्यात् अन्यदेशसंयोगानुकूलधावनानुकूलकृतिमन्मृगकर्म्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्व-मिति शाब्दबोधो जायते। शाब्दिकमते धात्वर्थव्यापारमुख्यविशेष्यक-

शाब्दबोधस्वीकारे मृगकर्त्तृकधावनकर्म्मकं प्रेरणाविषयीभूतं त्वत्कर्त्तृकं दर्शनमिति शाब्दबोधो भवति।

**तार्किकमते आपत्तिः –**

**१. मृगं धावत्यापत्तिः –**

तार्किकरीत्या बोधे मृगो धावतीत्यत्र विशेष्यार्थवाचकमृगशब्दः प्रातिपदिकमस्ति, दृशिक्रियायाः कर्म्म अपि वर्त्तते, अतः 'कर्म्मणि द्वितीये'[३]त्यनेन मृगशब्दे द्वितीयाऽऽपत्तिः स्यात्। तथाहि यथा 'धावन्तं मृगं पश्य' इति द्वितीयान्तप्रयोगो भवति, तथैव 'पश्य मृगं धावती'त्यस्याऽऽपत्तिः भवेत्, 'पश्य मृगो धावती'ति प्रथमान्तप्रयोगश्च न स्यात्।

**२. प्रयोगविलयापत्तिः –**

अप्रथमासमानाधिकरणेन[४] शतृप्रत्यये सति 'धावन्तं मृगं पश्य' इति प्रयोगः एव स्यात्। अप्रथमासमानाधिकरणे अर्थात् अप्रथमेत्यनेन द्वितीयान्तादिः गृह्यते। समानाधिकरणत्वञ्चात्र तद्वाच्यवाचकत्वरूपम्। 'पश्य मृगं धावती'त्यत्र तत्पदेन द्वितीयान्तं 'मृगमि'ति पदम्, तस्य वाच्यो मृगः, तद्वाचकत्वं लटः, यतो हि 'धावती'त्यत्र कर्त्र्थे लट्, तस्माल्लडर्थः कर्त्ता। 'धावती'त्यस्य कर्त्ता अत्र मृग एव। एवञ्च द्वितीयान्तेन, लटा चैत्रस्य मृगस्यैव बोधात् द्वितीयान्तार्थसमानमृग-रूपार्थवाचके लटि लटः 'शतृशानचावप्रथमासमानाधिकरणे'[५] इति शतृप्रत्ययापत्तिः स्यात्। शतृशानजोः नित्यादेशे 'पश्य मृगो धावती'त्यादिः तिङन्तद्वयघटितप्रयोगो विलीनः भवेत् इति दोषः।

**३. अत्र तार्किकद्वारा प्रदत्तं समाधानम् –**

अत्र तार्किको 'मृग'शब्दे द्वितीयापत्तिं वारयन्नाह – संसर्गमर्य्यादया विशिष्टार्थवाचकस्य अन्यदेशसंयोगानुकूलधावनानुकूलकृतिविशिष्टमृगरूपार्थस्य बोधकस्य 'धावति मृग' इति वाक्यस्यैव कर्म्मत्वम्, न तु पृथक्तया 'मृग' इत्यस्य, अतो मृगे कर्म्मत्वाभावान्न द्वितीयाऽऽपत्तिः।

**शाब्दिकद्वारा कृतखण्डनम्, स्वसिद्धान्तोपस्थापनञ्च**

'अनभिहिते'[६] इत्यधिकारसूत्रप्रकरणे कारकाभिधानं तिङ्कृत्तद्धितसमासैः इति परिगणय्य परिगणस्य यथा भाष्ये प्रत्याख्यानं कृतम्, तेन परिगणनेन तत्प्रत्याख्यानप्रतिपादकभाष्यरीत्या च मृगपदे द्वितीयापत्तिः भवत्येव।

---

[३] २-३-२ पा.अ. पृ. सं.-११

[४] लटः शतृशानचावप्रथमासमानाधिकरणे इत्यनेन लटः स्थाने शत्रादेशो विधीयते, ३-२-१२४ पा.अ. पृ. सं.-२१

[५] ३-२-१२४ पा.अ. पृ. सं.-२१

[६] २-१-३ पा.अ. पृ. सं.-११

### १. 'अनभिहिते' इति सूत्रे परिगणनभाष्यम् –

'अनभिहिते' इत्यधिकारसूत्रभाष्ये कृतः परिगणनप्रकारस्तु – 'कटं भीष्मं कुरु' इत्यादौ वाक्ये विशेष्यः कटः, विशेषणञ्च भीष्म इति, तत्र 'कर्तुरीप्सिततमं कर्म्म'[७] इत्यनेन विशेष्यस्य कटस्य कर्म्मत्वम्, कर्म्मणि द्वितीया इत्यनेन चाऽनुक्तकर्म्मणि कटे द्वितीया। तया द्वितीयया कर्म्मत्वस्योक्तत्वात् उक्तकर्म्मणि विशेषणे भीष्मशब्दे द्वितीया न स्यात्। अतोऽत्र सुपा कर्म्मत्वे उक्तेऽपि भीष्मशब्दे द्वितीयासाधनाय भाष्ये केन केन कारकस्योक्तत्वं मन्तव्यं तदर्थं परिगणनं कृतम्। तथा चाऽत्र परिगणितेषु तिङ्कृत्तद्धितसमासेषु केनाऽप्युक्तत्वाभावेन सुपा उक्तत्वस्याऽकिञ्चित्करत्वे भीष्मशब्देऽप्यनुक्तकर्म्मत्वे सिद्धे द्वितीया भवेदेव इति भाष्यकृतः परिगणनाभिप्रायो वर्त्तते।

### २. अनभिहिते इति सूत्रे परिगणनस्य प्रत्याख्यानभाष्यम् –

'कटं भीष्मं कुरु' इत्यत्र भीष्मशब्दे द्वितीयाविभक्तिसम्पादनायादौ उक्तत्वं परिगणय्य, तदनन्तरं परिगणनं विनापि भीष्मे द्वितीया सम्भवेति परिगणनस्य प्रत्याख्यानं भाष्यकृता कृतम्। अत्रोच्यते भाष्यकारैः – सर्वेषां कारकाणां साक्षात्, स्वाश्रयद्वारा वाऽरुणाधिकरणन्याय्येन क्रियायामन्वयो भवतीति। एवं प्रकृतेऽपि भीष्मस्य पूर्वं करणक्रियायामन्वयः, क्रियान्वयित्वात् तस्य कर्म्मत्वं सुलभम्, पश्चाच्च कटशब्देन सह विशेष्यविशेषणभावेनाऽन्वयः। यदि पूर्वं कटेन भीष्मस्याऽन्वयो भवेत्, तदैव कटशब्दोत्पन्नद्वितीयया कर्म्मत्वोक्तिप्रसङ्गः। अत्र तु क्रियान्वयकाले कर्म्मत्वप्राप्तिसमये स एकाकी एव, अतो नान्ययाऽसम्बद्धया कटनिष्ठद्वितीयया भीष्मनिष्ठकर्म्मत्वस्योक्तिः, तया द्वितीयया कटनिष्ठकर्म्मत्वस्य केवलमुक्तत्वमिति भावः। तदेवं समेषां कारकाणां विशेष्यात् पूर्वं क्रियान्वयस्वीकारात् भीष्मशब्देऽपि विशेष्यवत् करणक्रियान्वयित्वात् कर्म्मकारकत्वं सम्भवम्, अतो न परिगणनापेक्षा। तथा च विशेष्यं विशेषणं वा भवतु, तयोः पूर्वं क्रियायामेवान्वयः, पश्चात् वाक्यार्थबोधकाले तयोः विशेष्यविशेषणभावेन भीष्मकटयोः परस्परमन्वयः एव पार्ष्णिकः अर्थात् पश्चाज्जायमानोऽन्वयः उच्यते।

### ३. मीमांसकाभिमतिः –

उपर्य्युक्तपार्ष्णिकान्वय एव मीमांसकैः अरुणाधिकरणे ज्योतिष्टोमप्रकरणे स्वीकृतः। अत्र 'अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति' इत्यत्र अरुणया इति करणकारकस्य 'क्रीणाति' इति क्रियायामन्वयः सम्पाद्यते, तदनन्तरमेव विशेष्यविशेषणयोः पिङ्गाक्ष्यरुणयोः अन्वयः मीमांसकैः स्वीक्रियते।

---

[७] १-४-४९ पा.अ. पृ. सं.-७

तस्माद् 'धावति मृग' इत्यत्र विशिष्टस्य कर्म्मत्वेऽपि धावनरूपविशेषणस्य, मृगरूपविशेष्यस्य च कर्म्मत्वम्। तत्र धावनार्थवाचकस्य 'धावती'त्यस्य प्रातिपदिकत्वाभावात्, मृगे विशेषणत्वेन साकाङ्क्षत्वात् अन्यत्र दृशिक्रियायां निराङ्क्षत्वाच्च दृशिक्रियासम्बन्धाभावात् क्रियान्वयित्वरूप-कर्म्मत्वाभान्न द्वितीयोत्पत्तिः। किन्तु मृगशब्दात् द्वितीयापत्तिस्तु भवेदेव।

**४. शाब्दिकसिद्धान्ते दोषाभावः –**

अस्मन्मते धात्वर्थव्यापारमुख्यविशेष्यकशाब्दबोधः, तदनुसारं 'पश्य मृगो धावती'ति वाक्यात् 'मृगकर्तृकधावनकर्म्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमि'ति बोधो जायते। अत्र विशेष्यद्वयम् – धावनम्, दर्शनञ्च। किन्तु धावनमित्यस्य दर्शने विशेषणत्वात्, मृगकर्त्त्रपेक्षयाऽस्य विशेष्यत्वेऽपि न मुख्यविशेष्यत्वम्। यत् कस्याऽपि विशेषणं न भवति किन्तु विशेष्यमेव तदेव मुख्यविशेष्यत्वमुच्यते। मृगकर्त्तृकधावनकर्म्मकं प्रेरणाविषयीभूतं त्वत्कर्त्तृकं दर्शनमिति शाब्दबोधाऽऽकारस्य विवरणम् एवमस्ति – 'धावती'त्यत्र तिबर्थकर्त्तरि मृगस्याऽभेदेन, कर्त्तुश्च स्ववृत्तित्वसम्बन्धेन धावने, दृशिक्रियायां धावनस्य कर्म्मत्वात् स्वकर्म्मकत्वसम्बन्धेन धावनस्य दर्शने, लोडर्थप्रवर्त्तनारूपप्रेरणायाश्च विषयत्वसम्बन्धेन दर्शने, 'पश्ये'त्यत्र सिबर्थकर्त्तरि आक्षिप्तयुष्मदः अभेदेन, तत्कर्त्तुश्च स्ववृत्तित्वसम्बन्धेन दर्शने अन्वयः। इह 'मृगो धावती'त्यस्य सत्यपि कर्म्मत्वे, विशेष्यभूतस्य धावनरूपार्थस्य वाचकस्य 'धाव' इत्यस्य धातुत्वेन 'अर्थवदधातुरप्रत्ययः प्रातिपदिकमि'[८]ति सूत्रेण प्रातिपदिकत्वाभावान्न स्वाद्युत्पत्तिः, अतो न द्वितीया। द्वितीयाभावेऽपि पदसमभिव्याहाररूपायाः आकाङ्क्षायाः ज्ञानेन कर्म्मत्वं भासते।

**(क) भाष्यप्रामाण्यम् –**

तिङन्तद्वयघटितवाक्येषु एकस्य मुख्यत्वमित्यत्र भूवादयो धातवः इत्यत्र पचिप्रभृतयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति भाष्यमेव प्रमाणम्। अत्र तिङन्तद्वयघटितवाक्ये पचति भवति इत्यत्र भवति इत्यस्य पचति इति कर्त्तृरूपं विशेषणम्, प्रधानन्तु भवतिक्रियैव। एवञ्च पचति भवति इत्यतः एककर्त्तृकपाकक्रियाकर्त्तृका सत्ता इति बोधो भवति।

**(ख) कारिकाप्रामाण्यम् –**

एवञ्च भर्त्तृहरेः कारिकाऽपि प्रमाणरूपेण स्वीक्रियतेऽत्र -

सुबन्तं हि यथाऽनेकतिङन्तस्य विशेषणम्।

तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम् ॥ इति ॥

---

[८] १-२-४५ पा.अ. पृ. सं.-४

भर्तृहरिणाऽप्युक्तम् – चैत्रः, तण्डुलम् इत्यादि अनेकं सुबन्तं यथा एकस्य पचति इत्यादेः तिङन्तस्य विशेषणं भवति, तथैव अनेकं तिङन्तमपि एकस्य तिङन्तस्य विशेषणं भवतीति।

**उपसंहारः**

एवञ्च पूर्वोक्तानुरूपं प्रकृत्यर्थधात्वर्थक्रियायाः एव प्रधानतया स्वीकारे दोषाभावात्, तत्र भाष्यकृतः भर्तृहरेश्च सम्मतित्त्वात् प्रकृत्यर्थप्रत्ययार्थयोः प्रकृत्यर्थस्य प्राधान्यस्वीकारे नास्ति दोषलेशः। तदेवोक्तं यास्केनापि 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति विशेषशासनम्। अत एव अभियुक्तैः आचार्यैः 'प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्य प्राधान्यम्' इति उत्सर्गनियमस्य यास्कवचनमिदं 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' अपवादभूतमिति अङ्गीक्रियते। यास्कवचनस्य अपवादत्वेनास्वीकारपक्षेऽपि प्रकृत्यर्थः धात्वर्थः एव प्रधानतया शाब्दबोधे बुद्ध्यते। तदर्थं नियमस्वरूपे किञ्चिद् विपरिणामः कर्त्तव्यः – 'प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्याप्राधान्यमि'ति। अनेन तिङन्तस्थले प्रकृत्यर्थस्य धात्वर्थस्य प्रधानता लक्ष्यते। एवञ्च कृदन्ततद्धितान्तस्थले तु प्रकृत्यर्थप्रत्ययार्थयोः प्रत्यार्थस्य प्राधान्यमिति गृह्णीयात्।

## सहायकग्रन्थसूची


१. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः – सूर्यनारायणशुक्लः, रामगोविन्दशुक्लः, चौखम्भासंस्कृतसंस्थानम्, वाराणसी, प्रथमसंस्करणम्, २००६

२. वाक्यपदीयम् (ब्रह्मकाण्डम्), सम्पादकः, व्याख्याकारश्च – आचार्य्यवेदान्तझाः, मन्दाकिनीसंस्कृतविद्वत्परिषद्, देहली, प्रथमसंस्करणम्, २००२

३. व्याकरणमहाभाष्यम्, सम्पादकः – श्रीगुरुप्रसादशास्त्री, प्रतिभाप्रकाशनम्, देहली, प्रथमसंस्करणम्, १९८३

४. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः – श्री प. ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, २००५

५. परमलघुमञ्जूषा, सम्पादको व्याख्याकारश्च – प्रो. बोधकुमारझाः, हंसाप्रकाशनम्, जयपुर, संस्करणम्, २०१८

६. लघुशब्देन्दुशेखरः, सम्पादकः – प्रो. बालशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम्, २०१३

७. समासस्तदव्ययीभावश्च, प्रो. बोधकुमारझाः, विद्यानिधिप्रकाशनम्, देहली, प्रथमसंस्करणम्, २०११

८. प्रौढनिबन्धसौरभम्, आचार्यविश्वनाथमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्रम्, जयपुर, प्रथमसंस्करणम्, २००३

९. तत्त्वबोधिनीसमाख्यव्याख्यासंवलिता सिद्धान्तकौमुदी, चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, संस्करणम्, २०१०

१०. वैयाकरणभूषणसारः प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः – श्रीबालकृष्णपञ्चोली, चौखम्बा-संस्कृतसंस्थानम्, संस्करणम्, वि.संण २०६८, ई. २०१२

११. परमलघुमञ्जूषा, भावप्रकाशिका, बालबोधिनी संस्कृतहिन्दीव्याख्योपेता, व्याख्योपेता, व्यख्याकारः सम्पादकश्च – डॉ. जयशङ्करलालत्रिपाठी, चौखम्बाकृष्णदासअकादमी, वाराणसी, चतुर्थसंस्करणम्, २००११

१२. संस्कृतभाषाविज्ञानम्, अनुसन्धाता – चक्रवर्ती श्रीरामाधीनचतुर्वेदी, चौखम्बाविद्याभवनम्, वाराणसी, प्रथमसंस्करणम्, २००५


~~~~~*~~~~~*~~~~~*~~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# गर्भसंस्कारे गर्भसंवादस्य महत्त्वम्

- डॉ. भैरवी दीक्षितः[१]

## सारांश:

गर्भसंस्कारप्रक्रिया अस्माकं शास्त्रेषु दर्शिता प्राचीना शास्त्रीया वैज्ञानिकप्रक्रिया अस्ति। अस्माकं शास्त्रेषु वयं बहूनि उदाहरणानि प्राप्नुमः यत् गर्भसंस्कारप्रक्रियाद्वारा बालकः अधिकांशं शिक्षां गर्भे एव प्राप्नोति। बालः गर्भस्थः भवति तदा आरभ्य बालकः अनेकविधशिक्षासु, अनेकेषु कार्येषु निपुणः वा कुशलः अभवत्, यदि वयं गर्भसंस्कारप्रक्रियायाः सामान्यार्थं पश्यामः तर्हि वयं सर्वे जानीमः यत् वयं यत् किमपि वदामः, कर्म च यत् किमपि वयं मन्यामहे तस्य प्रत्यक्षः प्रभावः अस्माकम् उपरि भवति। अत एव अस्माकं ज्येष्ठाः विद्वांसः ऋषयश्च सदैव ''सकारात्मकचिन्तनं कुर्वन्तु, सुष्ठु वदन्तु'' इति वदन्ति यतोहि अस्माकं भारतीयसंस्कृतेः अनुसारं वयं यत् किमपि वदामः तस्य शब्दस्य उपमा ब्रह्मणा सह कुर्मः तथा च यदा ब्रह्म अमराविनाशिदिव्यतत्त्वं भवति तदा यत् किमपि वदामः तत् ब्रह्माण्डद्वारा प्रतिध्वनितम् अस्ति। वर्षसहस्राणि यावत्, अस्माकं जीवने च तानि एव वचनानि प्रायः सत्यानि ध्वनयन्ति।

एवं भारतीयसंस्कृतिः सकारात्मकशक्तिः सत्कर्म इति आदर्शैः सह चलति तथा च सर्वदा सद्भाष्य-सद्विचार-सद्गुणश्च यथा मनुष्यः यत् किमपि करोति तत् कदाचित् तस्य जीवने साकारं भवति तथा च तस्य कृतं कर्म कदाचित् पुनः तस्य समीपम् आगच्छति अतः अस्माकं संस्कृतिः सकारात्मकस्पन्दनेषु सकारात्मकशक्तिषु च अधिकं ध्यानं ददाति। तस्य महत्त्वं च व्याख्यायति, तत्र प्रत्येकं व्यक्तेः जीवनं तेषाम् आहारैः, व्यवहारैः, शब्दैः च प्रभावितं भवति। अपि च, अस्माकं भारतीयसंस्कृतेः अपि पुनर्जन्मनः सिद्धान्ते विश्वासः अस्ति, अतः उक्तं यत् यदि काचन व्यक्तिः अस्मिन् जन्मनि स्वस्य कर्मफलं न प्राप्नोति तर्हि अन्यस्मिन् जन्मनि अपि प्राप्स्यति, अतः कस्याश्चित् व्यक्तेः व्यवहारः, वाक्, आहारः, सर्वं एतेषां वस्तूनि व्यक्तेः जीवनं प्रभावयति। अत्र गर्भसंस्कारः किमर्थम् आवश्यकः, तस्य महत्त्वं किम्? तथा च गर्भसंस्कारस्य भ्रूणस्य उपरि कः प्रभावः ? इति प्रकाशयामः।

[१] सहायक प्राध्यापिका (संस्कृतम्), चिल्ड्रन्स यूनिवर्सिटी, गान्धीनगरम्, गुजरातम्

## प्रास्ताविकम्

भारतीयजीवने संस्कारस्य महत् महत्त्वम् अस्ति। संस्कारस्य जीवनेन सह निकटः सम्बन्धः भवति। पूर्वसंस्काराः वा पूर्वजन्मसंस्काराः सन्ति तथा च मृत्योः अनन्तरम् अपि संस्कारपरम्परा बहुजन्मपर्यन्तं स्थास्यति। मनुष्यस्य संस्कारः न केवलं तस्य जीवनेन सह सम्बद्धः भवति, अपितु संस्कारस्य गभीरः प्रभावः तस्य परिवारे, गोत्रे च भवति। यत् वयं पारिवारिकपरम्परा वा पारिवारिकसंस्कृतिः इति वदामः। संस्कारस्य परम्परा, प्रभावः च अद्वितीयः अस्ति।

हितोपदेशे उक्तं यत्

**यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत।**
**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते॥**
**(पं. नारायण)**[२]

अर्थात् अपक्वमृत्तिकाघटस्य पाकप्रक्रियायाः अनन्तरं प्रयुक्तायाः परिकल्पनायाः निहितस्थायित्वात् नैतिकविज्ञानं बालकानां कृते अनेककथानां माध्यमेन प्रदत्तं भवति, यतः बालकाः तेभ्यः प्रस्तुतां सूचनां धारयितुं प्रवृत्ताः भवन्ति तेषां गठनवर्षेषु आकर्षकरूपेण। अभ्यासप्रक्रियाद्वारा संस्काराः आरभ्यन्ते। निरन्तरम् अभ्यासद्वारा व्यक्तिषु विविधकार्यं कर्तुं परिचित्तता, प्रवीणता च विकसिता भवति। तदनन्तरं पुनः पुनः अभ्यासेन प्रक्रिया इति निर्दिश्यते। एकदा अस्माकं जीवने कश्चन व्यवहारः गभीररूपेण निहितः भवति तदा सः संस्कृतेः समः अलङ्कृतः भवति। एकदा पुनः संसर्गस्य अनन्तरं व्यवहारः सहजप्रतिक्रियारूपेण निहितः भवति तदा सः प्रकृतिः इति निर्दिश्यते।

संस्कारस्य संवर्धनं महत्त्वपूर्णं यतः दोषशुद्धिः केवलं चेतनप्रयत्नेन एव सम्भवति, यदा तु स्वभावः एकः सहजः व्यवहारः यस्य परिहारः आवाहनात्मकः भवति, यद्यपि एतादृशाचरणस्यातिक्रमणम् अपि सम्भवति परन्तु विवाहातिरिक्तप्रकरणेषु प्रवृत्तिं प्रदर्शयितुम् आवाहनं भवति।

जीवनस्य निहितं महत्त्वं धनसञ्चयस्य, चरित्रस्य विकासस्य, सामाजिकसंरचनानां स्थापनायाः च आधाररूपेण कार्यं करोति। मनोवैज्ञानिकः फ्रांसिस् मेरिल् इत्ययं स्वस्य पुस्तके "द सीक्रेट् सेल्फ्" इति कथनं करोति यत् वयं यान् संस्कारान् निरन्तरं विकसितवन्तः ते संस्काराः अस्माकं व्यक्तित्वस्य आकारं ददति। संस्कारस्य बलं महत्त्वं च एतत् अवलोकनेन प्रदर्शितं भवति यत् यत्र व्यक्तिः व्यापकावधारणां स्वीकर्तुं स्वयमेव प्रयत्नं करोति, तत्र संस्काराः यान्त्रिकसञ्चालनस्य

---

[२] पण्डित नारायण, हितोपदेश

सुविधां कुर्वन्ति सर्वेभ्यः शारीरिककार्यस्य सुविधां ददाति मानवशरीरं चेतनसंज्ञानात् स्वतन्त्रतया कार्यं करोति, मुख्यतया जैविकप्रक्रियाभिः प्रभावितं भवति।

**जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते।**
**वेद-पाठी भवेद्विप्रः ब्रह्म जानाति ब्राह्मणः।।**[३]

स्कन्दपुराणस्य अनुसारं षोडशोपाचरभक्तेः परिधिमध्ये ब्रह्मणा अष्टमे प्रवचने नारदस्य ज्ञानं प्रदत्तम्। हिन्दूधर्मे पारम्परिकसामाजिकपदानुक्रमानुसारं व्यक्तिः प्रथमं जन्मना शूद्रत्वेन वर्गीकृता भवति। परन्तु सांस्कृतिकपालनद्वारा पवित्रसूत्रसमारोहं कृत्वा द्विजपदवीं प्राप्तुं शक्यते। अपि च वेदाध्ययने प्रवृत्ता व्यक्तिः विद्वान् सूचयति विप्रस्य माननीयं पदमारोहितुं शक्नोति। अन्ते यस्य ब्रह्मणः परमं यथार्थस्य गहनं ज्ञानं भवति सः ब्राह्मणः इति ज्ञायते।

पारम्परिकहिन्दूसमाजस्य ब्राह्मणक्षत्रियजाती प्रमुखौ सामाजिकसमूहौ स्तः। प्रश्ने व्यक्तिः विशनः अस्ति।

**ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।**
**कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।**[४]

श्रीमद्भगवद्गीतायां १८ अध्याये ४१ श्लोके व्यक्तीनां कर्माणि तेषां निहितगुणप्रवृत्तिभिः प्रभावितानि इति उक्तम् अस्ति।

**संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा॥**[५]
-ब्रह्मसूत्र भाष्यम् १/१/४

संस्कृतसाहित्ये 'शुद्धिः' अर्थे संस्कारशब्दस्य प्रयोगः भवति। महाकविः कालिदासः 'कुमारसम्भवम्' इति महाकाव्ये उल्लिखति यत्।

**'संस्कारवत्येव गिरामनीषी तया स पूतश्च विभूषितश्च' (कुमारसम्भवम् १-२८)**[६]

अभिज्ञानशाकुन्तलम् नाटके कालिदासस्य वचनम् उपयुक्तं प्रतीयते-

**स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते।**[७]

---

[३] यास्काचार्यकृतं निरुक्तम्

[४] श्रीमद् भगवद्गीता १८-४१

[५] ब्रह्मसूत्रभाष्यम् १/१/४

[६] कुमारसम्भवम्, सर्गः १, श्लोकः - २८

[७] अभिज्ञानशाकुन्तलम्, कालिदास, अंक ६, पृष्ठ ३६०

गर्भसंस्कारः केवलम् अनुष्ठानं वा संस्कारः न भवति अपितु गर्भसंस्कारस्य प्रक्रिया एका विशाला प्रक्रिया अस्ति यस्यां मातुः आहारः, व्यवहारः, विचाराः, क्रियाकलापाः, परिवेशः, मातुः मनोभावाः, भावाः, आवेगाः च सर्वे भ्रूणं प्रभावयन्ति अत एव अस्माकं प्राचीनशास्त्राणि वदन्ति, अस्माकम् ऋषयः, अस्माकम् आयुर्वेदः च, अस्माकं वृद्धाः गर्भवतीं वदन्ति यत् आध्यात्मिकशास्त्राणि पठन्तु, सर्वदा सुखिनः भवेयुः, नित्यं पुण्याः भवेयुः, यावत्कालं यावत् शक्नुवन्ति तावत् सात्त्विकं, पौष्टिकं, पर्याप्तं च भोजनं खादन्तु। उपदेशः यथा सर्वदा यत्र मनः सुखी भवति तत्र गन्तव्य, विशेषतः मन्दिरादिषु गन्तव्यम्।

मातुः प्रत्येकं पक्षे भ्रूणस्य उपरि प्रभावः भवति। एषः प्रभावः भ्रूणस्य विकासे अपि दृश्यते। एवं बालस्य समग्रविकासे अर्थात् मानसिक-शारीरिक-आध्यात्मिक-भावनात्मके च भ्रूणसंस्कारः अतीव महत्त्वपूर्णा प्रक्रिया अस्ति मानवस्य विकासाय। विज्ञानम् अपि स्वीकरोति यत् अनेकेषु अध्ययनेषु अपि ज्ञातं यत् भ्रूणसंस्कारप्रक्रियायाः अजे बालके निश्चितः प्रभावः भवति। गर्भसंस्कारप्रक्रियायाः बालस्य DNA परिवर्तनस्य शक्तिः भवति अतः गर्भसंस्कारप्रक्रिया बालस्य व्यक्तित्वविकासं प्रभावितं कुर्वती महत्त्वपूर्णा प्रक्रिया अस्ति।

गर्भसंस्कारप्रक्रियायाः प्रभावं महत्त्वं वा ज्ञातुं अस्माकं शास्त्रेषु दत्तानां बहूनाम् उदाहरणानां माध्यमेन वयं गर्भसंस्कारप्रक्रियायाः महत्त्वम् अवगच्छामः। वयं सर्वे भक्तप्रह्लादस्य नाम श्रुतवन्तः। भक्तप्रह्लादस्य पिता दैत्यराजः हिरण्यकशिपुः राक्षसः आसीत्, परन्तु गर्भसंस्कारप्रक्रिया एतावती प्रभावशीला आसीत् यत् राक्षसराजस्य गृहे श्रीहरिविष्णुनारायणं प्रति दृढश्रद्धायुक्तः दृढविश्वासी च भक्तशिरोमणिः जातः। गर्भसंस्कारस्य प्रक्रिया कियती प्रभावयुक्ता इति अवगन्तुं प्रह्लादस्य मातुः गर्भकाले याः घटनाः परिस्थितयः च सम्मुखीकृताः, तासां विषये ज्ञानम् अतीव महत्त्वपूर्णम् अस्ति।

यदा प्रह्लादः मातुः गर्भे एव आसीत् तदा इन्द्रः हिरण्यकशिपोः निर्दोषं हिरण्यकशिपुपत्नीं प्रह्लादमातरं च अपहृतवान्। नारदमुनिस्तत्र आगच्छति, इन्द्रं राजानं व्याख्याय यत् स्त्रियाः अपहरणं भवतः कृते न हितकरं दृश्यते इति। यदा स्त्री गर्भवती भवति तथा च यदा तस्याः पतिः न भवति तदा गर्भवत्याः रक्षणम् ऋषीणां, समाजस्य, राज्ञः वा दायित्वं भवति।

नारदः इन्द्रदेवं वदति यत् यदि भवान् आज्ञापयति तर्हि अहं कयाधुं मया सह तपोवनं नेष्यामि। तपोवने एतादृशं वातावरणं प्राप्यते यत्र ऋषि-प्रकृति-सन्निधौ निरन्तरं मन्त्र-श्लोक-स्तोत्र-श्रवणं, ध्यानं, चिन्तनं च कर्तुं शक्यते। आश्रमे भगवान् श्रीहरिनारायणः अर्थात् भगवन्तं विष्णुं प्रति निरन्तरं भक्तिवातावरणं सिद्ध्यति। येन गर्भिणीमातुः गर्भस्थः बालकः प्रबलप्रेम्णा शतप्रतिशतं विष्णुभक्तः भवति। यः बालकः गर्भात् एव भगवतः दृढभक्तिसंस्कारं, न जगतः शक्तिं, न प्रलोभनानि वा कस्यापि प्रकारस्य दुःखं वा लब्धः, सः तं भगवतः भक्तिमार्गात् वा विमुखं कर्तुं

शक्नोति। इन्द्रः एतत् श्रुत्वा नारदमुनिं गर्भवतीं कयाधुं स्वेन सह वनं नेतुम् आह, नारदः च कयाधुं स्वेन सह पूर्णदायित्वं स्वीकृत्य वनं नीतवान्। तत्र सा प्रकृतेः अङ्के सुन्दरं प्राकृतिकं वातावरणं प्राप्य सततं मुनिभिः परिवृता भवति, जप-तप-पाठ-श्रवण-ध्यान-चिन्तन-मन्त्र-श्लोक-स्तोत्राणां मध्ये तस्याः गर्भे भक्तिः भवति। स्वयं राक्षसपत्नी आसीत् चेदपि तस्याः मनसि आसीत् यत् मम बालकः दृढश्रद्धावान्।, ईश्वरभक्तियुक्तः च भविष्यति, अतः सा तादृशस्य सुन्दरस्य तपस्वीवनस्य आध्यात्मिकवातावरणे, साधुमुनिसङ्गमे च आत्मानं गर्भं कृतवती। अतिरिक्ते, यदा यदा कालः भवति तदा नारदद्वारा दत्तं गुरुमत्र "ॐ नमो भगवते वासुदेवाय" इति मन्त्रं सा निरन्तरं जपति स्म। मन्त्रोऽयं तस्याः मनसि निःश्वासैः सह च किमपि कर्म कर्तुं पूर्वमपि प्रवणः आसीत्।

मातुः एतादृश्यः सुन्दर्यः क्रियाकलापाः, एतादृशे सुन्दरे वातावरणे तस्याः गर्भकालः व्यतीतः इति कारणात् एव अस्माकं कृते एतादृशः बालभक्तः प्रह्लादः स्थिरभक्त्यादिगुणयुक्तः भक्तः प्राप्तः। प्रह्लादजी जन्मसमये अपि नारदजी मातुः कृते वातावरणं प्रदत्तवान् यत् मातुः हृदये अद्वितीयं दृढभक्तिबीजं रोपयति स्म। अस्मात् कारणात् प्रह्लादस्य इत्यस्य अपि अत्यल्पवयसा एव नवधाभक्तिविषये गहनं ज्ञानम् आसीत्। पितुः राज्यम् आगत्य अपि प्रथमं पिता तस्मै बहुप्रलोभनानि दत्तवान्।

यदि साधारणः बालकः अस्ति तर्हि सः अवश्यमेव प्रलोभनेषु पतति स्म, परन्तु एषः नारदमुनिः इव अचञ्चलभक्तियुक्तः गुरोः शिष्यः, यः गर्भावस्थायां भगवतः अचञ्चलभक्तिं प्राप्तवान्, अतः प्रलोभनानां तस्य प्रभावः सर्वथा न अभवत्। तदनन्तरं तस्य पिता तस्मै अनेकानि संकटानि दर्शितवान् यस्मात् सामान्यबालकः अवश्यमेव भयं प्राप्स्यति परन्तु एषः तु एकः भक्तः, भगवतः भक्तः आसीत् यस्य प्रत्येकं कणे भगवतः श्रीहरिविष्णोः दर्शनं भवति स्म, गर्भे अपि श्लोकान्, मन्त्रान्, स्तोत्रान् च श्रृणोति स्म, नित्यं भक्तः च आसीत्। अतः सः केनचित् घोरभयेन कम्पितुं वा भयभीतः वा भवितुं न शक्तवान्। ईश्वरस्य भक्तिः अस्मभ्यम् अनेकानि वस्तूनि ददाति परन्तु तस्मात् अधिकं महत्त्वपूर्णं दानं यदि अस्ति तर्हि अभयम् अस्ति। न भक्तो नरो लोके केनचित् प्रकारेण भयेन प्रभावितः। प्रह्लादवधार्थं तस्य पित्रा अपि अनेकानि षड्यन्त्राणि कृतानि आसन्।

हिरण्यकशिपुसदृशः निर्दयः राजा, अदायित्वपूर्णः पिता च अस्य सुन्दरस्य कोमलस्य च बालकस्य कृते बहु क्रूरः निर्दयी जातः बहु अत्याचारं कष्टानि वा दत्तवान्। तथापि, स्वयं जगत्पतिः श्रीहरिविष्णुनारायणः यस्य पिता, तस्य का चिन्ता?

भक्तराजप्रह्लादः अपि स्वपितरम् अतीव अल्पवयसि एव बोधयति यत् भवन्तः यत् किमपि कुर्वन्ति यत् किमपि पश्यन्ति तत् वस्तुतः भगवतो विष्णुनारायणस्य प्रेमसमानः। अतः तस्य शरणं उत्तमम् अस्ति। भगवतः विष्णोः शरणे यत्किमपि पतितं भवति तत् शुद्धं भवति तथा च अस्माकं सर्वेषां गन्तव्यं ईश्वरपर्यन्तम् एव, अतः भवता अपि विष्णोः पूजा कर्तव्या। परन्तु हिरण्यकाशिपुः

एतत् न स्वीकरोति अन्ते भगवान् नारायणः स्वयं नृसिंहस्य अवतारं गृहीत्वा हिरण्यकशिपुं हन्ति। अतः अस्याः कथायाः वयं निश्चितरूपेण अवगन्तुं शक्नुमः यत् अस्माकं भक्तराजस्य पिता हिरण्यकशिपुः इव किमर्थं तत्र अवतारितवान् यतः तस्य माता सकारात्मकं प्राकृतिकम् आध्यात्मिकं च वातावरणं प्राप्स्यति। ऋषि-सन्त-सन्निधेः नित्यं मन्त्र-स्तोत्र-श्लोक-पाठात्, नारदजी-सदृशा सद्गुरुणा प्रदत्त-ध्यान-भक्ति-ज्ञानात् , भगवन्तं विष्णुं प्रति दृढ़विश्वासस्य अवरोहणं प्रह्लाद-सदृशस्य सद्गुण-बालकस्य कृते सम्भवोऽभवत्।

अस्माकं भ्रूणविज्ञानस्य शास्त्रीयवैज्ञानिकप्रक्रियानुसारं बालकः वस्तुतः गर्भात् एव शिक्षां प्राप्नोति। संस्कारः गर्भात् एव बालेन शिक्ष्यते। गुणसेचनं च बाले गर्भात् एव आरब्धम्। एतत् प्रह्लादस्य उदाहरणेन पुष्टिं कर्तुं शक्यते। कदाचित् एतत् एकम् उदाहरणमपि गर्भसंस्कारप्रक्रियायाः प्रभावाय बलाय वा पर्याप्तम्।

अस्माकं शास्त्रेषु एकम् उदाहरणं प्राप्नुमः यत् बालकः न केवलं गर्भे एव ज्ञानं प्राप्नोति अपितु गर्भे अपि प्रतिक्रियां वा उत्तरं वा दातुं शक्नोति।

एतादृशम् एकम् उदाहरणम् अस्ति अस्माकं भारतीयऋषिः अष्टावक्रः यः ज्ञानस्य प्रतीकं मन्यते। तस्य व्यक्तित्वेन ज्ञानेन च वयं मनुष्यस्य शारीरिकदोषाः कष्टानि वा तस्य ज्ञानस्य कान्तिना आच्छादितानि इति अपि अवगच्छामः। तस्य ज्ञानस्य कान्तिः एतावती प्रबला अस्ति यत् जनाः तस्य प्रभावं प्राप्नुवन्ति तस्य दोषान् वा तस्य रूपं वा द्रष्टुं विस्मरन्ति।एवं ज्ञानं व्यक्तित्वं परिष्कृतं बहु महत्त्वपूर्णं तत्त्वं भवति अतः अष्टावक्रस्य कथां ज्ञास्यामः।

प्राचीनकाले उद्दालकः नाम महान् विद्वान् आसीत्, यस्मात् ज्ञानं प्राप्तुं प्रायः प्रत्येकं ज्ञानिनः स्वप्नः आसीत्, तस्य ज्ञानं सूर्यवत् उज्ज्वलम् आसीत्, अनेके शिष्याः ज्ञानं प्राप्तुम् ऋषि-उद्दालकं प्रति आगच्छन्ति स्म। ऋषि अष्टावक्रस्य पिता ऋषिकहोलः स्वपुत्रस्य अपेक्षया अधिकं ज्ञानं प्रज्ञा च धारयति इति स्वीकृतवान्। अस्याः घटनायाः पृष्ठतः तर्कः अस्य तथ्यतः उद्भूतः यत् ऋषिः अष्टावक्रः स्वस्य प्रसवपूर्वपदे अपि वेदोपनिषत्सांख्यदर्शनशास्त्रादिविषयसहितां विस्तृतां प्रज्ञां निरन्तरम् आत्मीभावमकरोत्।

प्रसवपूर्वविकासकाले भ्रूणं स्वपर्यावरणात् विविधप्रोत्साहनानां सम्पर्कं प्राप्नोति, यथा मातुः क्रियाकलापाः, वार्तालापाः, आवेगाः, व्यवहाराः च यदा उपदेशं कर्तुम् इच्छन् जनः विधिपूर्विकां पद्धतिं स्वीकरोति तदा गर्भान्तर्गतः गर्भः पाठ्ये विषये उच्चस्तरीयां प्रवीणतां प्राप्नोति।

प्रसिद्धस्य तबलावादकस्य जाकिर् हुसैनस्य नाम बहुसंख्यकव्यक्तिभिः व्यापकरूपेण स्वीकृतम् अस्ति। प्रसवपूर्वकाले जाकिर् हुसैनस्य पिता स्वस्य मातुः कृते तबलावादनस्य अभ्यासे

प्रवृत्तः। तबलावादनकलायां प्रवीणः अयं जनः अस्मिन् सङ्गीतशास्त्रे उच्चस्तरीयं कौशलं निपुणतां च प्राप्तवान्।

सन्तानगोपालस्तोत्रं संस्कृतस्त्रोतसाहित्ये सुप्रसिद्धम् अस्ति। दिव्यसन्ततिकामो दम्पती सर्वात्मना ईश्वरं पूजयन् ईश्वरेण सह संवादरूपेण अस्य स्त्रोतस्य मन्त्रं पठति-

**ॐ देवकी सुत गोविंद वासुदेव जगत्पते।**
**देहि मे तनयं कृष्ण त्वामहं शरणं गतः।।**[८]

**निष्कर्षः**

माता बालकं प्रति स्वभावं सभाषणद्वारा, स्वशब्दानां प्रयोगेण, गर्भसंवाद इति प्रसिद्धेन प्रकारेण व्यक्तं करोति। गर्भसंवादस्य समावेशं विना अपूर्ण-गर्भसंस्कारप्रक्रियायाम् एतत् सञ्चाररूपां महत्त्वपूर्णां भूमिकां निर्वहति। गर्भसंस्कारप्रक्रिया अपूर्णा इति प्रतिपादनम् अतिशयोक्तिः न गणयितुं शक्यते। फलतः गर्भसंवादघटकस्य सर्वोपरि महत्त्वम् अस्ति।

अनेकक्षेत्राणां व्यापकबोधं प्राप्य प्रश्ने जनः एतत् ज्ञानं सफलतया आन्तरिकं कृतवान्। फलतः भारतीयसंस्कृतेः अन्तः सः महत्त्वपूर्णं स्थानं धारयति, अत्यन्तं पाण्डित्यपूर्णः गहनबुद्धिमान् च ऋषिः इति गण्यते, एषः भेदः समकालीन-ऐतिहासिक-लेखेषु अपि स्थास्यति अतः अष्टावक्रऋषिः गहनप्रज्ञावस्थां प्राप्नोति, गर्भे स्थितायाः सूचनायाः प्रभावः तस्य सम्पूर्णसत्त्वपर्यन्तं स्थास्यति इति व्यापकतया अनुमानं कर्तुं शक्यते।

प्राचीनकालात् अस्माकम् आदरणीयऋषिभिः स्वीकृतम् अस्ति। एतत् गर्भ-उपनिषदः गर्भ-विज्ञानक्षेत्रसम्बद्धस्य गहनस्य वैज्ञानिकस्य च ग्रन्थस्य अस्तित्वे स्पष्टं भवति, यत् एतैः पुरातन-भारतीय-ऋषिभिः अस्माकं कृते प्रदत्तम् अस्ति।

अनेकाः ऐतिहासिकाः प्रसङ्गाः सूचयन्ति यत् गर्भवत्याः मातुः अथवा कस्यापि परिवारस्य सदस्यस्य भ्रूणस्य च मध्ये सङ्गतिः उत्तरस्य विकासे महत्त्वपूर्णं प्रभावं जनयति भ्रूणविज्ञानस्य विशिष्टलक्षणं भवति। बालस्य ज्ञानप्राप्तेः प्रक्रिया प्रसवपूर्वविकासस्य समये आरभ्यते, यत्र शिशुः विशिष्टक्षेत्रे सूचनां प्राप्नोति। तदतिरिक्तं बालकः मातुः प्रसारितसन्देशान् शिक्षां च प्रभावरूपेण अवशोषयति।

[८] सन्तानगोपालस्तोत्रम्, ११

**संदर्भाः**

- *पंडित. नारायण, हितोपदेश*
- यास्काचार्यकृतह निरुक्तम्
- श्रीमद्  भगवद्गीता १८- ४१
- ब्रह्मसूत्र भाष्य १/१/४
- कुमारसम्भवम्, सर्गः १, श्लोकः -२८
- अभिज्ञानशाकुन्तलम्, कालिदास, अंक-६, पृष्ठ-३६०
- संतानगोपालस्तोत्रम्, ११

~~~~~*~~~~~*~~~~~*~~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# श्रीमद्भगवद्गीता प्रस्थानत्रय्याम् एका दार्शनिकी धारा

**- डॉ. विपुल जादवः**[1]

श्रीमद्भगवद्गीता प्रस्थानत्रय्याः अन्तर्गता एका महत्त्वपूर्णा दार्शनिकी धारा अस्ति, यस्याः उपदेशेन अर्जुनस्य अध्यात्मलाभस्तु जात एव तेन सह अद्यापि सम्पूर्णस्य जगतः लाभो जायते। अस्यां गीतायां मानवजीवनस्य सर्वेऽपि विषयाः निबद्धाः सन्ति। अस्याः गीतायाः विषये उक्तम् अस्ति, यथा –

**पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं**
**व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम्।**
**अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनी-**
**मम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम्॥**

अस्मिन् श्लोके भगवद्गीतायाः सामान्यः परिचयः वैशिष्ट्यञ्च "यथा अद्वैतामृतवर्षिणी" इति विशेषणपदेन सूच्यते। तादृश्याः गीतायाः सार्वभौमहत्त्वं न तिरोहितमस्ति। अस्याः गीतायाः प्रथमाध्यायस्य प्रथम-पद्ये तत्राऽपि प्रथमचरणस्य प्रथमपदे "धर्म" शब्दस्य विशेषप्रयोगात् प्रतीयते यत्, भगवता व्यासेन भगवतः श्रीकृष्णस्य धर्मप्रधानः सन्देशः पाठकानां समक्षम् उपस्थापितो वर्तते इति।

अत्र अवधेयम् अस्ति यत्, धर्मशब्दः सम्पूर्णं वेदार्थं स्मारयति। अत एव गीतायाः प्रथमः श्लोकः धर्म-शब्दं प्राथम्येन उपस्थापयति। यथा –

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।**[2]
**मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥**

अत्रश्लोके धर्मशब्देन वैदिक-यागात्मकः धर्मः प्रोक्तः। यथा – "यागादिरेव धर्मः"। (अर्थसङ्ग्रहः- लौगाक्षिभास्करः) कुरुक्षेत्रे वैदिकयागादिक्रियानुष्ठानपरस्परायाः प्रधानत्वात् तत्स्थानस्य पवित्रता धर्मप्रधानता च सिद्धा।

---

[1] सहायकाचार्यः (वेदविभागाध्यक्षः) श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

[2] श्रीमद्भगवद्गीता १/१

परन्तु कुरुक्षेत्रमपि युद्धोद्यतानां कौरवपाण्डवानां युद्धभावनां निरोद्धुं क्षमं न भवतीति अवधेयम् अस्ति। द्वितीयश्लोकात् एकादशश्लोकं यावत् सञ्जयः दुर्योधनस्य युद्धभूमौ प्रवृत्तिविशेषं धृतराष्ट्रं प्रति सूचयन् कथयति –

**दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।[३]**
**आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥**

अत्र सञ्जयकथनेन दुर्योधनस्य मनसि स्थितिं युद्धभयं युद्धे पराजय-भयस्यापि व्यज्यते। एतदभिप्रायमेव अभिव्यनक्ति आङ्ग्लभाषायां स्वामी स्वरूपानन्दोऽपि यथा –

The beginning of Sanjay's replay but then the description of Duryodhana's action gives a clear indication to the old king that his son is afraid.[४]

परन्तु स्वामिवर्यस्य विश्लेषणं यद्यपि समुचितम् अस्ति, तथाऽपि तदतिरिच्य दुर्योधनस्याधर्मजनिता प्रवृत्तिफलमपि तं माययतीति बोद्धम्। अस्य कारणम् अस्ति यत्, स आततायी आसीत्। यः विषं भोजयति, गृहं ज्वालयति – स आततायी भवति धर्मविरुद्धाचरणशीलः। पाण्डवान् प्रति स पूर्वोक्तान् आपराधान् कृतवान्। मनसा तु स्वकीयं गुरुं द्रोणाचार्यम् अपि न श्रद्धया पश्यति, दुर्योधनः अर्जुनं प्रति द्रोणाचार्यस्य विशेषप्रवणताकारणात्। परन्तु द्रोणाचार्यस्य अर्जुनं प्रति सद्भावना तस्य ग्रहणशक्तिकारणात् गुरुं प्रति श्रद्धा-कारणात् धर्मबुद्धिकारणाच्चासीत्। दुर्योधनः सञ्जयवचनानुसारं व्यङ्ग्यवाक्यम् उपस्थापयन् व्यावहरति –

**पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।[५]**
**व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता॥**

अस्मिन् श्लोकेऽपि द्रोणाचार्यम् आत्मीयं गुरुं व्याकुलयितुं चेष्टते दुर्योधनः। "तव शिष्येण धीमता" इति वाक्येन गुरोरवमानं विद्यते। यतो हि दुर्योधनोऽपि द्रोणाचार्यस्यैव शिष्यः समानरूपेणैव गुरोः सकाशात् युद्धविद्यां, धनुर्विद्यां चाधिगतः, तथाऽपि पाण्डवपक्षीयान् द्रोणाचार्यस्य शिष्यान् प्रति सङ्केतं व्यङ्ग्यरूपेण करोति। एतन्न विचारयति यत्, स तस्यैव द्रोणाचार्यस्य शिष्योऽस्ति, यः पाण्डवान् प्रति द्वेषभावं मनसि धत्ते। तदनन्तरं षष्ठश्लोकं यावत् पाण्डवपक्षे विद्यमानान् शूरान् नामशः उपस्थापयति। तत्रोपस्थानेऽपि किमपि रहस्यमस्ति। स्वयमेव भीतः भवन् सः पाण्डववीराणां सङ्ख्यां

---

[३] श्रीमद्भगवद्गीता १/२

[४] श्रीमद्भगवद्गीता – स्वामी स्वरूपानन्दः

[५] श्रीमद्भगवद्गीता १/३

स्वपक्षीयवीरापेक्षया अधिकां प्रमाणयति। एतत् सर्वं दुर्योधनस्य मनसः दौर्बल्यं सञ्जयेन सूचितं धृतराष्ट्राय। तदनन्दरं दुर्योधने काचित् विवेकजागृतिः भवति यत् परिणामस्वरूपेण कौरवपक्षे स्थितानां विशिष्टवीराणां नामानि प्रस्तौति। द्रोणाचार्यमभिमुखीभूयः सः कथयति –

**भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः।**[६]
**अश्वत्थामा विकर्णश्च सोमदत्तिस्तथैव च॥**

**अन्ये च बहवः शूराः मदर्थे त्यक्तजीविताः।**
**नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥**

**अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।**
**पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्॥**

अत्र श्लोकत्रये अपर्याप्तं पर्याप्तं च इत्येतौ शब्दौ अपि दुर्योधनस्य व्यक्तित्वं मनसः स्थितिं च द्योतयतः। पर्याप्तशब्दस्य यावदपेक्षितं तावदस्तीति अर्थो भवति। तथैव अपर्याप्त-शब्दस्य यावदपेक्षितं तावन्नास्तीति अर्थो भवति। तथैव अपर्याप्तशब्दस्य यावदपेक्षितं तावन्नास्तीति अर्थो भवति। परन्त्वत्र व्याख्याकारैः प्रसङ्गानुसारं युद्धभूमेः परिस्थित्यनुसारञ्च अपर्याप्तशब्दस्य "अपरिमितं" "पर्याप्तम्" इत्यस्य परिमितम् इत्यर्थो निर्धारितः। परन्तु अनयोः "पर्याप्तापर्याप्तयोः" व्यङ्ग्यार्थो भवति यत् -

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।**[७]
**तत्र श्रीविजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥**

इति वचनालोके यस्मिन् पाण्डवपक्षे भगवान् श्रीकृष्णः अर्जुनश्च तिष्ठतः तद्बलं तु विजयाय अलम् = पर्याप्तं सर्वथा इति धिया दुर्योधनः सत्यमेव प्रतिपादयति। तथैव "यतो धर्मस्ततो जयः" इति भावानुसारमपि पाण्डवसैनिक-सङ्ख्या पर्याप्ता विजयार्थमित्यपि अर्थो भवति मौलिकः। तदनन्दरं भीष्मपितामहस्य सुरक्षाविषये शङ्कितमना दुर्योधनः कथयति –

**अयनेषु च सर्वेषु यथाभागमवस्थिताः।**[८]
**भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि॥**

अत्र एतद् अवधेयम् अस्ति यत् दुर्योधनः भीष्मपितामहस्य भगवन्तं कृष्णं प्रति भक्तिभावनां सम्यक् जानाति अतः शङ्कते। कदाचित् सः रणक्षेत्र एव भगवतः कृष्णस्य छायायाः आश्रये ब्रह्मलीनो

---

[६] श्रीमद्भगवद्गीता १/८,९,१०

[७] श्रीमद्भगवद्गीता १८/७८

[८] श्रीमद्भगवद्गीता १/११

न भवेत् इति। तथैव भीष्मपितामहस्य प्रतिद्वन्द्वतां कर्तुं कश्चिदपि महाभारतयुद्धे समर्थो नाऽऽसीत्। अतः तस्य बलप्रपञ्चेन वधप्रयत्नो विधातुं शक्यते पाण्डवैः इति विचारयन् "भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि" इति दुर्योधनः कथयति। तदनन्तरं विभिन्नैः महारथिभिः स्वशङ्खनादैः युद्धारम्भस्य सूचनोद्घोष्यते यन्निवेदयति धृतराष्ट्राय सञ्जयः। यथा –

**तस्य सञ्जयन्हर्षं कुरुवृद्धः पितामहः।**[९]
**सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्॥**

**अनन्तविजयं राजा कुन्तिपुत्रो युधिष्ठिरः।**[१०]
**नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥**

अत्र कतिपय-विशिष्टमहारथिनां शङ्खनिनाद-सूचना दत्ता सञ्जयेन। अनेन शङ्खनादनेन यद् युद्धवातावरणम् उत्पन्नं, तेन कौरव-पाण्डवयोः पक्षवर्तिनां महारथिनां धर्मयुद्धमहोत्सवायोत्साहोऽपि सञ्जातः। इदानीं युद्धभूमौ युद्धस्थितिम् अवकलनाय (यदा शस्त्रसम्पातः प्रारब्धः) अर्जुनः भगवन्तं सारथीभूतं श्रीकृष्णम् उभयोः कौरवपाण्डवयोः सेनयोः मध्यभागे स्वकीयं रथं स्थापयितुं निवेदयति। एतदेवास्ति अर्जुनस्य विषादबीजम्। यथा –

**अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः।**[११]
**प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥१-२०॥**

**हृषीकेशं तदा वाक्यमिदमाह महीपते।**
**सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥१-२१॥**

**यावदेतान्निरिक्षेऽहं योद्धुकामानवस्थितान्।**
**कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥१-२२॥**

अत्र "यावदेतान् निरीक्ष्येऽहं योद्धुकामान् अवस्थितान्" इति, "कैर्मया सह योद्धव्यम्" इति वाक्यद्वयम् अर्जुनस्य मानसिकीम् अवस्थां करुणार्द्रभावनाम् उभयमपि स्पष्टं करोति। स अर्जुनः दुर्योधनस्य अधर्मसेविनः पक्षे वर्तमानान् महानुभावान् अवेक्ष्य चकित-चकितो भवति। तथा चाग्रे तैः सह स्वसम्बन्धमपि स्मरन् युद्धस्य क्रूरताम् अपि विचारयति स्वार्थवशात् आरोपितं युद्धम् अपि मनसा निन्दति, यस्य सङ्केतः प्राप्यते अधस्तनेन श्लोकेन। यथा –

---

[९] श्रीमद्भगवद्गीता १/१२

[१०] श्रीमद्भगवद्गीता १/१६

[११] श्रीमद्भगवद्गीता १/२०,२१ ,२२

**तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धूनवस्थितान्।**[१२]

**कृपया परयाविष्टो विषीदन्निदमब्रवीत्॥**

अत्र सर्वान् बन्धून् समीक्ष्य कृपया परयाविष्टः इति वाक्यम् आबाल्यात् युद्धस्थितिं यावत् घटनां सर्वां स्मरन् करुणाद्रो भवति। तत्र सर्वान् कौरवपक्षवर्तिनः श्रेष्ठान् आचार्यद्रोण-भीष्मपितामह-प्रभृति-महानुभावान् संवीक्ष्य मनसा व्याकुलो भवन् कथयति भगवन्तं श्रीकृष्णम् [१३]

**दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्॥**

**सीदन्ति मम गात्राणि मुखं च परिशुष्यति।**

**वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥**

**गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।**[१४]

इयम् अर्जुनस्य अवस्था एव विषादावस्था तस्याः फलमत्र सूच्यते धृतराष्ट्रं प्रति सञ्जयेन। परन्तु तथा न मनोवृत्तिरस्ति दुर्योधनस्येति चाऽपि विपरीतव्यञ्जनामाध्यमेन सञ्जयः निवेदयति धृतराष्ट्राय। इतः प्रभृति प्रथमाध्यायस्य समाप्तिं यावत् स्वकीयां विषमां मानसिकपरिस्थितिं युद्धस्य परिणामवैषम्यं तेन च कुलधर्मनाशस्य सम्भावना तया सम्भावनया चाधर्मवाप्तिः वर्णसङ्करोत्पत्तेः नरकलाभः इति सर्वं साधयन् भगवतः श्रीकृष्णस्य समक्षं स्वयं युद्धात् विरतिमिच्छति। एतान् सर्वान् विषयान् उपस्थाप्य भगवन्तं कथयितुं स इच्छति – युद्धम् अधर्मः वर्तते यदि अहं युद्धे स्वपारिवारिकान् हन्मि अथवा तेऽस्मान् घ्नन्ति। भगवान् श्रीकृष्णः धर्मरूपः अर्जुनोऽपि तथैव अतः कथमेतत् पापं विधातुम् अर्हति अर्जुन इति स्वधर्मप्रधानतर्केण स्वकीयां करुणार्द्रभावनाम् आच्छादयितुं प्रवर्ततेऽर्जुन इति सर्वं धृतराष्ट्राय सूचयति। अग्रे च पुनः स्वकीयं सदाचार-सम्भरितम्, दार्शनिकदृष्ट्या उपेतं संसारस्यानित्यं च विचार्य युद्धस्य हिंसाविभीषिकां च अवकलय्य अर्जुनः कथयति –

**किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥१-३२॥**[१५]

**येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च।**

**त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥१-३३॥**

---

[१२] श्रीमद्भगवद्गीता १/२७

[१३] श्रीमद्भगवद्गीता १/२८,२९

[१४] श्रीमद्भगवद्गीता १/३०

[१५] श्रीमद्भगवद्गीता १/३२ तः ३५

**आचार्याः पितरः पुत्रास्तथैव च पितामहाः।**
**मातुलाः श्वशुराः पौत्राः श्यालाः सबन्धिनस्तथा ॥१-३४॥**

**एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।**
**अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥१-३५॥**

अनेनोपर्युक्तेन भावेन अर्जुनस्य विषादयुक्ता भावना गीतापाठकानां समक्षं प्रकटीभवति। प्रथमाध्यायपर्यन्तं कौरव-पाण्डवयोर्मध्ये भविष्यमाणं युद्धं मम सम्मतं नास्ति तथा च धर्मसम्मतमपि नास्तीति साधयितुं प्रवृत्तः अर्जुनः अध्यायान्ते युद्धं न करिष्यामीति स्वाशयं भगवतः श्रीकृष्णस्य समक्षं प्रस्तूय सशरं चापं विसृज्य उपाविशत्। यथा –

**एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्।**[१६]
**विसृज्य सशरं चापं शोकसंविग्नमानसः ॥१-४७॥**

अवधेयम् अस्ति यत्, अस्मिन् अध्ध्याये मुख्यरूपेण धर्मक्षेत्रस्याध्यात्मिकं रूपं दुर्योधनस्य औद्धत्यं, यद्धक्षेत्रस्य सैनिकव्यवस्था, अर्जुनस्य युद्धविषयकः विचारः युद्धेन च परिवारस्य समाजस्य च हानिः, तथैव युद्धेनाधर्मप्रसार इति सर्वं सूच्यते।

सञ्जयः एतत् सर्वं सूचयति धृष्टराष्ट्राय। एतदपि सूच्यते यत्, अर्जुनस्य उपर्युक्तां प्रवृत्तिं ज्ञात्वा धृतराष्ट्रः मनसा विचारयति यत्, कदाचित् युद्धं न भविष्यति, येन अस्माकं दुर्योधनस्य राज्यं निर्विघ्नं चलिष्यति इति। परन्तु भगवता श्रीकृष्णेन द्वितीये अध्याये अर्जुनविषादहेतूनां निराकरणं विधीयते। एवं युद्धं दुर्वारं भवति।

### सन्दर्भग्रन्थाः

1) श्रीमद्भगवद्गीता – शाङ्करभाष्यम्
2) श्रीमद्भगवद्गीता – हिन्दी अनुवाद, गीताप्रेस गोरखपुर
3) श्रीमद्भगवद्गीता – स्वामी स्वरूपानन्दः (आङ्ग्लानुवादः)
4) श्रीमद्भगवद्गीता – मुक्तिवेदान्त ट्रस्ट
5) उपनिषत्सग्रहः – अज्ञातप्रकाशनम्
6) अर्थसङ्ग्रहः – लौगाक्षिभास्करः

~~~~~*~~~~~*~~~~~*~~~~~

[१६] श्रीमद्भगवद्गीता १/४७
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# धातुसंज्ञाविचारः

- डॉ. के. श्यामसुन्दर[१]

## उपोद्घातः

धीयते अस्मिन् सर्वम् इत्यर्थे “धा” धातोः आधारे औणादिके तुन्प्रत्यये निष्पन्नः धातुशब्दः। स च १. परमात्मनि, २. वातपित्तादिशरीरधारकवस्तुषु, ३. आकाशादिमहाभूतेषु, ४. इन्द्रियेषु, ५. नाम्नां प्रकृतिभूतेषु भ्वादिशब्देषु, ६. देहस्थेषु रसासृङ्मांसादिषु ७. मनःशिलाद्यश्मविकारे ८. हिरण्यं रजतं कांस्यम् इत्यादिलोहेषु इत्येवं बहुषु अर्थेषु प्रयुज्यते। तत्र सकलशब्दमूलभूतानां भ्वादिशब्दानां भगवता पाणिनिना स्वकीयाष्टाध्याय्यां धातुसंज्ञा उक्ता। तद्विषये प्रौढमनोरमाशब्दरत्नादिग्रन्थपर्यालोचनपुरस्सरं विचारः प्रस्तूयते अत्र प्रबन्धे।

## सूत्रं तदर्थश्च

**“भूवादयो धातवः”**(१.३.१) इति धातुसंज्ञासूत्रम्। भूवादयः धातवः इति पदच्छेदः। भूश्च वाश्च भूवौ इति द्वन्द्वः। आदिश्च आदिश्च आदी इत्येकशेषः। भूवौ आदी येषां ते भूवादयः इति बहुव्रीहिः। अत्र प्रथमः आदिशब्दः प्रभृत्यर्थकः। द्वितीयः आदिशब्दः सदृशार्थकः। भू इत्यस्य प्रभृत्यर्थकादिशब्देन अन्वयः। तेन भूप्रभृतयः अर्थात् भ्वादिषु दशसु गणेषु पठिताः इत्यर्थः लभ्यते। वाशब्दस्य सदृशार्थकादिशब्देन अन्वयः। तेन वासदृशाः इत्यर्थः लभ्यते। तथा च भूप्रभृतयः वासदृशाः धातवः=धातुसंज्ञकाः भवन्ति इति सूत्रस्य अर्थः निष्पद्यते। अत्र वा इत्यनेन "वा गतिगन्धनयोः" इति धातुः गृह्यते। वासादृश्यं च क्रियावाचकत्वेन। यतो हि भूशब्दः भूमिवाचकः, सत्तारूपक्रियावाचकश्च भवति। वाशब्दोऽपि विकल्पार्थकः, गत्यादिक्रियार्थकश्च भवति। अर्थद्वयेऽपि सः असत्त्ववाची उपलभ्यते। तत्र क्रियावाचकभूशब्दस्यैव असत्त्वार्थकत्वेन वासादृश्यं सम्भवति। असत्त्वार्थकभूशब्दसाहचर्यात् वाशब्दोऽपि क्रियावाचक एव अत्र गृह्यते। तेन वासदृशशब्दात् क्रियावाचिनः इत्यर्थः लभ्यते। तथाच **भ्वादिगणपठितत्वे सति क्रियावाचित्वं धातुत्वम् इति धातोः लक्षणं सम्पन्नम्। क्रियावाचित्वे सति भ्वादिगणपठितत्वम् इति वा**। तदुक्तं कौमुद्याम् - **क्रियावाचिनो भ्वादयः धातुसंज्ञाः स्युः** इति।

---

[१] Assoc. Prof. of YAKARANA. The Madras Sanskrit College. Mylapore, Chennai - 600004. Mob:9841371467. E-Mail: srimalashyam@gmail.com

**अत्र शङ्का** - ननु वासदृशाः धातुसंज्ञकाः भवन्ति इत्युक्तम्। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं हि सादृश्यम्। सत्येवं वाधातोः स्वस्मिन् स्वभेदस्य वक्तुमशक्यत्वेन वासादृश्याभावात् कथं धातुसंज्ञा इति।

**तत्रोच्यते** - वाधातौ वासादृश्यं च **'प्रत्युच्चारणं शब्दो भिद्यते'** इति सिद्धान्तात् वाति, वातः, वान्ति इत्यादिप्रयोगभेदेन भेदं परिकल्प्य वाति इत्येतद्घटकवाशब्दस्य यथा क्रियावाचकत्वं तथा वातः इत्येतद्घटकवाशब्दस्यापि इत्येवं, वास्तविकभेदाभावेऽपि कल्पितभेदेन सम्भवति इत्यतः तस्यापि धातुसंज्ञा सिद्ध्यत्येव इति।

धातुसंज्ञायाः फलं तु "धातोः" इत्यधिकारे विहितानां तिङ्कृत्सन्विकरणप्रत्ययादीनां सिद्धिः, "ते प्राग्धातोः" इति उपसर्गाणां धातोः अव्यवहितपूर्वप्रयोगविधानम् इत्यादि। स्वरविधायकप्रकरणेऽपि धातुसंज्ञायाः प्रयोजनं दृश्यते एव।

**प्रथमदलसार्थक्यविचारः**

पूर्वोक्तधातुलक्षणे क्रियावाचित्वे सति भ्वादिगणपठितत्वम् इति दलद्वयं वर्तते। तत्र क्रियावाचित्वे सति इति प्रथमदलाभावे, भ्वादिगणपठितत्वं धातुत्वम् इत्येव लक्षणं स्यात्। तेन भ्वादिषु दशसु गणेषु यानि शब्दस्वरूपाणि पठितानि, तेषां धातुसंज्ञा भवति इत्यर्थः सिद्ध्यति। तथा च भू,एध इत्यादीनाम् भ्वादिगणे पठितानां शब्दानां धातुसंज्ञा सिध्यत्येव। परन्तु सर्वनामसंज्ञकस्य यच्छब्दस्य स्त्रीलिङ्गे या इति यद्रूपं, तस्यापि धातुसंज्ञा स्यात्। यदि तस्यापि धातुसंज्ञा तर्हि **'याः पश्यसि'** इत्यादौ द्वितीयाबहुवचने याः इति रूपं न स्यात्।

तथा हि – पाणिनिना धातुपाठे केवलं भू, एध, इत्येवं शब्दस्वरूपाण्येव पठितानि। भू सत्तायाम् इत्येवमादिः अर्थनिर्देशस्तु अनन्तरैः आचार्यैः कृतः। अदादिगणे प्रापणार्थकस्य याशब्दस्य धातुसंज्ञासिद्ध्यर्थं या इति शब्दस्वरूपं पाणिनिना पठितम्। तत्सरूपत्वात् या इति टाबन्तयच्छब्दस्यापि क्रियावाचित्वाभावेऽपि धातुसंज्ञा स्यात्। तस्य धातुत्वे, यच्छब्दात् द्वितीयाबहुवचने यद् + शस् इति स्थिते, अनुबन्धलोपे, "त्यदादीनामः"(७.२.१०२) इति विभक्तिनिमित्तकत्यदाद्यत्वे, "अतो गुणे" (६.१.९७) इति पररूपे च,'य+ अस्' इति जाते स्त्रीत्वविवक्षायाम् "अजाद्यतष्टाप्"(४.१.४) इति सूत्रेण टापि, सवर्णदीर्घे, 'या+अस्' इति दशायां, "प्रथमयोः पूर्वसवर्णः" (६.१.१०२) इति पूर्वसवर्णदीर्घे च कृते "यास्" इति भवति। ततः सकारस्य रुत्वविसर्गयोः कृतयोः "याः" इति रूपं सिद्ध्यति। अत्र या+अस् इत्यवस्थायां याशब्दस्य धातुत्वे, 'आकारान्तो यो धातुः तदन्तस्य भस्य अङ्गस्य लोपः स्यात्' इत्यर्थकेन "आतो धातोः" (६.४.१४०)इति सूत्रेण आकारस्य लोपे "यः" इत्यनिष्टं रूपं स्यात्। तन्निवारणार्थं धातुलक्षणे क्रियावाचित्वे सति इति दलं निवेशनीयम्। निवेशिते तु तस्मिन्, भ्वादिषु दशसु गणेषु पठितानां

शब्दस्वरूपाणां भ्वादिगणपठितत्वमात्रेण धातुसंज्ञा न सिद्ध्यति, अपि तु तेषां क्रियावाचकत्वमपि अपेक्ष्यते। तत्र प्रापणार्थकस्य 'या'शब्दस्य क्रियावाचकत्वस्य सत्त्वात् अभीष्टा धातुसंज्ञा सिद्ध्यति। यच्छब्दात् टापि निष्पन्नस्य तु 'या'शब्दस्य भ्वादिषु पाठस्य सम्भवेऽपि क्रियावाचित्वाभावात् न धातुसंज्ञा इति नोक्तदोषः। एवञ्च धातुलक्षणे क्रियावाचित्वे सति इति दलम् अवश्यं निवेशनीयम्।

**आक्षेपः**

अत्र कश्चन आक्षेपः - ननु **लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्** इति परिभाषया पाणिनीयसूत्रोपात्तशब्दैः प्रतिपदोक्त-लाक्षणिकयोः ग्रहणप्रसङ्गे प्रतिपदोक्तस्यैव = (स्वतःसिद्धस्यैव) शब्दस्वरूपस्य ग्रहणं कर्तव्यं, न तु लाक्षणिकस्य इत्युक्तम्। लक्षणम्=सूत्रम्। तत्सञ्चारेण निष्पन्नम् लाक्षणिकम्। प्रतिपदोक्तम् = स्वतःसिद्धं, साक्षादुच्चरितं वा। प्रकृते 'याः पश्यसि' इत्यादौ यः याशब्दः सः लाक्षणिकः। 'या प्रापणे' इत्यत्रस्थः याशब्दः प्रतिपदोक्तः। अतः धातुसंज्ञासूत्रे प्रापणार्थकस्य 'या'शब्दस्यैव ग्रहणं भवति न तु यच्छब्दात् टापि निष्पन्नस्यापि। एवञ्च तद्वारणाय धातुलक्षणे क्रियावाचित्वे सति इति दलम् न निवेशनीयम् इति।

**समाधानम्**

तत्रैवं समाधानम् – **नकारजावनुस्वारपञ्चमौ झलि धातुषु। सकारजः शकारश्चेर्षाट्ट-वर्गस्तवर्गजः॥**

इति अभियुक्तोक्तिः[२]। धातुषु झलि परे यौ अनुस्वारपञ्चमौ तौ नकारजौ ज्ञेयौ। तथा चकारपरकः शकारः सकारजो ज्ञेयः, रेफषकाराभ्यां परः टवर्गः तवर्गजो ज्ञेयः इति तदर्थः। १) स्रंसु अवस्रंसने, २) अञ्चु गतिपूजनयोः, ३) ओ व्रश्चू छेदने, ४) ऊर्णुञ् आच्छादने, ५) ष्ठा गतिनिवृत्तौ इत्यादीनि क्रमेण उदाहरणानि। तत्र प्रथम उदाहरणे स्रन् + सु इति स्थिते नकारस्य "नश्चापदान्तस्य झलि" (८.३.२४) इत्यनेन सूत्रेण अनुस्वारः इति ज्ञेयम्। द्वितीये अन् + चु इति दशायाम् नकारस्य तेनैव सूत्रेण अनुस्वारे, तस्य च "अनुस्वारस्य ययि.." (८.४.५८) इति परसवर्णः ञकारः। तृतीये व्रस्+चू इत्यत्र "स्तोः श्चुना श्चुः" (८.४.४०) इति श्चुत्वेन शकारः। तुरीये रेफात् परस्य नकारस्य "रषाभ्यां नो णः समानपदे" (८.४.१) इति णत्वम्। पञ्चमे षकारात् परस्य थकारस्य ष्टुत्वेन ठकारः। एवञ्च एते सर्वेऽपि लाक्षणिकाः।

इदम् अवश्यम् अङ्गीकर्तव्यम्। अन्यथा स्रस्तः, ध्वस्तः इत्यादौ 'अनिदिताम् अङ्गानां हलन्तानाम् उपधायाः नकरस्य लोपो भवति क्ङिति प्रत्यये परे' इत्यर्थकेन "अनिदितां हल उपधायाः क्ङिति" (६.४.२४) इति सूत्रेण विधीयमानः नकारलोपः न स्यात्। एवञ्च धातुपाठे बहूनां लाक्षणिकानां पाठसामर्थ्येन धातुसंज्ञासूत्रे **'लक्षणप्रतिपदोक्तयोः'** इत्यस्याः परिभाषायाः प्रवृत्तिः

---

[२] प्रकृतसूत्रे शब्दरत्ने।

नाङ्गीक्रियते। तथा च अदादिगणपठितयाशब्देन यच्छब्दात् टापि निष्पन्नस्य याशब्दस्यापि ग्रहणसम्भवेन धातुसंज्ञायाम् आकारलोपः स्यादेव इति।

**पुनराक्षेपः**

पुनरत्र आक्षेपः - ननु धातुपाठे लाक्षणिकानामपि दर्शनेन धातुसंज्ञाविषये **'लक्षणप्रतिपदोक्तयोः'** इत्यस्याः परिभाषायाः अप्रवृत्तावपि "आतो धातोः" (६.४.१४०) इति आकारस्य लोपविधायके सूत्रे परिभाषेयं प्रवर्त्तते एव। तथा च विश्वपः इत्यादौ विश्वपा+अस् इति दशायाम् आकारस्य प्रतिपदोक्तत्वात् अनेन सूत्रेण लोपे विश्वपः इति इष्टरूपं सिद्ध्यति। 'याः पश्यसि' इत्यादौ तु या+अस् इति दशायाम् आकारस्य टापि सवर्णदीर्घे निष्पन्नत्वेन लाक्षणिकत्वात् नानेन सूत्रेण ग्रहणम् इत्यतः न तस्य लोपापत्तिः। अतः तद्वारणाय लक्षणे क्रियावाचित्वे सति इति दलं न निवेशनीयम्। न च "आदेच उपदेशेऽशिति" (६.१.४५) इति सूत्रे, चेता स्तोता इत्यादौ लाक्षणिकस्थले अनया परिभाषया एव आत्वापत्तिवारणे सिद्धे, तदर्थं कृतात् उपदेशग्रहणात्, वर्णग्रहणे इयं परिभाषा न प्रवर्तते इति वाच्यम्,"ओत्" सूत्रस्थभाष्यविरोधात्। तत्र हि अनदः अदः अभवत् = 'अदोऽभवत्', 'तिरोऽभवत्' इत्यादौ लाक्षणिकस्थले ओत्सूत्रप्रवृत्तिः एतत्परिभाषा-श्रयणेनैव वारिता भाष्यकारैः। तस्मात् "आदेच..." इति सूत्रस्थम् उपदेशग्रहणं परिभाषायाः अनित्यत्वे एव ज्ञापकं, न तु वर्णग्रहणे अप्रवृत्तौ इति।

**समाधानम्**

तत्रेदं समाधानम् - "आतो धातोः" (६.४.१४०) इति सूत्रेऽपि परिभाषेयं न प्रवर्तते। यदि तत्रेयं परिभाषा प्रवर्तेत "असिद्धवदत्राभात्" (६.४.२२) इति सूत्रे भाष्ये उदाहृतः "पशुषो न वाजान्"[३] इति छान्दसः पशुषः इति प्रयोगो न सिद्ध्येत्। तथाहि – पशुं सनोति इति विग्रहे पशुशब्दे सुबन्ते उपपदे 'षणु दाने' इत्यस्मात् धातोः " जनसनखनक्रमगमो विट्"[४](३.२.६७) इति सूत्रेण विट्प्रत्यये पशु+ङस्+सन्+विट् इति दशायाम् उपपदसमासे प्रातिपदिकसंज्ञायाम्, सुब्लुकि, विटः अनुबन्धलोपे, वकारस्य "वेरपृक्तस्य"(६.१.६७) इति लोपे, पशुसन् इति जाते, प्रत्ययलक्षणेन "विड्वनोरनुनासिकस्यात्[५] (६.४.४१) इति नकारस्य आकारादेशे, सवर्णदीर्घे, "सनोतेरनः[६] (८.३.१०८) इति सकारस्य षकारादेशे च निष्पन्नं 'पशुषा' इति प्रातिपदिकम्। ततः द्वितीयाबहुवचने पशुषा+अस् इति स्थिते "आतो धातोः" (६.४.१४०) इति सूत्रेण आकारस्य लोपे, रुत्वे विसर्गे च पशुषः इति सिद्ध्यति। अत्र पशुषाशब्दे यः धातोः आकारः सः लाक्षणिकः। "आतो धातोः"

---

३ ऋक्संहिता म.-५. सू.-४१. म.-१.

४ जनादिभ्यो धातुभ्यः सुबन्ते उपपदे छन्दसि विट्प्रत्ययः स्यात् इत्यर्थः।

५ विटि वनि च परे अनुनासिकान्तस्य अङ्गस्य आकारादेशः स्यात् इत्यर्थः।

६ सनोतेः अनकारान्तस्य सस्य मूर्धन्यादेशः स्यात् इत्यर्थः।

(६.४.१४०) इति सूत्रे यदि **'लक्षणप्रतिपदोक्तयोः'** इति परिभाषा प्रवर्तेत तर्हि तेन सूत्रेण पशुषाशब्दस्थस्य आकारस्य ग्रहणाभावेन न तस्य लोपः स्यात्। लोपाभावे पशुषः इति भाष्यकारोदाहृतं रूपं न सिद्ध्येत्। अतः "आतो धातोः" (६.४.१४०) इति सूत्रेऽपि परिभाषेयं न प्रवर्तते इति।

**प्रथमदलस्य प्रयोजनान्तरम्**

इदम् आक्षेपसमाधानं सूत्रस्य "आतो धातोः" इति न्यासपक्षे बोध्यम्। वार्त्तिककारैस्तु अत्र "आतोऽनापः" इति न्यासः कल्पितः। तस्मिन् पक्षे तु क्रियावाचित्वे सति इति प्रथमदलाभावे विकल्पार्थकनिपातस्य वाशब्दस्य धातुत्वापत्तिः दोषः वक्तव्यः। तथा हि –"समासेऽनञ्पूर्वे क्त्वो ल्यप्" (७.१.३७) "हलः श्नः शानज्झौ" (३.१.८३) इत्यादौ क्त्वा, श्ना इत्यादिशब्दानां षष्ठ्येकवचने धातुत्वाभावेन "आतो धातोः" इति सूत्रेण आकारलोपाभावात् क्त्वः, श्नः इत्यादिरूपाणि न सिध्येयुः। तदर्थं वार्त्तिककारैः अस्य सूत्रस्य "आतोऽनापः" इति न्यासः कल्पितः। तस्मिन् न्यासे तु सूत्रार्थः भवति - 'आबन्तभिन्नस्य आकारान्तस्य भस्य अङ्गस्य लोपः इति। तथा च विश्वपः, क्त्वः, श्नः इत्यादौ इष्टस्थले आकारलोपः सिद्ध्यति, रमायाः इत्यादौ अनिष्टस्थले आबन्तत्वात् न भवति च। एवम् आबन्तत्वादेव याः इत्यत्रापि आकारलोपाभावेन, सत्यामपि धातुसंज्ञायां न दोषः इत्यतः तद्वारणार्थं धातुलक्षणे क्रियावाचित्वे सति इति दलं न निवेशनीयं भवति।

अतः तस्मिन् पक्षे विकल्पार्थकनिपातस्य वाशब्दस्य धातुत्वापत्तिवारणार्थं तद्दलं निवेशनीयम्। तथाहि - अदादिगणे गत्याद्यर्थकस्य वाशब्दस्य धातुसंज्ञासिद्ध्यर्थं वा (गतिगन्धनयोः) इति शब्दः पठितः। तेन विकल्पार्थकस्य निपातस्य वाशब्दस्यापि ग्रहणं संभवति सरूपत्वात्। तथा च तस्यापि धातुसंज्ञा स्यात्। यदि धातुसंज्ञा तर्हि "अर्थवदधातुः.." (१.२.४५) इति प्रातिपदिकसंज्ञासूत्रे अधातुः इति पर्युदासस्य कृतत्वात्, तस्य प्रातिपदिकसंज्ञा न स्यात्। तस्य प्रातिपदिकसंज्ञाभावे ततः सुबुत्पत्त्यभावेन पदत्वाभावात्, **'वा गच्छति'** इत्यादौ गच्छति इत्यादेः **"तिङ्ङतिङः"** (८.१.२८) इति सूत्रेण निघातस्वरो न स्यात्। तेन हि सूत्रेण अतिङन्तात् पदात् परस्य तिङन्तस्य निघातस्वरो विधीयते। प्रकृते वाशब्दस्य पदत्वाभावात् सः न स्यात्। अतः विकल्पार्थकनिपातस्य वाशब्दस्य धातुसंज्ञापत्तिवारणार्थं धातुलक्षणे क्रियावाचित्वे सति इति दलं निवेशनीयमेव। निवेशिते तु तस्मिन्, निपातस्य वाशब्दस्य क्रियावाचित्वाभावात् न धातुसंज्ञा इति नोक्तदोषः।

न च विकल्पयति इत्यत इव निपातवाशब्दादपि विकल्परूपा क्रिया प्रतीयते इत्यतः क्रियावाचित्वे सति इति दले निवेशितेऽपि न तस्य धातुसंज्ञावारणं सम्भवति इति वाच्यम्, निपातवाशब्दोपस्थाप्यस्य विकल्पस्य क्रियात्वाभावात्। तथा हि – क्रियेति शब्देन अत्र साध्यक्रिया उच्यते। एकैव क्रिया केनचित् शब्देन उपस्थाप्या साध्यत्वेन प्रतीयते, केनचिदुपस्थाप्या न तथा,

शब्दशक्तिस्वाभाव्यात्। प्रकृते विकल्परूपा क्रिया विकल्पयति इति शब्देन उपस्थाप्या साध्यत्वेन प्रतीयते, निपातवाशब्दोपस्थाप्या न तथा। उक्तं च नागेशभट्टै[७]- "वार्थस्य विकल्पस्य भूत-भविष्यत्कालसम्बन्धाभावेन क्रियात्वाभावात्, अस्त्याद्यर्थस्यापि तत्त्वं भूतभविष्यत्कालसम्बन्धात्" इति। शब्दरत्नकारास्तु- "क्रियात्वं - साध्यत्वेन प्रतीयमानत्वम्। साध्यत्वं च उत्पाद्यमानत्वमेव इत्यन्यत्र विस्तरः इत्याहुः[८]। अनेन कालपरिच्छिन्नत्वम्, क्रियात्वम् इति लभ्यते, उत्पाद्यमानत्वं वा। एवञ्च निपातवाशब्दोपस्थाप्यस्य विकल्पस्य तथात्वाभावेन क्रियात्वाभावात् क्रियावाचित्वे सति इति दलनिवेशनेन तस्य धातुसंज्ञावारणं सम्भवति इति न दोषः।

**द्वितीयदलप्रयोजनविचारः**

धातुलक्षणे द्वितीयं दलमस्ति भ्वादिगणपठितत्वम् इति। एतद्दलाभावे क्रियावाचकत्वं धातुत्वम् इत्येव लक्षणं भवति। तेन ये ये क्रियावाचिनः शब्दाः तेषां धातुसंज्ञा भवति इत्यर्थः सिद्ध्यति। तेन भू,एध इत्यादीनां भ्वादिगण-पठितानां क्रियावाचित्वात् धातुसंज्ञा सिद्ध्यत्येव। सत्येवं भ्वादिगणपठितत्वम् इति दलं किमर्थम् इति शङ्का जायते। तत्राह भट्टोजिदीक्षितः- "हिरुक् पृथक् इत्याद्यव्ययानां, शिश्ये इति भावार्थतिङन्तस्य च मा भूत्"[९] इति। अत्र चकारेण आणवयति, वट्टयति इत्यादीनां सङ्ग्रहः इति शब्दरत्नकारः।

तथाहि – क्रियावाचित्वं धातुत्वम् इत्येतावन्मात्रोक्तौ - स्वरादिगणे हिरुक् पृथक् इति द्वौ शब्दौ पठितौ। तत्र हिरुक्शब्दः वर्जनार्थकः। पृथक्शब्दः विभजनार्थकः। वर्जनविभजनयोः क्रियात्वेन तद्वाचित्वात् अनयोरपि धातुत्वं स्यात्। तन्निवारणार्थं धातुलक्षणे भ्वादिगणपठितत्वम् इति दलं निवेशनीयम्। निवेशिते तु तस्मिन् हिरुक् इत्यादीनां भ्वादिषु दशसु गणेषु कुत्रापि पाठाभावात् न धातुसंज्ञापत्तिः इति न दोषः।

न च अनयोः स्वरादिषु पाठः अव्ययसंज्ञार्थः। अव्ययसंज्ञायाः फलं च ताभ्याम् उत्पन्नस्य सुपः "अव्ययादाप्सुपः" (२.४.८२) इति सूत्रेण लुक्सिद्धिः। यद्यनयोः धातुसंज्ञा तर्हि "अर्थवदधातुः.." (१.२.४५) इति प्रातिपदिकसंज्ञासूत्रे अधातुः इति पर्युदासस्य कृतत्वात्, अनयोः प्रातिपदिकसंज्ञा न स्यात्। प्रातिपदिकसंज्ञाभावे आभ्यां सुबुत्पत्तेरेव अभावेन, अनुत्पन्नस्य सुपः लुक्प्राप्त्यर्थम् अनयोः अव्ययेषु पाठः व्यर्थः स्यात्। अतः अनयोः अव्ययेषु पाठसामर्थ्यात्, सत्यपि क्रियावाचित्वे न धातुसंज्ञा इति वाच्यम् , अव्ययसंज्ञायाः "अव्ययसर्वनाम्नामकच् प्राक्टेः" (५.३.७१) इति अकच्प्राप्तिरूपस्य प्रयोजनान्तरस्य सत्वात्। सति तु प्रयोजनान्तरे वैयर्थ्याभावात् न

---

७ लघुशब्देन्दुशेखरे भूवादयः.. इति सूत्रे।

८ प्रकृतसूत्रे शब्दरत्ने।

९ प्रकृतसूत्रे प्रौढमनोरमायाम्।

सामर्थ्याश्रयणम्। अव्ययसंज्ञायां कृतायां सुब्लुगपि सिद्ध्यति इत्यन्यदेतत्। एवञ्च अनयोः धातुसंज्ञापत्तिवारणार्थं भ्वादिगणपठितत्वम् इति दलं निवेशनीयमेव।

वस्तुतः इदं प्रत्युदाहरणं न युक्तम्। अत्र अरुचेः सत्त्वादेव पुनः शिश्ये इत्यादौ धातुत्वापत्तिः उक्ता मनोरमाकारैः इत्यभिप्रयन्ति शब्दरत्नकाराः। तेषाम् अयमभिप्रायः – एषां क्रियासमानाधिकरणत्वात्[१०] लिङ्गसङ्ख्याद्यनन्वयित्वाच्च तदर्थस्य क्रियात्वमस्ति इत्यभिमानेन इदं प्रत्युदाहरणं दत्तम्। परन्तु अत्र पूर्वोक्तरीत्या क्रियाशब्देन साध्यक्रिया ग्राह्या। साध्यत्वं च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदक-रूपवत्त्वम्। प्रकृते हिरुक्, पृथक् इत्याद्यव्ययैः वर्जनाद्यर्थोपस्थितौ क्रियान्तराकाङ्क्षादर्शनेन नैतेषां क्रियावाचकत्वम्। क्रियावाचकत्वाभावे च न धातुत्वापत्तिः इत्यरुचेरेव शिश्ये इत्यादिप्रत्युदहरणदानम् इति।

### भ्वादिगणपठितत्वम् इति दलाभावे द्वितीयं दूषणम्

भ्वादिगणपठितत्वम् इति दलस्य अभावे द्वितीयं दूषणम् उक्तं – 'शिश्ये इति भावार्थतिङन्तस्य च मा भूत्' इति। शीङ् स्वप्ने (अदा.) इत्यस्मात् धातोः भावे लिटि प्रथमपुरुष-एकवचने तप्रत्यये, तस्य "लिटस्तझयोरेशिरेच्" (३.४.८१) इति एशादेशे, अनुबन्धलोपे "लिटि धातोरनभ्यासस्य" (६.१.८.) इति द्वित्वे "ह्रस्वः" (७.४.५९) इति सूत्रेण अभ्यासस्य ह्रस्वे शिशी + ए इति दशायाम्, शिशी इति अङ्गस्य अनेकाच्त्वात् इयङादेशं बाधित्वा "एरनेकाचोऽसंयोगपूर्वस्य" (६.४.८२) इति ईकारस्य यणादेशे शिश्ये इति रूपम्। अस्य भावतिङन्तत्वात्, प्रत्ययेनापि भावस्य=धात्वर्थस्य क्रियायाः एव उच्यमानत्वात् , समुदायस्य क्रियावाचकत्वमस्ति इत्यतः अस्यापि धातुत्वं स्यात्। यद्यस्य धातुत्वं तर्हि "आदेच उपदेशेऽशिति"[११] (६.१.४५) इति एकारस्य आत्वापत्तिः दोषः इति तदभिप्रायः।

वस्तुतः अत्र `ए' इति प्रत्ययस्यैव धातुत्वापत्तिः, तन्निबन्धन-आत्वापत्तिश्च दोषः वक्तव्यः। समुदायस्य तु धातुत्वेऽपि न कोऽपि दोषः। `उक्तार्थानाम् अप्रयोगः' इति न्यायेन तिङर्थस्य उक्तत्वात् न पुनः तिङापत्तिः। "आदेच.." (६.१.४५) इति आत्वविधायकसूत्रे उपदेशे इति पदं वर्तते। तेन उपदेशे यः धातुः एजन्तो भवति तस्यैव तेन सूत्रेण आत्वम्। शिश्ये इत्यस्य एजन्तधातुत्वेऽपि उपदेशत्वाभात् आत्वापत्तिरपि न। प्रत्ययस्य तु भावार्थकत्वेन क्रियावाचित्वात् धातुत्वापत्तिः। धातुत्वे च तस्य स्वतः आद्योच्चारणरूपोपदेशत्वस्यापि सत्त्वात् "आदेचः.." (६.१.४५) इति आत्वं स्यात्। अतः तद्वारणाय भ्वादिगणपठितत्वम् इति दलं लक्षणे निवेशनीयम्। सति तु तस्मिन् 'ए` इत्यस्य भ्वादिषु गणेषु पाठाभावात् न धातुत्वम् इति न दोषः इति शब्दरत्नकारः।

---

[१०] क्रिया-अभिन्नत्वात् इत्यर्थः।

[११] उपदेशे एजन्तस्य धातोः आत्वं स्यात् न तु शिति इत्यर्थः।

**अत्राक्षेपः**

ननु - “आदेच उपदेशेऽशिति” (६.१.४५) इत्यत्र “लिटि धातोरनभ्यासस्य” (६.१.८) इत्यतः `धातोः’ इत्यनुवर्तते इति पक्षे अयं दोषः। परन्तु भाष्यकारैः तत्र `धातोः’ इत्यस्य असम्बन्धः उक्तः। तस्मिन् पक्षे तु नायं दोषः। तत्र हि भाष्ये[१२] गोभ्याम्, गोभिः इत्यादौ आत्वापत्तिम् आशङ्क्य, आदौ “लिटि धातोरनभ्यासस्य” (६.१.८) इत्यतः धातोः इत्यनुवर्तते। अतः गो इति प्रातिपदिकस्य धातुत्वाभावात् न आत्वम् इति समाहितम्। ततः “अथापि निवृत्तम्। एवमप्यदोषः। उपदेशे इत्युच्यते, उद्देशश्च प्रातिपदिकानां नोपदेशः” इत्युक्तम्। तथाहि- “लिटि धातोरनभ्यासस्य” (६.१.८) इत्यतः उत्तरसूत्रेषु धातोः इत्यनुवर्तते। परन्तु मध्ये क्वचित् प्रयोजनाभावे योग्यताद्यभावे वा तस्य निवृत्तिः असम्बन्धो वा अङ्गीक्रियते। यथा “ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे” (६.१.१३) इति सूत्रम्। अनेन पुत्र पति इत्येतयोः उत्तरपदयोः तत्पुरुषे समासे ष्यङः संप्रसारणं विधीयते। इदमपि सूत्रं “लिटि धातोरनभ्यासस्य” (६.१.८) इत्यतः परमेव पठितम्।परन्तु अत्र योग्यताभावात् धातुशब्दसम्बन्धो न भवति। तद्वत् “आदेच उपदेशेऽशिति” (६.१.४५) इत्यस्मिन्नपि सूत्रे धातोः इत्यस्य अनुवृत्तिः नाङ्गीक्रियते, प्रयोजनाभावात्।

अत्र पक्षे गवादिप्रातिपदिकानाम् आत्वापत्तिः उपदेशग्रहणेन वार्यते। तथाहि - “आदेच उपदेशेऽशिति” इत्यत्र उपदेशग्रहणं कृतम्। उपदेशे इति षष्ठ्यर्थे सप्तमी। कर्मव्युत्पत्त्या उपदेशपदेन आद्योच्चारणविषयः उच्यते। तस्यैच इति विशेषणम्। तेन एजन्तस्य उपदिश्यमानस्य आत्वं स्यात् न तु शिति इति सूत्रार्थः भवति। अनिर्ज्ञातस्वरूपस्य कार्यार्थस्वरूपज्ञापनाय अपूर्वोच्चारणमेव हि उपदेशः। 'गोभ्याम्' इत्यादौ सिद्धस्वरूपस्य गोशब्दस्य तादृशोपदेशत्वाभावात् न आत्वापत्तिः इति तदभिप्रायः। एवञ्च शिश्ये इत्यत्र ‘ए’ इति प्रत्ययस्य धातुत्वेऽपि आत्वं प्रति धातुत्वस्य कारणत्वाभावात् न दोषः। तथा च प्रयोजनाभावात् धातुसंज्ञैव अत्र न भवति।

किञ्च अशिति इत्यत्र प्रसज्यप्रतिषेधः अङ्गीकृतः। तस्मिन् पक्षेऽपि शित्परत्वयोग्यस्यैव आत्वं विधीयते अनेन सूत्रेण। प्रकृते `ए’ इत्यस्य शित्परत्वयोग्यत्वाभावात् “आदेच उपदेशेऽशिति” इत्यत्र धातोः इत्यनुवर्तते इति पक्षेऽपि नात्वापत्तिः।

अपि च भूप्रभृतयः वासदृशाः इत्यत्र वासादृश्यम् अन्यानभिहितक्रियावाचकत्वेनैव बोध्यम्। शिश्ये इत्यत्र `ए’ इति प्रत्ययेन, प्रकृतिभागेन उक्तैव क्रिया उच्यते न त्वपूर्वा। अतः तस्य क्रियावाचकत्वे सत्यपि अन्यानभिहितक्रिया-वाचकत्वाभावात् धातुत्वमेव न सम्भवति। एवञ्च तस्य धातुसंज्ञावारणाय धातुलक्षणे भ्वादिगणपठितत्वम् इति दलं नैव निवेशनीयम् इति।

[१२] “आदेच उपदेशेऽशिति” (६.१.४५) इत्यत्र।

### समाधानम्

तत्रोच्यते – एवमपि आणवयति वट्टयति इत्यादीनां धातुत्वापत्तिवारणाय भ्वादिगण-पठितत्वम् इति दलं निवेशनीयमेव इति।तथाहि –आज्ञापयति, वर्तयति इत्याद्यर्थे आणवयति वट्टयति इत्यादीनाम् अपभ्रंशानामपि प्रयोगः क्वचित् दृश्यते। भ्वादिगणपठितत्वम् इति दलस्य अभावे, वैयाकरणैः अपभ्रंशेष्वपि शक्तेः अङ्गीकारात् तेषामपि आज्ञापन-वर्तनादिक्रियावाचित्वात् धातुत्वं स्यात्। तेषां धातुत्वे शास्त्रविषयत्वसम्भवेन साधुत्वं स्यात्। यदि साधुत्वं तर्हि यागादावपि तेषां प्रयोगापत्तिः। तद्वारणाय धातुलक्षणे भ्वादिगणपठितत्वम् इति दलं निवेशनीयम् इति।

### शङ्का

अत्र पुनः शङ्का - ननु क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वम् इति यदि धातुलक्षणं तर्हि, स्तम्भु इत्येवमादयः केचन शब्दाः क्रियावाचिनः सन्ति, परन्तु भ्वादिषु गणेषु न पठिताः। तेषां धातुसंज्ञा तु इष्टा। सा न स्यात् इति।

### समाधानम्

तत्रोच्यते प्रौढमनोरमायाम् - "स्तम्भ्वादीनाम् उदित्करणेन सौत्राणां धातुत्वं ज्ञाप्यते। चुलुम्पादीनां तु "बहुलमेतन्निदर्शनम्" इति गणसूत्रेण सङ्ग्रहः" इति। अयं भावः – स्तन्भुस्तुन्भुस्कन्भु-स्कुन्भुस्कुञ्भ्यः श्नुश्च (३.१.८२) इत्यनेन सूत्रेण सार्वधातुके कर्तरि प्रत्यये परे स्तम्भ्, स्तुम्भ्, स्कम्भ्, स्कुम्भ्, स्कुञ् इत्येतेभ्यः श्ना तथा श्नु इत्येतौ प्रत्ययौ विधीयेते। श्ना, श्नु इत्येतौ विकरणप्रत्ययौ। अतः तौ धातोरेव भवेताम्। अनुवर्तते चात्र `धातोः' इति पदं, "धातोरेकाचो हलादेः.." (३.१.२२) इति सूत्रात्। परन्तु अत्र सूत्रे निर्दिष्टेषु पञ्चसु शब्देषु स्कुञ् इति एक एव शब्दः धातुपाठे (स्कुञ् आप्रवणे' इति) क्र्यादिगणे पठितः दृश्यते। अतः तस्य धातुसंज्ञा अस्ति। अन्येषां तु चतुर्णां भ्वादिषु गणेषु कुत्रापि पाठाभावात् "भूवादयः.." इत्यनेन सूत्रेण धातुसंज्ञा न सिद्ध्यति। तथापि ते पाणिनिना अत्र सूत्रे श्ना, श्नु इति विकरणप्रत्यययोः प्रकृतित्वेन निर्दिष्टाः सन्ति। तेनैव ज्ञायते एतेषां धातुसंज्ञा पाणिनेः इष्टा इति। एवञ्च एतेषां धातुसंज्ञा ज्ञापकसिद्धा। अत एव एते **'सौत्रधातवः'** इति कथ्यन्ते।

किञ्च अत्र स्तन्भु इत्यादयः शब्दाः उदित्त्वेन पठिताः। उदित्करणस्य फलमस्ति- क्त्वाप्रत्यये "उदितो वा" (७.२.५६) इति सूत्रेण उदितो धातोः क्त्वाप्रत्यये परतो विहितस्य इड्विकल्पस्य प्राप्तिः। तेन शमित्वा, शान्त्वा इतिवत् स्तम्भित्वा, स्तब्ध्वा इत्येवं रूपद्वयं सिद्ध्यति। एवञ्च उदित्करणमपि एषां धातुत्वे गमकम्।

अपि च लुङ्लकारे धातोः "च्लि लुङि" (३.१.४३) इत्यनेन च्लिः विकरणप्रत्ययः भवति। तस्य "च्लेःसिच्" (३.१.४४) इत्यनेन औत्सर्गिकतया सिजादेशः विधीयते। परन्तु केभ्यश्चन

धातुभ्यः परस्य च्लिप्रत्ययस्य जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च (३.१.५८) इत्यनेन सूत्रेण विकल्पेन अङ्-आदेशः विधीयते। तत्र स्तम्भुधातुरपि पठितः। तेन अस्तभत्, इति रूपं सिद्ध्यति। पक्षे "च्लेःसिच्" (३.१.४४) इति 'सिच्' अपि भवत्येव। तेन अस्तम्भीत् इत्यपि रूपं भवति। एवञ्च स्तम्भुप्रकृतिकच्ल्यनुवादेन अङ्-विधानमपि स्तम्भ्वादीनां धातुत्वे ज्ञापकम् इति।

एवम् "धातोः" (३.१.९१) "इत्यधिकारे जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः" (३.२.१५०) इति सूत्रेण जुप्रभृतिभ्यो धातुभ्यः युच् प्रत्ययो विहितः तच्छीलादिषु कर्तृषु। अत्रस्थः जुशब्दः धातुपाठे न पठितः। तथापि अत्र सूत्रे युच्प्रकृतित्वेन निर्दिष्टत्वात् धातुत्वम् अनुमीयते। एवञ्च अयमपि सौत्रो धातुः। तेन जवनः इति रूपं सिद्ध्यति।

एवमेव "जपजभदहदशभञ्जपशां च" (७.४.८६) इत्यत्र पठितः पशिः, "ऋतेरीयङ्" (३.१.२९) इत्यत्र पठितः ऋतिः, इत्येवमादीनां च धात्वधिकारविहितकार्योद्देश्यत्वेन ग्रहणात् धातुत्वम् अस्ति इति ज्ञेयम्।

तथा "कास्प्रत्ययादाममन्त्रे लिटि" (३.१.३५) इति सूत्रेण कास्धातोः प्रत्ययान्तेभ्यश्च धातुभ्यः लिटि परतोऽमन्त्रविषये आम्-प्रत्ययो विधीयते। तत्रेदं वार्त्तिकं "कास्यनेकाचश्चुलुम्पाद्यर्थम्" इति। सूत्रे प्रत्ययग्रहणमपनीय तत्स्थाने अनेकाच इति वक्तव्यं चुलुम्पाद्यर्थम् इत्यर्थः। तथा च कास्धातोरनेकाचश्च आम् स्यात् लिटि परतोऽमन्त्रविषये इत्यर्थः सम्पद्यते सूत्रस्य। तेन चुलुम्पांचकार दरिद्रांचकार इत्यादि सिद्ध्यति। अत्र वार्त्तिके पठितत्वात् चुलुम्पादीनां धातुत्वम्।

कण्ड्वादीनां तु "धातोरेकाचो हलादेः..."(३.१.२२) इति धात्वधिकारे, "कण्ड्वादिभ्यो यक्"[१३] [३.१.२७] इति यग्विधानात् धातुत्वं बोध्यम्। द्विविधाः कण्ड्वादयः, धातवः प्रातिपादिकानि च। तत्र धात्वधिकाराद् धातुभ्यः एव प्रत्ययो विधीयते, न तु प्रातिपदिकेभ्यः। तथा च यकि गुणप्रतिषेधार्थं ककारः अनुबध्यते। `कण्डूञ् गात्रविघर्षणे' इति धातुः ञित्त्वात् उभयपदी। ततः यकि, "सनाद्यन्ता धातवः" (३.१.३२) इति धातुसंज्ञायां, लटि कण्डूयति। कण्डूयते इत्यादीनि रूपाणि। अत्र कण्डूञ् इत्यस्य धातुसंज्ञायां सत्यामेव ततः परस्य यकः आर्धधातुकसंज्ञायां, "सार्वधातुकार्धधातुकयोः" (७.३.८४) इति गुणे प्राप्ते , "क्ङिति च" (१.१.५) तन्निषेधार्थं कित्करणं सार्थकं भवति। उक्तं च भाष्ये – **धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि। आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः** ॥ इति ॥

---

[१३] एभ्यो धातुभ्यो नित्यं यक् स्यात्स्वार्थे इत्यर्थः।

अत्र स्तम्भ्वादीनाम् बहुविधैः ज्ञापकैः पृथक् पृथक् धातुत्वानुमानापेक्षया, लाघवात् स्थितस्य तेषां पाठस्य भ्रंशः एव अनुमीयते इति हरिदीक्षितनागेशभट्टादयः। मैत्रेयरक्षितादयस्तु **"बहुलमेतन्निदर्शनम्"** इति गणसूत्रेण तेषां सङ्ग्रहं निरूपयन्ति। एवञ्च क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वम् इति धातुलक्षणे न कोऽपि दोषः।

एतदतिरिच्य सनादिप्रत्ययान्तानामपि धातुसंज्ञा इष्टा। तत्सिद्ध्यर्थं "सनाद्यन्ता धातवः" (३.१.३२) इति पृथक् सूत्रमेव रचितम् भगवता पाणिनिना। एते सनाद्यन्ताः **आतिदेशिकधातवः इति** व्यवह्रियन्ते।

**॥ इति शम् ॥**

## परामृष्टग्रन्थसूची

**पातञ्जलं महाभाष्यम्** - प्रदीपोद्द्योतसहितम् , वाणी विलास प्रकाशन्, वाराणसी।

**व्याकरणमहाभाष्यम्** - नवाह्निकम्, प्रदीपोद्द्योतच्छायासहितम्, निर्णयसागरमुद्रणालयः, मुम्बई।

**वैयाकरणसिद्धान्तकौमुदी** - बालमनोरमातत्त्वबोधिनीसहिता, मोतीलाल् बनारसीदास् दिल्ली।

**काशिका** - न्यासपदमञ्जरीभावबोधिनीसहिता तारा बुक् एजेन्सी, वाराणसी.

**लघुशब्देन्दुशेखरः** - श्रीमन्नागेशभट्टविरचितः। श्रीभैरवमिश्रविरचितचन्द्रकलाटीकासहितः।

**श्री काशी संस्कृतग्रन्थमाला - ५.** - चौखम्बा संस्कृत संस्थान , वाराणसी . (१९८७)

**वैयाकरणभूषणसारः** - दर्पण-सुबोधिनी (हिन्दी) व्याख्योपेतः। संपा. - डॉ. चन्द्रिकाप्रसाद द्विवेदी। व्रजजीवन प्राच्य भारतीग्रन्थमाला -४२। चौखम्बा संस्कृत प्रतिष्ठान।

**प्रौढमनोरमा** - म.म. भट्टोजिदीक्षितकृता। शब्दरत्न-भैरवी-भावप्रकाश सरलाटीकोपेता। काशीसंस्कृत् सिरीस्-125. चौखम्बा संस्कृत संस्थान, वाराणसी

**प्रौढमनोरमा** - म.म. भट्टोजिदीक्षितकृता। शब्दरत्न-बालप्रकाशटीकोपेता। चौखम्बा-सुरभारतीग्रन्थमाला-35. चौखम्बा सुरभारती प्रकाशन्, वाराणसी

**ऋग्वेदसंहिता** - श्रीमत्सायणाचार्यकृतभाष्योपेता, वैदिकसंशोधनमण्डलम्, तिलक महाराष्ट्र यूनिवर्सिटी।

~~~~~\*~~~~~\*~~~~~\*~~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# कालिदासीयकाव्येषु शब्दसम्पत्

**- डॉ. सौम्यजित् सेनः**[१]

सार्थकानां शब्दानामर्थानाञ्च सम्यग्व्यवहारेणैव कविकर्म मनोज्ञतामेति। महाकवीनां रचनासु सार्थकानां शब्दानामर्थानाञ्च समुपस्थितेः कारणत्वेन कविप्रतिभायाः कार्यकारित्वमेवोररीकृतमाचार्येण कुन्तकेन। तदुच्यते वक्रोक्तिजीविते –

**"शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः।।"**[२] इति।

विशेषावेगमथितक्षणे कविर्यदा काव्यं कौति, तदा प्रातिभे जगति अनुभूयेते स्पन्दनमुद्दीपनञ्च तेन। एतेन वास्तवजगतो गृहीतपदार्था विशेषे भावोज्ज्वलस्वरूपे प्रतिभासमानाः सन्तोऽलौकिकरूपाणां प्रकाशार्हशब्दानां कविचित्तवारिधौ कुर्वन्त्युपस्थापनम्। कविप्रयुक्तानां विशेषशब्दानां परिवर्तनेनैव कवेर्विवक्षा भवेद्विपर्यस्ता। एतादृशी शब्दपरिवृत्तिः 'शब्दपाक' इत्युच्यते। तथाहि *पदाधानोद्धरणमवेक्षणम्*[३] इति सूत्रे वामनाचार्यैरुद्धृतः श्लोकस्तावत् –

**"यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम्।**
**तं शब्दन्यासनिष्णाताः शब्दपाकं प्रचक्षते।।"**[४] इति।

प्रसङ्गेऽस्मिन् पाश्चात्यसाहित्यसमालोचकैः ड्रिङ्क-ओयाटार-पादैरप्युदितं –

"शब्द इत्युक्ते वयं कोलरिज्महोदय इवैतदेव विबोधयितुं प्रयतामहे यत् सोऽयं शब्द एकल एव विशेषोद्देश्यं साधयितुमलम्। काव्यन्तु शब्दैः कविचित्तगताया अभिज्ञताया विशेषसञ्चारणं, यदितरोपायैरसम्भवम्।" इति।

संस्कृतसाहित्याब्धौ कृतावगाहानां विदुषां यदखिलभुवनमण्डलमण्डनायमानं भारतखण्डमिदं पुरा सुचिरमलङ्कार्षुः नैके कवीन्द्राः स्वजनुषा, तेषु कनिष्ठिकाधिष्ठितः कालिदासः

---

[१] सहायकाध्यापकः, संस्कृत-विभागस्य, कोचविहार-पञ्चानन-वर्मा-विश्वविद्यालयस्य, पश्चिमवङ्गस्य।

[२] *वक्रोक्तिजीवितम्* (के.कृष्णमूर्ति-सम्पादितम्), प्रथमोन्मेषः, श्लोकः – ९.

[३] काव्यालङ्कारसूत्रवृत्तिः (नगेन्द्र-सम्पादिता), प्रथमाधिकरणे तृतीयोऽध्यायः, सूत्रम् - १५

[४] तत्रैवोद्धृतः श्लोकः।

कारयितृप्रतिभया ख्यातिमवाप क्वचित् शब्दपरिपाकनैपुण्यात्, क्वचिद्वा रूढार्थशब्दानां यौगिकार्थे प्रयोगात्, क्वचिद्वा प्रकृत्यादिवर्णनक्षमपदविन्यासात्।

अत्राधिप्रबन्धं महाकवेः कालिदासस्य काव्येषु शब्दप्रयोगकृतित्वमालोच्यते। कविना भिन्नेषु स्थानेषु भिन्ने च तात्पर्ये भिन्नार्थद्योतनायां वा विष्णुवाचकशब्दा गृहीताः। दिङ्मात्रमुदाहरणं तावन्मेघदूततः प्रस्तूयते –

**"रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ताद्**
**वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य।**
**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**
**वर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः।।"**[५] इति।

अत्र इन्द्रधनुःशोभितो मेघः मयूरपुच्छसुशोभितस्य विष्णोः श्यामलदेहेन सार्धं तुलितः। इह खलु श्रीकृष्णो विष्णोरवतारः। उपमेयस्य व्यापकावस्थानार्थमुपमानभूतः सर्वव्यापी विष्णुः आहृतः। अनुरूपतया, शिवपर्यायवाचकेषु विविधेषु शब्देषु सत्स्वपि प्रसङ्गानुसारं विशेषविवक्षानुसारेण विभिन्नान् शब्दान् जग्राह कविवरः कालिदासः। प्राकरणिकतयाभिधातुमलं यत् शिवस्य कल्याणमयरूपस्याभिद्योतनाय क्वचित् शिवशब्दः, क्वचिद्वा शम्भुशब्दः, भयङ्करताया द्योतनार्थं रुद्रः पिनाकी शूलीत्यादयः शब्दाः क्वचिद्वा प्रयुज्यन्ते।

'साग्रहं वीक्ष्यते' इति भावं प्रकटीकुर्वतासकृत् 'लोचनैः पीयमानः' इति वाग्व्यवहारो विहितः कालिदासेन। क्वचित्पुनः 'पपौ निमेषालकपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम्', 'प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः', 'दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः' इत्यादिभिः श्लोकैः भावोऽयं समभिव्यक्तः। अत्रैवास्त्येतरविलक्षणत्वं शब्दप्रयोगविधेः कालिदासीयकाव्यततीनाम्।

'मां न पराजित्य' इति भावं स्फुटीकर्तुमुद्यतेन काल्या दासेन कालिदासेन 'रघुं न निर्जित्य' इति यन्निगदितं तत्तु विशेषतात्पर्यमेवावहति। विशेषभावव्यञ्जकं तत्तात्पर्यं प्रकटयितुं मल्लिनाथसूरिणा प्रपञ्चितं – 'रघुमित्यनेनात्मनो दुर्जयत्वं सूचितम्' इति। 'रघ्वि'ति पदप्रयोगेणात्मनोऽजेयत्वमेव द्योतितं दिलीपात्मजेन। एवमेवोक्तिप्रत्युक्तिमाध्यमेन वक्ता यदा निजनाम प्रकाशते, तदा तु तेनात्मश्लाघेव सूच्यते। एतत्सर्वमतिरिच्य गमनार्थकलघ्धातोर्निष्पन्नस्य रघुशब्दस्यार्थो हि 'समरेऽखिलपरनाशनेन विग्रहपारगमनकर्ते'ति। अतः स्वसम्मानीयत्व-

---

[५] *मेघदूतम्* (एम.आर.काले-सम्पादितम्), श्लोकः – १५.

सूचनत्वमेवासीन्नामकीर्तनाभिप्रायः। तथा चोक्तं मल्लिनाथेन – 'रघोरिति स्वनामग्रहणं सम्भावितार्थद्योतनार्थम्' इति।

राघवानुरुद्धेन भद्राभिधेयेन चरणैकेन यदा प्रजावृत्तनिवेदनावसरे सीताविषयकं जनापवादवृत्तं श्रावितं, तदा रामस्य मानसिककरुणदशाया विवरणं प्रदत्तं कविचक्रवर्तिना कालिदासेन –

**'अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे'**[६] इति।

रामवाचकविविधशब्दविद्यमानत्वादपि कविवरेण तु वैदेहिन्धुरि'त्येव शब्दश्चितो विशेषाभिव्यञ्जनायै। विरहासहनकर्तैव बन्धुशब्दवाच्यः – 'अत्यागसहनो बन्धुः' इति।

रघुवंशस्य –

**"वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्समक्षम्।**
**मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य।।"**[७]

इति श्लोकेऽस्मिन् रामचन्द्र-प्रियतम-आर्यपुत्रादिपदान् परित्यज्य राजपदप्रयोगो विशेषार्थमेवाभिव्यनक्ति। रामचन्द्रस्त्वत्र केवलं प्रजारञ्जनव्यापृतस्तथा न्यायान्यायविचारशक्त्यपेतश्च। अतो विद्रूपाभिद्योतनाय राजशब्दप्रयोगः सार्थकतामेति।

'विक्रमोर्वशीय'नाटके उर्वशीसमानान्तःकरणेन पुरुरवसोररीकृतम् -

**"इदमसुलभवस्तु प्रार्थनादुर्निवारं**
**प्रथममपि मनो मे पञ्चबाणः क्षिणोति।।"**[८] इति।

अत्र मदनार्थद्योतनायां पञ्चबाणपदप्रयोगस्तु सुतरां सार्थकः। अनङ्ग-मनोभव-कामदेवादिशब्दानां व्यवहारोऽत्र नासीत्समीचीनो वस्तोर्विखण्डविधानं बाणैरेव साध्यत्वात्। क्षेमेन्द्रेण स्वकीयायामौचित्यविचारचर्चायां नामौचित्यस्योदाहरणतया सम्पूर्णं श्लोकमेवोद्धृत्योचे - 'मदनस्य पञ्चबाणाभिधानमुचितमेवे'ति। व्रजमोहनझामहोदयेनापि स्वटीकायामाटीकितं यत् -

"कामदेवस्य पञ्चबाण इति नामोपादानं नितरां समुचितम्। अर्थात् हृदयभेदनरूपकर्मकारिणः पञ्चबाण एव संज्ञोपयुक्तास्ति, यद्यत्रैव 'अनङ्ग' इत्युच्येत न तर्हि समुचितं स्यात्। तस्मादत्र कर्मोचितपञ्चबाणनाम्ना नाम्न औचित्यमत्यन्तम्।" इति।

---

[६] *रघुवंशम्* (काशीनाथ-पाण्डुरङ्ग-परब-सम्पादितम्), चतुर्दशसर्गः, श्लोकः – ३३.

[७] तत्रैव, श्लोकः – ६१.

[८] *विक्रमोर्वशीयम्* (शङ्कर-पी.-पण्डित-सम्पादितम्), द्वितीयोऽङ्कः, श्लोकः – ६.

शब्देनैव शब्दातीतसौन्दर्याभिद्योतनं महदेकं कविकर्म। परमनुक्तवचसोऽनिर्वचनीया द्योतनापि कविप्रतिभाया विशिष्टतमो विलासः। प्रतिभावतः कवेः काव्ये शब्दार्थौ हि विच्छेदाभावबन्धनाबद्धौ। यथार्थार्थाप्रकाशकः शब्दस्तु बन्ध्यः। तथैव यथोचिताभिव्यक्त्यद्योतकोऽर्थो हि मृतकल्पः। शब्दस्यानया बन्ध्यतया अर्थस्यानया वा मृतकल्पतया कालिदासकाव्यमन्दाकिनी कदापि न व्याहतेति कृतमतिपल्लवितेनेति दिक्।

## ।। परिशीलिता ग्रन्थानुक्रमी ।।

**कालिदासः** - (१९८०). *अभिज्ञानशाकुन्तलम्.* (सम्पा.) एम. आर. काले, राघवभट्टकृत-*अर्थद्योतनिका*-समेतम्. मोतिलाल वनारसीदास, दिल्ली, पुनर्मुद्रित-संस्करणम्.

(२००५). *कुमारसम्भवम्.* मल्लिनाथस्य *सञ्जीवनी*, चारित्रवर्धनस्य *शिशुहितैषिणी* तथा सीतारामस्य *सञ्जीविनी* इति टीकात्रयोपेतम्, राष्ट्रिय-संस्कृत-संस्थानम्, नई दिल्ली.

(१९४७). *मेघदूतम्.* (सम्पा.) एम. आर. काले, मल्लिनाथकृत-*संजीवनी*-टीकोपेतम्, राष्ट्र वैभव प्रेस, मुम्बई, चतुर्थ-संस्करणम्.

(१९२५). *रघुवंशम्.* (सम्पा.) काशीनाथ-पाण्डुरङ्ग-परबः, मल्लिनाथकृत-*संजीवनी*-टीकोपेतम्, निर्णय सागर प्रेस, मुम्बई, नवम-संस्करणम्.

(१८७९). *विक्रमोर्वशीयम्.* (सम्पा.) शङ्करः पी. पण्डितः, गभर्मेण्ट सेन्ट्राल बुक डिपो, बोम्बाई.

**कुन्तकः** - (१९७७). *वक्रोक्तिजीवितम्.* स्वोपज्ञवृत्तिसमेतम्, (सम्पा.) के. कृष्णमूर्तिः, कर्नाटक-विश्वविद्यालयः, धारवाडनगरम्.

**क्षेमेन्द्रः** - (१९९२). *औचित्यविचारचर्चा.* (सम्पा.) व्रजमोहन-झा, वाराणसी, (चतुर्थ-संस्करणम्).

**वामनः** - (१९५४). *काव्यालङ्कारसूत्रवृत्तिः.* (सम्पा.) नगेन्द्रः, (व्याख्या.) विश्वेश्वर-सिद्धान्तशिरोमणिः, आत्माराम एण्ड संस, दिल्ली.

~~~~~*~~~~~*~~~~~*~~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# पाणिनीयव्याकरणे नवाचारसर्जनस्य अवधारणा

**- पण्ड्या योगेशः एन्** [१]

**सारांशः**

नवसर्जनं प्रत्येकं जनः कामयते। प्रतिदिनं प्रवर्तमानस्य आचर्यमाणस्य च यत्किञ्चिदुपक्रमस्य विषये नावीन्यं मानवेषु ऊर्जां नवोत्साहञ्च ददाति। तेन नवोत्साहेन नवं कर्तुं मानवः प्रेरितः भवति। एषा नवाचारपरम्परा पारम्परिकशास्त्राध्ययनाध्यापनपरम्परायां प्राचीनकालात् परिलक्ष्यते। तद्यथा - पाणिनीयव्याकरणस्य पठनपाठनपरिपाट्याम् प्राचीनकाले उदाहरणकाव्यानाम् आरम्भः वस्तुतः प्राचीनशास्त्राध्ययनपरम्परायां तच्छास्त्रगतं दुरवगाहित्वम् अपाकृत्य, आपाद्य च तत्र सरलतां सरसताञ्च शास्त्रविद्भिः तत्तत्काले नवाचारस्यैव उपदेशः अस्मभ्यं कृतः। प्रकृतशोधलेखे संस्कृतव्याकरणशास्त्रे नवाचारसर्जनस्य विषये किञ्चिद् उल्लिख्यते। 'न सर्जनम्' वा 'नवाचारः' जगतः किञ्चन आवश्यकम् अभिन्नञ्च अङ्गम्। आधुनिके काले लोकाः 'Innovation' इति यदुच्यते, तत्र जनाः समधिकतरम् आकृष्टाः भवन्ति। प्राचीनत्वम् अनपहाय साम्प्रतिके काले जनसामान्यस्य कृते उपयुक्तस्य कस्यचित् उपायविशेषस्य आगमः 'नवाचारः' इति वक्तुं शक्यते। नवता एव रमणीयताम् उद्भावयति। अत एव महाकविमाघः रमणीयतायाः महिमानं बोधयन् नवाचारसर्जनस्यापि उपादेयताम् उपदिशति। तदुक्तं - **"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः"** [२] इति। माघमहाकविस्तु प्रतिक्षणं नवताविषये चिन्तयितुं तथा कर्तुञ्च अस्मान् धिनोति। प्रायेण सर्वः अपि जनः नवमेव कामयते। अतः हितोपदेशे गोचरणविषये लिखितम् - **"गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम्"** [३] इति। नवं वस्तु प्रशस्यं भवति। भगवत्पादाः जगद्गुरवः श्रीमदाद्यशङ्कराचार्याः अपि भगवन्तं श्रीकृष्णं स्तुवानाः इत्थं गायन्ति- **"दिने दिने नवं नवं नमामि नन्दसम्भवम्"** [४] इति। नवाचारविषये इदं ध्येयम्भवति यत् नवाचारसर्जनं पुरातनगौरवं तनूकरोति इति तु नैव विभाव्यम्। वस्तुतः नवाचारेण पुरातनस्य गौरवं न अपहृतं भवति , अपि तु

---

[१] सहायकप्राध्यापकः (संस्कृतम्), सर्वकारीय-विनयन-वाणिज्यमहाविद्यालयः, पालिताणा, गुजरातम्।

[२] महाकविमाघः, शिशुपालवधम्, मल्लिनाथसूरिकृत-सर्वङ्कषाव्याख्यासहितम्, सँस्कर्ता- पणशीकरवासुदेवशास्त्री- अष्टमसँस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, १९२३.

[३] श्रीनारायणपण्डितसङ्गृहीतः, हितोपदेशः, पण्डितरामेश्रभट्टकृतभाषाटीकासमलङ्कृतः, नवमसँस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, १९४४.

[४] जालपुटम्, https://sanskritdocuments.org/doc_vishhnu/krishna8.html.

प्रत्यग्रतारुण्यमिव वर्धते। अतः महाकविः कालिदासः प्राचीननवाचारयोः उभयोः प्राशस्त्यं बोधयति। तदुक्तं -**"पुराणमित्येव न साधु सर्वं न चापि सर्वं नवमित्यवद्यम्"**[५] इति।

पाणिनीयव्याकरणशास्त्रं नवाचारसन्दर्भे यदि परिशीलयेम,तर्हि इदम् अवश्यं ज्ञायते यत् शास्त्रपठने शास्त्रपाठने यत्प्रतिदिनम् अनुष्ठीयते, तत्र यदि काचित् नीरसता वा कठिनता अनुभूयेत , तर्हि कश्चन नवः प्रयोगः विद्वद्भिः समाश्रित एव। प्राचीनपद्धत्या पाणिनीयव्याकरणपठनपाठनयोः मन्दमेधसां पाठकानां विषये यत्काठिन्यम् अनुभूतं, तद्दूरीकर्तुं श्रीमता भट्टोजिदीक्षितेन कश्चन नवाचारः आरब्धः, यश्च इदानीं 'वैयाकरणसिद्धान्तकौमुदी' इत्याख्यग्रन्थरूपेण साक्ष्यं पूरयति। यद्यपि वैयाकरणसमाजे प्राचीननवीनपरम्परयोः गुणदोषाः चर्च्यन्ते, तथापि नवाचारसर्जनं बहुभ्यः उपकाराय कल्पते इति तु वक्तुं शक्यते। रामशब्दरूपं साधयितुम् अष्टाध्यायीक्रमेण अध्ययने यत्काठिन्यं मन्दधीभिः अनुभूतं, तद् वैयाकरणसिद्धान्तकौमुद्या दूरीकृतम्। रामशब्दरूपसाधनाय आदौ प्रातिपदिकसंज्ञा कर्तव्या। तद्विधायकं सूत्रं प्रथमाध्याये[६], तदनु सुप्प्रत्ययविधायकं 'स्वौजस्...' इत्यादिसूत्रं चतुर्थाध्याये[७]। तदनु यैः सूत्रैः रामशब्दरूपसिद्धिविषये प्रवर्तनीयं तानि सूत्राणि अष्टाध्याय्यां पार्थक्येन स्थितानि सन्ति। अतः रामशब्दरूपसिद्धिविधिः ज्ञातव्यः तर्हि सकला अष्टाध्यायी अध्येतव्या। सकलाष्टाध्यायीपठने न कश्चिदपि दोषलेशः। किन्तु कदाचित् कश्चित् अत्यन्तम् उपयुक्तांशं प्रयोगैकलक्ष्यं व्याकरणम् अधिजिगमिषति तर्हि सकलाष्टाध्यायीपठनापेक्षया किञ्चित्सङ्क्षिप्ततरः प्रायौगिकज्ञानोपयुक्तग्रन्थनिर्माणरूपः नवीनः सर्जनविशेषः चिन्तनीयः। पाणिनीयपरम्परायां वैयाकरणसिद्धान्तकौमुदीप्रणयनरूपः नवाचारसर्जनविशेषः अस्ति। वस्तुतस्तु व्याकरणं नाम वेदाङ्गम्। वेदानां परिरक्षणाय इदं व्याकरणाङ्गं प्रवृत्तम्। तत्र शिष्टेन पारदृश्वना भगवता पाणिनिना येन क्रमेण मूलग्रन्थः प्रणीतः, तस्मिन् विशिष्टक्रमे वैदिकत्वं परिरक्षितुं तस्य मनसा अपि अनभिभवनीयं वैज्ञानिकमहत्त्वं निर्विवादतया नूनम् अस्त्येव। परन्तु काले काले सामान्यलोकानां कृते शास्त्रपुष्पसुगन्धं घ्रापयितुम् इमे नवाचारसर्जनप्रयोगाः कृताः। इत्थं शास्त्रीयग्रन्थरचनायां नवाचारसर्जनस्य एकं निदर्शनं दृष्टम्।

अपरमेकं निदर्शनमस्ति अस्माकं पञ्चमहाकाव्यपाठनप्रणाली। पूर्वं व्याकरणगताः सन्धि-समास-पदव्युत्पत्ति-शब्दधातुरूपादिसम्बद्धाः विषयाः सरलतया छात्रेभ्यः पाठयितुं पञ्चमहाकाव्यानां पदच्छेद-पदपरिचय-अन्वय-वाच्यपरिवर्तन-पदार्थोक्ति-भावार्थ-विशिष्टार्थ-अलङ्काराः इत्येवं सोपानशः पाठ्यन्ते स्म। एतेन महाकाव्यगतकथावस्तुद्वारैव व्याकरणविषयाः अन्यशास्त्रसम्बद्धाः

---

[५] महाकविकालिदासः, मालविकाग्निमित्रम्, संशोधकः - काशीनाथ पाण्डुरङ्ग परब, संशोधकः - पणशीकरवासुदेवशर्मा, षष्ठसँस्करणम्, निर्णयसागरमुद्रणालयः, मुम्बई, शकाब्दः - १८४६.

[६] महर्षिपाणिनिप्रणीता अष्टाध्यायी, १-२-४५.

[७] महर्षिपाणिनिप्रणीता अष्टाध्यायी, ४-१-२

अंशाः च बोध्यन्ते स्म। इदमपि अस्माकं पूर्वसूरिणां तत्काले शास्त्राध्ययनपरिपाट्यां नवाचारसर्जनम् इति निश्चप्रचं कथयितुं शक्यते। पञ्चतन्त्रादिकथाग्रन्थानां रचनम् अस्मिन् सन्दर्भे उदाहरणभूतम् इति कः न जानाति?

अन्यदेकं पाणिनीयव्याकरणपरम्परायां विशिष्टं नवाचारसर्जनं नाम उदाहरणकाव्यानाम् आविर्भावः।

एषः उदाहरणकाव्यारम्भः वस्तुतः शास्त्रगतं नैरस्यम् अपाकृत्य कथावस्तु माध्यमीकृत्य शास्त्रगतान् विषयान् पाठकेषु सङ्क्रामयितुं नितरां विशिष्टः उपक्रमः। अतः काव्यालङ्कारे उक्तम् -

**"स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते। प्रथमालीढमधवः पिबन्ति कटुभेषजम्।।"**[८]

एतेषु उदाहरणकाव्येषु भट्टिकाव्यम्, रावणार्जुनीयम्, नैषधमहाकाव्यम्, वासुदेवविजयम्, सुभद्राहरणम्, सुगलार्थमाला, कौमुदीकथाकल्लोलिनी इत्यादीनि बहूनि प्रथितानि व्याकरणोदाहरणकाव्यानि सन्ति। एतेषाम् उदाहरणकाव्यानाम् इदं प्रमुखं प्रयोजनं भवति यत् किञ्चन कथावस्तु उपजीव्य पाणिनीयसूत्राणां प्रयोगः कथं भवतीति ज्ञापनीयम्। तद्यथा - रामकथाम् उपजीव्य महाकविभट्टिना भट्टिकाव्यं प्रणीतम्। प्रायेण सर्वः अपि आस्तिकजनः रामायणकथावस्तुना परिचितः भवति। अतः प्रसिद्धमेव कथावस्तु किञ्चिद् रोचकं विधाय तद्द्वारा पाणिनीयसूत्राणाम् अर्थावगमनपुरस्सरम् उदाहरणरूपेण प्रस्तुतिः उदाहरणकाव्येषु भवति। उदाहरणकाव्यानि वस्तुतः सूत्रार्थानाम् अवगमनाय, किञ्च प्रायौगिकदृष्ट्या शास्त्रगतस्य विषयस्य विधेयतां ज्ञातुम् अत्यन्तम् उपयुक्तानि भवन्ति। सिद्धान्तकौमुद्यां काशिकायां च सूत्रोदाहरणानि यानि दत्तानि, तानि विशकलितरूपेण वा वाक्यरूपेण सन्ति। अतः तानि उदाहरणानि तथा नोपकुर्वन्ति यथा उदाहरणकाव्यानि सूत्रार्थावगमाय प्रयोगज्ञानाय च उपकुर्वन्ति।

प्रायेण अस्माकं लकाराणां प्रयोगसन्दर्भे प्राथमिकस्तरे इयं स्पष्टता भवति यत् लडादिदशलकाराः वर्तमानभूतभविष्यदादिसन्दर्भेष्वेव प्रयुज्यन्ते इति। परन्तु भविष्यत्काले प्रयुज्यमानः लृट्लकारः भूतकालिकीं काञ्चन घटनाम् अन्यस्मै स्मारयितुम् अनद्यतनभूतकालसन्दर्भे प्रयुज्यते। तद्यथा - **"अभिज्ञावचने लृट्"**[९] इतीदं सूत्रं स्मारकवचने समीपोच्चारिते सति अनद्यतनभूतकाले लृट्लकारं शास्ति। भविष्यत्काले लृट्लकारप्रयोगस्य अधिकतया करणात् इदं सूत्रम् अवगन्तुं प्रकृतसूत्रोक्तघटनासन्दर्भे प्रयोक्तुं च अवश्यं कठिनता स्यात्। केवलं काशिकाकौमुद्युदाहरणमुखेन विशेषेण स्पष्टता न स्यात्। किञ्च लकारार्थसूत्राणि उत्सर्गापवादरीत्या प्रणीतानि सन्ति। एवम् अन्येषामपि लकाराणां विषये परस्परम् उत्सर्गापवादरीत्या विधानं लकारार्थसूत्रप्रकरणे

---

८ श्रीभामहप्रणीतः,काव्यालङ्कारः,श्रीबालमनोरमाग्रन्थश्रेणी५४, सी.शङ्कररामशास्त्रिकृताङ्ग्लानुवादसहितः, श्रीबालमनोरमाप्रेस, मद्रपुरी- १९५६.

९ महर्षिपाणिनिप्रणीता अष्टाध्यायी, ११२-२-३

निरूपितम्। अतः तेषां सूत्राणाम् अवगमने या झटिलता, ताम् अपसारयितुं व्याकरणोदाहरण-काव्यानि सुतराम् उपयुक्तानि सन्ति। इत्थमेव सन्धि-समास-सुबन्त-कारक-कृदन्त-तद्धितान्त-तिङन्तादिविषयान् अधिकृत्य उदाहरणकाव्यैः शास्त्रकवयः शास्त्रविषयवस्तु जिज्ञासुषु सङ्क्रामयन्ति। व्याकरणोदाहरणकाव्येषु केरलीयशास्त्रकवयः शीर्षण्यं स्थानं बिभ्रति।

शास्त्रविषयावगमने यदि काठिन्यं तर्हि कश्चन नवाचारसर्जनविशेषः शास्त्रीयविषये चिन्तनीयः इत्यत्र 'पेरुन्तानम् नारायणन् नम्पूत्तिरिः' इत्याख्येन केरलीयकविना रचितं स्वशिष्येभ्यः सुखबोधाय 'सुगलार्थमाला' इत्याख्यं लकारविषयकम् उदाहरणकाव्यम् उदाहरणभूतम्। अस्य रचना किमर्थं कृता? इत्यस्मिन्विषये 'उत्सवः सुधियामलम्' इत्याख्ये शोधपत्रग्रथिते पुस्तके उल्लिखितम् - **"स्वशिष्येण लकारार्थविषयककृतिरचनार्थं कृता प्रार्थना, तदनु गुरुकुले सतीर्थ्यैः सह कृतस्य व्याकरणाध्ययनस्य स्मरणम्, स्वस्योपनयनम्, तदान्तीनमनोगतानि, पित्रा सह कृतानि उपदेशवाक्यानि ...."**[१०] इत्येवम्प्रकारेण सामान्यविषयान् आधृत्य एषा कृतिः प्रणीता।

अनेन इदं बोद्धुं शक्यते यत् शास्त्रीयपरिपाट्याम् अपि प्राचीनत्वम् अनपहाय कालानुगुणतया नवाचारसर्जनविशेषेण वयं छात्रेभ्यः सामाजिकेभ्यश्च दातुं शक्नुयाम।

~~~~~*~~~~~*~~~~~*~~~~~

[१०] उत्सवः सुधियामलम्, कालिकट् विश्वविद्यालयसंस्कृतश्रेणी-५६, सम्पादकः - डो. एन्. के. सुन्दरेश्वरन्, प्रकाशकः - कालिकट् विश्वविद्यालयः, अक्तूबर-२०१७.
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# पाणिनीयतन्त्राभिमतः कर्मत्वविमर्शः

**- लोकेशकुमारः[१]**
**- डॉ. विनोद कुमार झा[२]**

**उपोद्घातः :-**

प्रक्रियाप्रस्थानम् आर्थिकप्रस्थानं चेति पाणिनीयतन्त्रस्यास्ति गतिद्वयी सुविश्रुता। तत्राद्यं तावत्प्रकृतिप्रत्ययविभागद्वारा शब्दसंस्कारकम्। अथ विभक्तानाञ्च प्रकृतिप्रत्ययविभावनमेव आर्थिकप्रस्थानमिति निगदन्ति मनीषिणः। एतस्मिन्नार्थिकप्रस्थानप्रकरणे विभक्त्यर्थविचारः प्रामुख्येन परिशील्यते। विभक्त्यर्थविचारप्रकरणे च कारकप्रकरणमस्ति तदाधारभूतम्। सत्सु कारकेष्वेव प्राधान्यतो विभक्त्यर्थविचारो भवति फलितार्थः।

**कर्ता कर्म च करणं च सम्प्रदानं तथैव च। अपादानमधिकरणं च भवन्ति कारकाणि षट्।।**

इत्युक्तरीत्या कारकाणि षड्संख्याकानि सुविश्रुतानि। तत्र पाणिनीयकारकाधिकारप्रकरणे द्वितीयादिविभक्तिप्रयोजकानि कर्मसंज्ञाविधायकानि दश सूत्राण्युपलभ्यन्ते :-

**१. कर्तुरीप्सिततमं कर्म।**

**२. तथायुक्तं चानीप्सितम्।**

**३. अकथितं च।**

**४. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ।**

**५. हृक्रोरन्यतरस्याम्।**

**६. अधिशीङ्स्थासां कर्म।**

**७. अभिनिविशश्च।**

**८. उपान्वध्याङ्वसः।**

---

[१] शोधच्छात्रः, व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातप्रदेशः, chaturlokesh@gmail.com
[२] आचार्यः अध्यक्षश्च- व्याकरणविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्- ३६२ २६५

**९. क्रुधद्रुहोरुपसृष्टयोः कर्म।**

**१०. दिवः कर्म च।**

उपरिष्टादेतेषु यथाक्रमं सूत्रत्रयमीप्सिततमस्य, अनीप्सितस्य, अपादानादिभिश्चाकथितस्य कारकस्य कर्मसंज्ञां विदधाति। ततः सूत्रद्वयमण्यन्तस्य कर्तुर्ण्यन्तावस्थायां नित्यां वैकल्पिकीं च कर्मसंज्ञां शास्ति। अथ सूत्रत्रयमधिकरणसंज्ञां बाधित्वा कर्मसंज्ञाविधानं प्रकुरुते। पुनश्च सूत्रमेकं सम्प्रदानसंज्ञां बाधित्वा कर्मसंज्ञां ततश्च सूत्रमेकं करणसंज्ञया सह वैकल्पिकीं कर्मसंज्ञां प्रशास्ति। इह कर्मसंज्ञाविधायकानीमान्येव पाणिनीयानि सूत्राण्यधिकृत्य प्रतिसूत्रं कर्मसंज्ञाविमर्शो विधास्यते।

**पाणिनीयं कर्मस्वरूपम् :-**

कर्मलक्षणविचारणायां तावद् **"यत्क्रियते तत्कर्म"**[३] इति कर्मलक्षणमभिहितं कातन्त्र-व्याकरणे। कातन्त्रोक्तं कर्मलक्षणमिदमकिञ्चनप्रायमिव भाति। पाणिनिनाचार्येण विहितमस्य लक्षणं तु **'कर्तुरीप्सिततमं कर्म'**[४] इति। **कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवतीति**[५] प्रकृतसूत्रार्थः। वैयाकरणभूषणकारस्तु **"फलव्यापारार्थो धातुः, व्यापाराश्रयः कर्ता, फलाश्रयं कर्म"**[६] इति न्यरूपयत्। उदाहरणेनास्य समन्वयो यथा "ग्रामं गच्छति" इति वाक्ये गमनरूपव्यापाराश्रयः कर्ता, तादृशव्यापारजन्यसंयोगरूपफलाश्रयं च कर्म। इदं कर्म त्रेधा भवति निर्वर्त्यं विकार्यं प्राप्यं चेति। अत्र वाक्यपदीयकारः प्राह :-

**यदसज्जायते सद्वा जन्मना यत्प्रकाशते।**
**तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्।।**[७]

**प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत्।**
**किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।।**[८]

**क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।**
**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।**[९]

---

[३] कातन्त्रव्याकरणम्, १.४.१३

[४] पाणिनीया अष्टाध्यायी, १.४.४९

[५] काशिकावृत्तिः १.४.४९

[६] वैयाकरणभूषणसारः, कारिका- २

[७] वाक्यपदीयम्, तृतीयं काण्डम्, ४९

[८] तत्रैव ५०

[९] तत्रैव ५१

निर्वर्त्यं कर्म यथा "घटं करोति" इति। घटः पूर्वमसन् कुम्भकारव्यापारेणोत्पाद्यते। कपालद्वयसंयोगरूपेण जन्मादाय घटरूपेण प्रकाशत इति भावः। इहासन् जायते। घटः पूर्वमव्यक्तत्वेनासीत्। कर्तुर्व्यापारेण तस्य प्रकाशः। पक्षद्वयेऽपि जन्मादाय घटः प्रकाशते। इदं निर्वर्त्यं कर्म।

विकार्यं कर्म तु द्वैधम् :- **१. प्रकृत्युच्छेदसम्भूतम् २. गुणान्तरोत्पत्तिसम्भूतम्।**

"काष्ठं भस्म करोति" इति प्रकृत्युच्छेदसम्भूतस्योदाहरणम्। इह काष्ठनाशात् भस्मोत्पत्तिः। "सुवर्णं कुण्डलं करोति" इत्युदाहरणं गुणान्तरोत्पत्तिसम्भूतस्य। अत्र सुवर्णावयवात्कुण्डलावयवो भिन्नः। **क्रियाकृतविशेषानुपलभ्यमानत्वं प्राप्यत्वमिति।** तद्यथा "घटं पश्यति" इति। दृष्टादृष्टघटयोर्भेदाभावाद्दर्शनं प्रति घटस्य प्राप्यकर्मत्वम्।

अनीप्सितं कर्म चतुर्विधं भवति। तदाह भर्तृहरिः -

**औदासीन्येन यत्प्राप्तं यश्च कर्तुरनीप्सितम्।**
**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।**[१०]

एतस्य क्रमशः उदाहरणानि :-

१. "तृणं स्पृशति" इति उदासीनकर्मण उदाहरणम्। "तृणं स्पृशन् ग्रामं गच्छति" इत्यर्थः। अत्र तृणरूपकर्मणो नेप्सिततमत्वम्।
२. "जलं मत्वा विषं भुङ्क्ते" इत्यनुद्दिष्टकर्मण उदाहरणम्। अत्र विषभोजनं कर्तुर्नाभिप्रेतम्। किन्त्वनवधानतया तस्येदं सञ्जायते।
३. "गां दोग्धि पयः" इति संज्ञान्तरैरनाख्यातस्य कर्मण उदाहरणम्। अत्र गौर्दोहनक्रियायामप्रधानं कर्म।
४. 'दिवः कर्म च' इत्यादिसूत्रैर्विहितानि कर्माणि अन्यपूर्वककर्माणि। तद्यथा "अक्षान् दीव्यति", "क्रूरम् अभिक्रुध्यति" इति अक्षशब्दस्य क्रूरशब्दस्य च कर्मसंज्ञा।

इत्थमिह कर्मस्वरूपं यथाशब्दशास्त्रं तद्वैविध्यं च प्रतिपाद्य कर्मकारकस्य विमर्श आरभ्यते :-

**'कारके'**[११] इति कारकप्रकरणस्यादिमं सूत्रम्। कारके इति पदमधिकृत्य वक्ष्यमाणानि सूत्राणि प्रणीयन्त इत्यर्थः। इतो वक्ष्यमाणेषु तेषु तेषु सूत्रेषु कारके इति पदं योजनीयमिति भावः। **क्रियाजनकं कारकमिति**[१२] कारकस्य सामान्यलक्षणम्। अतो "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इति वाक्ये ब्राह्मणपदस्य न कारकत्वम्। ब्राह्मणः प्रश्नक्रियां न जनयति। पुत्रः कारकः।

---

[१०] तत्रैव ४६
[११] पा. अष्टा. १.४.२३
[१२] सिद्धान्तकौमुदी, बालमनोरमा, ५३५

ब्राह्मणस्त्विहान्यथासिद्धो भवति। कारके कर्मादिसंज्ञा विहिता। सर्वेषामपि कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वं बोध्यम्। इहेदानीं प्रतिसूत्रं कर्मसंज्ञा विमृश्यते :-

**१. कर्तुरीप्सिततमं कर्म :-**

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति 'कर्तुरीप्सिततमं कर्म'[१३] इति सूत्रेण विधीयते। तद्यथा "हरिं भजति" इति। ईप्सिततममिति तमप्प्रत्ययेन कोऽर्थः सिध्यतीति प्रश्नश्चेत् "पयसा ओदनं भुङ्क्ते" इति दृष्टान्ते पयश्च ओदनञ्च द्वे अपि भोजनक्रियया आप्तुमिष्येते। किन्तु ओदने एवात्र भोजनप्राधान्यम्। संस्कारमात्रं पयः। अत ईप्सिततमत्वमोदनस्यैव न पयसः। एवं तमपो ग्रहणे ओदनस्य कर्मसंज्ञा सिद्धा भ्वति।

**'आधारोऽधिकरणम्'** [१४] , **'अधिशीङ्स्थासां कर्म'** [१५] , **'अभिनिविशश्च'** [१६] **'उपान्वध्याङ्वसः'**[१७], **'कर्तुरीप्सिततमं कर्म'**[१८] इति सूत्रक्रमः। एषु सूत्रेषु कर्म इत्यनुवर्तते। एवञ्चेत् 'कर्तुरीप्सिततमम्' इत्येव सूत्रमस्तु इति शङ्का सञ्जायते। कर्मपदलाभोऽनुवृत्त्या लभ्येत इति न युक्तम्। 'कर्म' इत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थं विज्ञेयम्। अन्यथा "गेहं प्रविशति" इत्याद्याधारस्यैव कर्मसंज्ञा जायेत। "ओदनं भुङ्क्ते" इत्यादिस्थले ओदनस्य कर्मसंज्ञा न सिध्येत। अनुवृत्तिलाभं विहाय 'कर्म' इति पुनरुच्यमाने अनुवृत्तिविच्छेदो भवति 'आधार' इत्यस्य निवृत्तिरपि। ईप्सितशब्दोऽत्र क्रियापरः, नाभिप्रेतपरो रूढः। वाक्यपदीये कर्मणः सप्तप्रकारकत्वमुक्तम्। यदीप्सिततमं कर्म तत् निर्वर्त्यं, विकार्यं, प्राप्यं चेति त्रिधा भवति। तत्र यथोक्तम् -

**निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।**
**तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।**[१९]

ईप्सिततमभिन्नं तु यथा -

**औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।**
**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।**[२०]

---

[१३] पा. अष्टा. १.४.४९

[१४] तत्रैव १.४.४५

[१५] तत्रैव १.४.४६

[१६] तत्रैव १.४.४७

[१७] तत्रैव १.४.४८

[१८] तत्रैव १.४.४९

[१९] वाक्यपदीयम्, तृतीयं काण्डम्, ४५

[२०] तत्रैव ४६

इति कारिकया ईप्सिततमभिन्नस्य कर्मणः चातुर्विध्यमुक्तम्। ईप्सितत्वाभावे सति द्वेष्यत्वाभावे च सति यत्प्राप्यः क्रियाजन्यफलाश्रयस्तदेक इत्यर्थः। अनीप्सितं द्वेष्यं तद्द्वितीयम्। संज्ञान्तरैरनाख्यातम् अपादानादिसंज्ञाभिरविवक्षितम् अकथितं चेति सूत्रविहितं कर्म, तत्तृतीयमित्यर्थः अन्यपूर्वकमिति। अन्यसंज्ञाप्राप्तौ सत्यां कर्मसंज्ञकम्। यथा क्रूरम् अभिक्रुध्यतीत्यत्र क्रुधद्रुहेर्ष्येति सम्प्रदानसंज्ञा प्राप्ता, तां बाधित्वाक्रुधद्रुहोरुपसृष्टयोः कर्मेति विहितकर्मसंज्ञकम्, तच्चतुर्थमित्यर्थः।

## २. तथायुक्तं चानीप्सितम् :-

'तथायुक्तं चानीप्सितम्' [२१] इति सूत्रमपि कर्मसंज्ञाविधायकम्। सूत्रस्थस्तथाशब्दः सादृश्यवाचकः। ईप्सिततमसादृश्यमित्यर्थः। **"ईप्सिततमवत्क्रियया अनीप्सितमपि कारकं कर्मसंज्ञं भवति"** इत्यर्थः। अनीप्सितस्यापि कारकत्वात् अनीप्सितकर्मशब्देन तस्य व्यवहारः। अत्र क्रियया युक्तमित्यस्य क्रियाजन्यफलयुक्तमित्यर्थः। द्वेष्यस्य उपेक्ष्यस्य च कर्मत्वसूचनायैव अनीप्सितमित्युक्तम्। उपेक्ष्यस्य यथा "ग्रामं गच्छन् तृणं स्पृशति" इति। अत्र तृणस्पर्शनं न ईप्सिततमम्। किन्तु संयोगरूपफलाश्रयत्वात् तृणस्य कर्मत्वम्। "विषं भुङ्क्ते" इत्येतद् द्वेष्यकर्मण उदाहरणम्। शत्रुकाराग्रहस्थो विषं भुङ्क्ते। इह विषो विद्वेषस्य विषयः। अतो न भोजनक्रिययाप्तुमिष्टतमः। तथापि गलविवरप्रवेशस्य फलस्याश्रयत्वादनीप्सितकर्मत्वम्।

एवमिदं सूत्रं द्वेष्यस्य उपेक्ष्यस्य च कर्मसंज्ञासिध्यर्थं भवति। एतत्सूत्रविषये ईप्सितवदेव क्रियासंबद्धं चेत् अनीप्सितमपि कर्माख्यम् इत्युक्तम् प्रक्रियासर्वस्वे। भाष्ये अनीप्सितस्य ईप्सिततमवत् क्रियाजन्यफलाश्रयत्वम् उक्तम्। [२२] अतः अनीप्सितस्यापि ईप्सिततमवत्कर्मसंज्ञा द्वितीया च।

## ३. अकथितं च :-

अकथितं च [२३] इति सूत्रमपि कर्मसंज्ञाविधायकम्। 'अकथितम्' इत्यस्य 'अविवक्षितम्' इत्यर्थः। यथाह भर्तृहरिः -

**प्रधानकर्म कथितं यत्क्रियायाः प्रयोजकम्। तत्सिद्धये क्रियायुक्तमन्यत्त्वकथितं स्मृतम्।।** [२४]

केन अविवक्षितमित्याकाङ्क्षायां अपादानादिना अविवक्षितम् इत्युत्तरम्। अत्र भाष्ये केन अकथितम्, किं साधारणकारकसंज्ञया, अथ विशेषसंज्ञाभिः अपादानादिभिरिति प्रश्नः। अत आह

---

[२१] तत्रैव १.४.५०

[२२] पातञ्जलमहाभाष्यम्, १.४.३

[२३] पा. अष्टा. १.४.५१

[२४] वाक्यपदीयम्, तृतीयकाण्डम्, ७१

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यादिति। दुहादीनां द्वादशानां नीप्रभृतीनां च चतुर्णां कर्मणा यद्युज्यते तदेव अकथितं कर्मेति परिगणना अत्र कारिकयानया विधीयते–

**दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।**
**ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।।**[२५]

**दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।**[२६]

तद्यथा गां दोग्धि पयः, बलिं याचते वसुधां, अविनीतं विनयं याचते, तण्डुलान् ओदनं पचति, गर्गान् शतं दण्डयति, व्रजमवरुणद्धि गाम्, माणवकं पन्थानं पृच्छति, वृक्षमवचिनोति फलानि, माणवकं धर्मं ब्रूते शास्ति वा, शतं जयति देवदत्तम्, सुधां क्षीरनिधिं मथ्नाति, देवदत्तं शतं मुष्णाति, ग्राममजां नयति हरति कर्षति वहति वा इत्यादि। अन्तःस्थितद्रवद्रव्यनिष्ठविभागानुकूल-व्यापारो दुहेरर्थः। गां पयो दोग्धिरित्यत्र गोः अपादानत्वेन न विवक्षा। अतः अकथितम्। तत्प्रयुक्तकर्मसंज्ञा च। एवमितरदपि विज्ञेयम्।

### ४. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ :-

'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ'[२७] इति सूत्रेण णौ अनुत्पन्ने सति शुद्धवाच्यक्रियां प्रति यः कर्ता स ण्यन्तधातुवाच्यां प्रयोजकव्यापारात्मिकां क्रियां प्रति कर्मसंज्ञकः स्यादित्युच्यते। क्रमेण श्लोकनिबद्धानि उदाहरणानि यथा -

**शत्रूनगमत्स्वर्गं वेदार्थं स्वानवेदयत्।**
**आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्।।**
**आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।।**[२८]

इह अण्यन्तकर्तृसंज्ञकाः कर्मसंज्ञां लभन्ते। गतिबुद्धिप्रत्यवसानार्थेत्यत्र प्रत्यवसानस्य भक्षणमित्यर्थः। तथा गतिबुद्धिप्रत्यवसानार्थेत्यस्य गत्यर्थकस्य ज्ञानार्थकस्य भक्षणार्थकस्य च इत्यर्थः। अकर्मकाः इत्यस्य अविद्यमानं कर्म येषां ते इत्यर्थः। शब्दकर्मकस्थस्य शब्दकर्मक इति सूत्रांशस्थस्य कर्मशब्दस्य कर्मकारकमित्यर्थः। अत्र 'णि' इत्येषः प्रत्ययः। **''प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तग्रहणम्''**[२९] इति परिभाषया ण्यन्तमित्यर्थः। शत्रवः स्वर्गम् अगच्छन्, हरिः शत्रुं

---

[२५] पातञ्जलमहाभाष्यम्, १/४/५१

[२६] सिद्धान्तकौमुदी, कारकप्रकरणम्, ५३९

[२७] पा. अष्टा. १.४.५२

[२८] सिद्धान्तकौमुदी, ५४०

[२९] परिभाषेन्दुशेखरः २३

स्वर्गम् अगमयत्। इह शत्रवः अणौ कर्तारः णौ तु कर्माणि। इदं गत्यर्थस्य उदाहरणं भवति। ज्ञानार्थस्य उदाहरणं तु स्वे वेदार्थम् अविदुः, हरिः स्वान् वेदार्थम् अवेदयत्। इह स्वशब्दः आत्मीयपरः स्वे स्वकीयाः भक्ताः वेदार्थम् अविदुः तान् हरिः वेदार्थम् अवेदयत् इत्यर्थः। अत्र स्वेषां प्रयोज्यकर्तृणां कर्मत्वम्। भक्षणार्थस्य उदाहरणं यथा देवाः अमृतम् अश्नन् हरिः देवान् अमृतम् आशयत्। अत्राऽपि अणौ देवाः कर्तारः णौ देवान् इति कर्मार्थे। विधिः वेदमध्यैत। इह वेदशब्दः कर्म। हरिः विधिं वेदमध्यापयत्। इह अणौ कर्ता विधिः णौ विधिम् इति कर्म। अकर्मकस्य उदाहरणं यथा पृथ्वी सलिले आस्त, हरिः पृथ्वीं सलिले आसयत्। इह अणौ कर्ता पृथ्वी, णौ पृथिवीम् इति कर्म। गत्याद्यर्थाभिन्नानाम् अणौ कर्ता णौ कर्म न भवति।

'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ' इति सूत्रस्थबुद्धिशब्देन ज्ञानसामान्यवाचिनां बोधयतिवेत्तिप्रभृतीनां ग्रहणम्। ज्ञानविशेषवाचिनां दर्शनघ्राणश्रवणादीनां ग्रहणं मास्तु इति सूचनाय आह दृशेश्च[३०] सूत्रस्थबुद्धिशब्देन ज्ञानसामान्यवाचिनां विशेषवाचिनां च ग्रहणं स्यात्तर्हि वार्त्तिकस्य अस्य वैयर्थ्यमापद्येत।

**५. ह्रक्रोरन्यतरस्याम् :-**

**"ह्रक्रोः अणौ यः कर्ता स णौ वा कर्मसंज्ञः स्यात्"** इति ह्रक्रोरन्यतरस्याम्[३१] इति सूत्रस्यार्थः। ह्रधातुर्गत्यर्थे अन्तर्भवति। अतः पूर्वसूत्रप्राप्तायाः कर्मसंज्ञाया अनेन पाक्षिकत्वं विधीयते। एवमिदं सूत्रं प्राप्तविभाषा। कृधातुः गत्यर्थे नान्तर्भवति, अतः पूर्वसूत्रेण अप्राप्तस्य विभाषा।

"भृत्यः कटं हरति" इत्यत्र 'ह्रक्रोरन्यतरस्याम्' इति सूत्रेण अणौ कर्ता भृत्यः णौ पाक्षिकेण कर्मसंज्ञां भजते। "स्वामी भृत्यं कटं हारयति" इति। कर्मसंज्ञायाः अभावे स्वामी भृत्येन कटं हारयति इति प्रयोक्तव्यम्। एवं भृत्यः कटं करोति, स्वामी भृत्यं कटं कारयति। कर्मसंज्ञायाः पाक्षिकत्वात् तदभावे स्वामी भृत्येन कटं कारयति। इह कर्तरि तृतीयैव।

**६. अधिशीङ्स्थासां कर्म :-**

अधिपूर्वकाणां शीङ् (शेते) स्था (तिष्ठति) आस् (आस्ते) इत्येषामाधारस्य कर्मसंज्ञा विधीयते 'अधिशीङ्स्थासां कर्म'[३२] इति सूत्रेण। 'आधारोऽधिकरणम्' इति सूत्रात् आधारो इत्यनुवर्तते। अधिकरणसंज्ञायाः अपवादः अयं योगः। सत्यां कर्मसंज्ञायां 'कर्मणि द्वितीया'[३३] इति द्वितीया। सप्तम्याः स्थाने द्वितीया इत्यर्थः। अधिशेते वैकुण्ठं हरिः, अधितिष्ठति वैकुण्ठं हरिः, अध्यास्ते

[३०] वार्त्तिकम् ११०५
[३१] पा. अष्टा. १.४.५३
[३२] तत्रैव १.४.४६
[३३] तत्रैव २.३.२

वैकुण्ठं हरिः इत्युदाहरणानि। अधिशब्दाभावे तु वैकुण्ठे शेते इत्यादिप्रयोगः। अत्र अधिस्तु सप्तम्यर्थस्य आधारस्य सूचकः। अर्थस्तु वैकुण्ठे शेते, वैकुण्ठे तिष्ठति, वैकुण्ठे आस्ते इति। दशरथः अयोध्यामध्यास्ते, भोगिभोगमधिशयानो हरिः, अध्यतिष्ठन्नरेन्द्रोऽपि हैमं सिंहासनं तदा इत्यादिवाक्येषु द्वितीयाप्रयोगः एवमेव। वस्तुतः शीङादयः प्रकृत्या अकर्मकाः धातवः आधारेण सकर्मकाः सम्पन्नाः।

**७. अभिनिविशश्च :-**

अभि, नि इत्येतत्संघातपूर्वस्य विश्-धातोराधारः कर्म स्यात् इत्यर्थः 'अभिनिविशश्च'[३४] इति सूत्रेण विधीयते। अत्र सप्तम्याः स्थाने द्वितीया। अभिनिवेशः आग्रहः इति शेखरः। सन्मार्गविषयकाग्रहवान् इत्यर्थः। नेर्विशः इति निपूर्वकविश्धातोरात्मनेपदं विधीयते। नि अभि इत्येतयोर्मध्ये नि 'अल्पाच्तरम्' इति सूत्रेण अल्पाच्तरं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम्। एवं चेत् नि इत्यस्य प्रथमप्रयोगं विना अभिनि इति प्रयोगः किमर्थमिति शङ्का। नि इत्यस्य पश्चात् प्रयोगः अभि-नि इति समूहस्य विवक्षार्थम्। अस्य सङ्घातस्य सत एव आधारस्य कर्मसंज्ञा।

**८. उपान्वध्याङ्वसः :-**

**"उप, अनु, अधि, आङ् इत्येवं पूर्वस्य वसतेराधारः कर्म स्याद्"** इत्यर्थः 'उपान्वध्याङ्वसः'[३५] इति सूत्रस्य। इयं अधिकरणसंज्ञायाः अपवादभूता कर्मसंज्ञा। सप्तमीप्रयोगे प्राप्ते द्वितीया भवतीत्यर्थः। हरिः वैकुण्ठम् उपवसति, अनुवसति, अधिवसति, आवसति वेत्युदाहरणानि। अत्र अभुक्त्यर्थस्य वसतेराधारः कर्म न भवति 'अभुक्त्यर्थस्य न'[३६] इति वार्त्तिकेन। भोजननिवृत्तिवाचकस्य उपपूर्वस्य वसतेराधारस्य कर्मत्वप्रतिषेधः। अतो वने उपवसति इत्येव भवति।

**९. क्रुधद्रुहोरुपसृष्टयोः कर्म :-**

'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'[३७] इति पूर्वसूत्रेण सम्प्रदानसंज्ञायां प्राप्तायां **'**क्रुधद्रुहोरुपसृष्टयोः कर्म'[३८] इति सूत्रेण कर्मसंज्ञा विधीयते। क्रुधद्रुहोरुपसृष्टयोः उपसर्गसम्बद्धयोः यं प्रति कोपः, तत्कारकं कर्मसंज्ञं भवतीति सूत्रार्थः। यथा हि देवदत्तम् अभिक्रुध्यति, देवदत्तम् अभिद्रुह्यति इति अभि इति उपसर्गपूर्वकस्य क्रुध्-द्रुह् इति धात्वर्थस्य देवदत्तं प्रति लक्ष्यत्वात् कोपभावत्वाच्च देवदत्तस्य कर्मसंज्ञा। उपसर्गरहितयोस्तु एतयोः प्रयोगे देवदत्तादीनां सम्प्रदानसंज्ञा सिद्धैव।

---

[३४] तत्रैव १.४.४७

[३५] तत्रैव १.४.४८

[३६] वार्त्तिकम् १०८७

[३७] पा. अष्टा. १.४.३७

[३८] तत्रैव १.४.३८

**१०. दिवः कर्म च :-**

साधकतमं करणम्[३९] इति पूर्वसूत्रेण करणसंज्ञायां प्राप्तायां दिवः कर्म च[४०] इति सूत्रेण कर्मसंज्ञा क्रियते, चकाराद्यथाप्राप्तं करणसंज्ञापि सिध्यति। दिव्-धात्वर्थं प्रति साधकतमं कारकं कर्मसंज्ञं भवतीति प्रकृतसूत्रार्थः। तद्यथा "अक्षान् दीव्यति" इति, पक्षे च यथाप्राप्तं करणसंज्ञा, ततः "अक्षैर्दीव्यति" इत्यपि भवति। अत्र क्रीडार्थकस्य दिव्-धातोः क्रियार्थं प्रति अक्षा: साधनभूताः, तत एवात्र यथासूत्रं कर्मसंज्ञा करणसंज्ञा च भवतः।

**कर्मसंज्ञाविधानस्य विभक्तिप्रयोजकत्वम् :-**

**'अनभिहिते'** [४१] इत्येतदपि अधिकारसूत्रम्। अभिहितम् इत्यस्य उक्तमित्यर्थः। अनभिहितमित्यस्य अनुक्तमिति। उत्तरसूत्रेषु अनभिहिते इत्यस्य अनुवृत्तिरित्यर्थः। 'कर्मणि द्वितीया'[४२] इति सूत्रे 'अनभिहिते' इति सूत्रमनुवर्तते। अतः **"अनभिहिते अनुक्ते कर्मणि द्वितीया स्यात्"** इति **'कर्मणि द्वितीया'** इति सूत्रस्यार्थः। तद्यथा "भक्तो हरिं भजति" इति। भजतीति कर्तरि तिङ्। तिङा कर्ता उच्यते। कर्म अनुक्तं भवति। तेन 'हरिम्' इति अनभिहिते कर्मणि द्वितीया। अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। सेव्यत इति कर्मणि लट्। अतः तिङोक्तं कर्म हरिरिति अभिहिते च तस्मिन् प्रथमा भवति। "हरिः सेव्यते" इति। "लक्ष्म्या सेवितः हरिः' इत्यत्र कृता क्तप्रत्ययेन कर्मण उक्तत्वात् हरिशब्दोत्तरं द्वितीया न। ततः प्रातिपदिकार्थमात्रे प्रथमा भवति।

तदनया रीत्या पाणिनीयव्याकरणे कर्मसंज्ञाया विवेचनमाप्यते। इयं कर्मसंज्ञा न केवलाया द्वितीयाविभक्तेः प्रयोजिका, किन्तु यथाप्रकरणमन्यासामपि विभक्तीनां प्रयोजिका भवति। तद्यथा **'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टामनध्वनि'**[४३], **'क्रियार्थोपपदस्य च कर्मणि स्थानिनः'**[४४], इति चतुर्थ्याः, **'अधिगर्थदयेशां कर्मणि'**[४५], **'कृञः प्रतियत्ने'**[४६], **'कर्तृकर्मणोः कृति'**[४७], **'उभयप्राप्तौ**

---

[३९] तत्रैव १.४.४२

[४०] तत्रैव १.४.४३

[४१] पा. अष्टा. २.३.१

[४२] तत्रैव २.३.२

[४३] तत्रैव २.३.१२

[४४] तत्रैव २.३.१४

[४५] तत्रैव २.३.५२

[४६] तत्रैव २.३.५३

[४७] तत्रैव २.३.६५

**कर्मणि'**[४८] इति षष्ठ्या इति। एवमियं कर्मसंज्ञा पाणिनीये तन्त्रे द्वितीयायाः चतुर्थ्याः षष्ठ्याश्च विभक्तेः प्रयोजिका सिध्यतीति वेद्यम्।।

## परिशीलितग्रन्थसूची


**१.** पाणिनीयः अष्टायायीसूत्रपाठः, सम्पा. ब्रह्मदत्तजिज्ञासुः, रामलालकपूरट्रस्ट, बहालगढ़, वि.सं. २०५८

**२.** पाणिनीयो धातुपाठः, रामलालकपूरट्रस्ट, बहालगढ़, २०१५

**३.** सिद्धान्तकौमुदी, भट्टोजिदीक्षितः, निर्णयसागरमुद्रणालयः, मुम्बई, १९०८

**४.** पातञ्जलमहाभाष्यम्, सम्पा. श्रीभार्गवशास्त्रीजोशी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, १९८७

**५.** काशिका न्यासपदमञ्जरीसहिता, तारा प्रिन्टिंग वर्क्स, वाराणसी, प्रथमसंस्करणम्, वि.सं. २०४३

**६.** वाक्यपदीयम्, सम्पा. रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९१


~~~~~*~~~~~*~~~~~*~~~~~

[४८] तत्रैव २.३.६६
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# वैदिकज्ञानपरम्परायां कृषेः स्वरूपं भेदाश्च

- पद्मराज रेग्मी[१]

## १ कृषेः अर्थः, स्वरूपञ्च –

कृष् धातोः **“सर्वधातुभ्यः इन्”**[२] इति सूत्रेण इन् प्रत्यये कृते सति कृषि शब्दः निष्पद्यते। सामान्यतया कृषिरिति क्षेत्रगतार्थः स्फुट्यत एव। हलचालनम्, सेवाभावः, अग्रेनयनमित्याद्यर्थाः व्यापकत्वेन संस्कृतसाहित्ये प्रयोज्यन्ते।[३] **स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः। सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं वृत्तम्** ॥ अस्मिन् श्लोके जीवनोपाथाय कृषेः द्वे नामनी स्तः। १. अनृतम्, २. कृषिश्च।[४] **वृष्टिमूला कृषिः सर्वा वृष्टिमूलं च जीवनम्। तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्**॥[५] **अन्नं हि धान्यसञ्जातं धान्यं कृष्या विना न च। तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत्** ॥ अनयोः द्वयोः श्लोकयोः कृषेः महत्त्वं, सारञ्च विस्तरेण प्रतिपादितम्। वस्तुतः सर्वेऽपि प्राणिनः कृष्याधारेणैव जीवन्ति। यदि कृषिः न स्यात् तर्हि सर्वदा सर्वत्र च उपवासशब्द एव श्रूयते स्म। उपवासे कालस्तु निश्चितो भवति। तदपि सन्मनुष्याः आचरन्ति। साधारणमनुष्याः पशवः, अन्येऽपि प्राणिनः कथमुपवासस्य यथार्थं कर्तुं शक्नुयुः? अतः सर्वेषां प्राणिनां सुखपूर्वकं जीवन-संरक्षणाय, व्यावहारिक-कर्त्तव्यानि सम्पादनाय कृषेः आवश्यकता तथा वर्तते यथा रात्रौ शयानां प्राणिनां कृते प्रातः जागरणाय सूर्यः स्वकिरणैः सर्वान् उत्थापयति। तद्विदियं कृषिः स्वकर्मविरहिणां कृते विधिवत् (पतिवत्) वा तत् कर्मणि नियोजयति।

## २ कृषेः मूलतत्त्वानि –

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः। यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥ एतादृशैः श्रीकृष्णवचनैः वक्तुं शक्यते यत् कृषेः साक्षात् सम्बन्धः यज्ञेन सह वर्तते। प्राचीनकाले जनाः बहुविधयज्ञान् कुर्वन्ति स्म। तैः विचार्यते यत् अस्माकं देशः कृष्याश्रितो वर्तते। यदि समयेन वृष्टिः

---

[१] शोधार्थी, जे. सोमैया परिसर मुम्बई

[२] वैयाकरणसिद्धान्त-कौमुदी (सूत्र-संख्या 557) उणादि सूत्रम्।

[३] अमरकोशः (वैश्यवर्गः 9-2)

[४] कृषिपराशरः (कृषिमहत्त्वम् 10)

[५] कृषिपराशरः (कृषिमहत्त्वम् 7)

न भविष्यति तदा अस्माकं क्षेत्रेषु सस्यानि न भविष्यन्ति। तस्य परिणामेन वयं सर्वेऽपि जीवितुं न शक्नुमः। अतः सर्वे मिलित्वा यज्ञादिधार्मिककर्माणि सम्पादयामः। यतः कृषकाणां माध्यमेन वयं सर्वे सुखिनः स्याम। इत्थं भावेन कृषेः मूलतत्त्वं यज्ञः इति निःस्वसितः। अस्याः कृषेः अन्यानि मूलतत्त्वान्यपि वर्तन्ते। तद्यथा–

**१. बीजरक्षणम् –** कृषकाः यदि कृषिकार्यं त्यजन्ति तर्हि पुनः कृषिचालनाय बीजानि अपि न प्राप्यन्ते। अतः बीजसंरक्षणमपि कृषेः मूलतत्त्वं वर्तते।

**२. धान्यानां वृद्धिः भावनाशुद्धिश्च –** कृषकाणां माध्यमेन अस्माकं देशे शुद्धं, पवित्रमन्नं सर्वैः प्राप्यते एव। यदि अन्नशुद्धिः न भविष्यति तर्हि भावनाशुद्धिरपि न भविष्यति। अस्माकं जीवने ये दुर्विचाराः, दुर्भावनाः, दुरुपदेशाश्च दृग्गोचराः भवन्ति ते मूलतः दूषितान्नकारणादेव प्रभवन्ति। तत्र न केवल-पाचकस्य दोषः। अपितु तेषामन्नानां पालकः, संरक्षकः, संवर्द्धकश्च यो भवति सोऽपि कारणभूतः वर्तते। अतः कृषकाः सत्त्वपरायणाः, शुद्धभावनात्मकाश्च भवन्ति।

**३. सर्वेषां प्राणिनां जीवनसंरक्षणम् –** [६] अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवी श्रिताः। अथो अन्नेनैव जीवन्ति। अथैनदपि यन्नतः। अन्न हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते। इत्यादि श्रुतिवचनैः अन्नस्य महिमा कृतोऽस्ति। यत्किमपि पृथिव्यां दृष्यते तत्सर्वं कृषिमूलकत्वमेवास्ति। वस्तुतः सर्वेऽपि प्राणाधारिणः यथोचितं भुक्त्वा स्व-अन्नमयकोशस्य संरक्षणं कुर्वन्ति। जीवनचालनाय अन्नमयकोशस्य महती आवश्यकता वर्तते एव। अन्यकोशा अपि अत्रैवाश्रिताः भवन्ति। अस्माकं शरीरे रक्त-मांसादि सप्तधातवः अपि अन्नेनैव परिपालिताः, सुरक्षिताश्च सन्ति। बल-बुद्धि-वीर्यादीनां वृद्धिरपि शुद्धान्नभक्षणेन नैसर्गिकतया जायते एव। “आहारशुद्धौ सत्त्वशुद्धिः” इति वचनं नितान्तमेव कृषेः प्रामाणिकतथ्यात् सिद्ध्यति।

## ३ वैदिकी कृषिः–

प्राचीनकाले कृषिकार्याणि अनुष्ठानवद् आचर्यन्ते स्म। अनुष्ठाने यथा द्रव्याणां, देवतानां, याजकानां, सहयोगदातृणाञ्च प्राक्कल्पना भवति तथैव कृषौ बीजानां, कृषकानां, हलादिपात्राणां, वृषभाणाञ्च क्षेत्रस्य आयतानुसारेण प्राक्कल्पना भवति। तदनु कार्यसम्पादनं जायते। कृषिकार्यं कदा आरम्भणीयं कदा नारम्भणीयम् इत्यादिविषया अपि अत्र विशेषेण विचार्यन्ते। ग्रामे इयं प्रसिद्धिर्वर्तते – पूर्णिमायाम्, अमायाम्, उत्सवे, मृतादि-अशौचप्रसङ्गे, जातकादि-सूतके गृहजनस्य यात्रावसरे तस्य क्षेत्रादिषु हलचालनकार्यं निषिध्यते। अनेन ग्रामवृद्धप्रमाणेन वेदकालादेव अस्याः प्रासङ्गिकता समुद्भाव्यते। वेदाध्ययने अष्टमी, प्रतिपदा, त्रयोदशी, चतुर्दशी, पर्वतिथियश्च वैदिकैः अनुपाल्यन्ते।

---

[६] तैत्तिरीयोपनिषद् (अनुवाक् -२, अनुवाक् - १)

अर्थात् एतेषु तिथिषु वेदाध्ययनं न भवति। एवं प्रकारेण श्रुतौ यथा विधिनिषेधयोः व्यवस्था कृतास्ति तथा कृषिकर्मण्यपि वर्तते। प्रसङ्गेऽस्मिन् मनुवचनमुपस्थाप्यते –

**अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी। ब्रह्माऽष्टकापौर्णमास्यौ तस्मात् ताः परिवर्जयेत्॥**

अद्यत्वेऽपि वैदिकपरम्परायाम् एताः तिथयः वेदाध्यायनाय निषिध्यन्ते। कृषि-कर्मण्यपि कथिताः तिथयः त्यज्यन्ते। अनेन दृष्टप्रमाणेन वक्तुं शक्यते यत् कृषेः सम्बन्धः साक्षात् वेदेन सह वर्तते। महर्षियाज्ञवल्क्येनापि जीवनव्यापनाय बहूनि साधनानि प्रोक्तानि। तेषु कृषिकार्यम् एकं मुख्यं वर्तते।

**कृषिः शिल्पं भृतिविद्या कुसीदं शकटं गिरिः।**
**सेवानूप नृपो भैक्षम् आपत्तौ जीवनानि तु॥**

**४ कृषेः आध्यात्मिकं ज्ञानम् –**

सर्वविधयज्ञेषु सर्वादौ भूमेः शोधनं भवति। तस्यां भूमौ कृषिः अन्तः प्रविष्टा भवति। पञ्चभूसंस्कारो यथा – [७] **१) दर्भैः परिसमुह्य-३, २) गोमयोदकेन उपलिप्य-३, ३) स्रुवेण यज्ञकाष्ठेन वा उल्लिख्य-३, ४) अनामिका-ङ्गुष्ठाभ्यां उद्धृत्य-३, ५) प्राजापत्यतीर्थेन न्युब्जमुष्टिना अभ्युक्ष्य-३ इति।** अयं विधिः यत्र कुत्रापि होमः क्रियते सर्वत्र विद्वद्भिः याज्ञिकैः परिपाल्यते एव। अस्मिन् विधौ विहितं यत् भूमेः शुद्ध्यनन्तरमेव सङ्कल्पिताः यज्ञाः पूर्णतां याति अथवा ते यज्ञाः सफलाः भवन्ति। तादृश्यां भूमौ वयं कृषिकार्यं (बीजारोपणम्) कुर्मश्चेत् साक्षात् प्रत्यन्नम् आध्यात्मिकं भविष्यति। तादृश-अन्नभक्षणेन अस्माकं जीवनम् सहजतया आध्यात्मिक-दर्पणं वरिवर्ति।

**अत्र द्वितीयोपक्षः –**

भूमेः शुद्ध्यर्थं पञ्चसोपानानि सन्ति यानि उपरि कथितानि। अस्माकं शरीरशुद्ध्यर्थमपि पञ्चसोपानानि सन्ति। "वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाः" इति पातञ्जलयोगदर्शने शरीरस्थाः क्लेशाः सर्वादौ साधनीयाः शोधनीयाः। तदनन्तरमेव योगः सिद्धिम् ऋच्छति। इयमेव पद्धतिः कृषिकार्येऽपि वर्तते। कृषौ बीजादिपवनात् प्राक् आवश्यकानि पञ्चसोपानानि सन्ति। तानि यथा – १) जल-खाद्यादिना क्षेत्रस्य शुद्धिः, २) हल-लाङ्गलादिपात्राणां योजनम्, ३) स्वस्थं सुदृढं वृषभयुगलम्, ४) हलचालने कुशलं हली, ५) क्षेत्रस्य सर्वविधकार्य-सम्पादनार्थं सहयोगिनः कृषकाः

**५ कृषिपात्राणि (यन्त्राणि साधनानि च)**

वयं यत्र कुत्रापि गन्तुं प्रभवामः तदा साधनानाम् आवश्यकता भवत्येव। साधनमन्तरा साध्यं कदापि न सम्भवति। उचितसाध्यप्राप्तये तदनुगुणानां साधनानां कर्तव्यं भवति। यथा–

---

[७] पारस्करगृह्यसूत्रम्

अस्माभिः गुजराततः हरिद्वारं प्रति गन्तव्यं चेत् लौहपथगामिन्याः वायुयानस्य अथवा साधारणकारयानानां चयनं करणीयं भवति। किन्तु रथाश्वगजादिवाहनानां साधनत्वे तस्मिन् प्रसङ्गे उचितसाफल्यं न प्राप्यते। अतः उचितलक्ष्ये तदनुसाधनानां चयनं कर्तव्यमिति भावः। अत्र शोधविषयप्रसङ्गेऽपि नियमोऽयं प्रवर्तते। "कारणं विना कार्यं नैवोत्पद्यते" इति न्यायशास्त्रनियमादपि वक्तुं शक्यते यत् कृषिकार्यं तत्पात्राणां विना पूर्णतां न गच्छति। अत आदौ कृषिपात्राणां ज्ञानं, सङ्ग्रहकरणं च कृषिकर्मसङ्कल्पितेन पुरुषेणावश्यं कर्तव्यम्। ज्ञानानन्तरं ज्ञानपूर्वकः प्रयोगः कर्तव्यः तत्रैव धर्मो भवतीति महाभाष्यकार पतञ्जलेः वचनं चरित्रार्थं भवति।

**कृषेः विशेषपात्राणि –**

१. हलम् (लाङ्गलनम्), २. फालः (लौहनिर्मितः), ३. हलीषा = लाम्बदण्डः, ४. युगम् (योजकः) द्वयोः वृषभयोः स्कन्धौ योजयति, ५. शम्या (युगकीलकाः) वृषभयोः स्कन्धम् उभयतः भवन्ति, ६. योक्रम् (हलीषायुगयोः योजिका रज्जुः), ७. ओगः (हलप्रेरक दण्डः) ईशा इत्यपि वक्तुं शक्यते।

**६ कृषौ बीजस्थापनविधिः –**

**[८] माघे वा फाल्गुने मासि सर्वबीजानि संहरेत्। शोषयेदातपे सम्यक् नैवाधो विनिधापयेत्॥**

बीजानां कृते लघुपोटलिकां कृत्वा अपद्रव्यनिरसनपूर्वकम् (बीजेतरद्रव्यम् अपाकरणपूर्वकम्) बीजशुद्धिं विधाय तानि बीजानि लघुपोटलिकासु स्थापयेत्। यतो हि विजातीयतत्त्वानि क्षेत्रं दोषयन्ति।

**[९] न वल्मीके न गोस्थाने न प्रसूतानिकेतने। न च वन्ध्यावति गेहे बीजस्थापनमाचरेत् ॥**

बीजपोटलिकायाः सुरक्षा कथं कर्तव्या? अस्मिन् सन्दर्भे वार्तेयम् उपस्थिता। वल्मीकसंज्ञकस्य कीटविशेषस्य बीजस्य पार्श्वे, गोशालायाम्, सूतिकागृहे, वन्ध्यावति गृहे इमाः बीजपोटलिकाः न स्थापयेत्। अत्र यत् प्रतिषेधः वर्तते तत् दृष्टपरिणामकत्वात् धर्मशास्त्रसम्मतमपि प्रतिभाति। **"तिलधान्ययवानां च विधिरेष प्रकीर्तितः। बीजे यत्नमतः कुर्यात् बीजमूलाः फलश्रियः ॥"** एषः विधिः तिल-धान्य-यवादीनां कृते प्रकीर्तितः। अत्रोपलक्षणं विज्ञाय सर्वत्र बीजसंरक्षणे यत्नः कर्तव्यः। शास्त्रेषु कथितम् – **"बीजमूलाः फलश्रियः"**[१०] इति। समर्थबीजेषु एव धान्यादीनां समृद्धिः भवति।

---

[८] कृ. प. (बीजवपनविधिः १५७)

[९] कृ. प. (बीजवपनविधिः १६१)

[१०] कृ. प. (बीजवपनविधिः)

**७ बीजवपनविधिः**

**[११]वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम्। आषाढे चाधमं प्रोक्तं श्रावणे चाधमाधमम्॥**

कदा बीजवपनकर्तव्यमिति प्रसङ्गे समादधाति मुनिपराशरः – वैशाखमासे उत्तमम्, ज्येष्ठमासे मध्यमम्, आषाढमासे अधमम्, श्रावणमासे अधमाधमम् (अतिनिकृष्टं) भवति, बीजवपनकार्यम्। अस्यां स्थितौ ज्यौतिषदृष्टिरपि सत्यतां याति। ज्योतिषशास्त्रे द्वादश राशयः भवन्ति। ते मेषादिक्रमेण अग्रेसराः भवन्ति। मेषादिक्रमः वैषाखादिमासेषु सम्बन्धम् उपस्थापयति। यथा- वैशाखमासे = मेषराशिः भवति। सूर्यः मेषादिराशीनाम् उपक्रमेण संवत्सरमेकं पारयति। अर्थात् सूर्यस्य कार्यारम्भः मेषराशेः प्रचलितः अतः सूर्यात् प्रजननशक्तिमुपादाय वैशाखादिमासक्रमेण बीजवपनविधिः उपस्थापितः। उक्तमासचतुष्टयेऽपि पूर्वं पूर्वं श्रेष्ठम्। अतः बीजवपनविधौ ज्योतिषदिगपि बोधनीया, ज्ञातव्या च भवति।

**[१२] रोपणार्थं तु बीजानां शुचौ वपनमुत्तमम्। श्रावणे चाधमं प्रोक्तं भाद्रे चैवाधमाधमम् ॥**

धान्यादीनां रोपणार्थं शुचिः = आषाढमासः सर्वोत्तमः वर्तते। अस्मिन् मासे वृष्टिः अधिका भवति। धान्यादिबीजानां रोपणार्थं जलमावश्यकता भवत्येव। अतः आषाढे रोपणं सर्वोत्तमम्, श्रावणे अधमम्, भाद्रपदे सर्वाधमम् भवतीति मासानाम् आरोहक्रमेण फलकथनं यदस्ति तद् ज्योतिषफलादेशाधारितमेव। स च फलादेशः कृषिकर्मणः मुहूर्तविधौ विस्तरेण वितन्यते।

**७.१ कृषिकर्मणि हलप्रवहण-बीजवपनमुहूर्तानि-**

ज्यौतिश्शास्त्रानुसारेण मृगशीर्ष, रेवती, चित्रा, अनुराधा, तिस्रः उत्तरा, हस्तः, अश्विनी, पुष्य, अभिजित्, स्वातिः, पुनर्वसु, श्रवण, धनिष्ठा, शतभिषा, मूल तथा विशाखा एतेषु नक्षतेषु रिक्ता अमावस्या, षष्ठी एवम् अष्टमी तिथीन् परित्यज्य शेषेषु तिथिषु प्रथमम्, पञ्चमम्, सप्तमम्, दशमम्, एकादशमञ्च लग्नान् विहाय भूमिशयनं तथा भद्रादीनां विचारपूर्वकं हलचक्रशुद्धौ प्रथमवारं हलप्रवहणं कार्यम् श्रेयस्करं भवति। इत्थं विचार्य ज्योतिश्शास्त्रानुसारेण कृषकाः कृषिकार्यम् आचरन्ति स्म। सा कृषिः धर्मकृषिः कथ्यते।

कृषौ बीजवपनसन्दर्भेऽपि मुहूर्तविचारः क्रियते। तद्यथा- हस्तः, अश्विनी, पुष्यः, तिस्रः उत्तरा, रोहिणी, चित्रा, अनुराधा, मृगशीर्ष, रेवती, स्वाती, धनिष्ठा, मघा एवं मूलम् एतेषु नक्षत्रेषु रिक्ताम्, अष्टमीम्, भद्राम्, क्षीणचन्द्रम्, तिथिक्षयं च वर्जयित्वा (रविः, भौमः, शनिः) एतान् वासरान्

---

[११] कृ. प. श्लोक १६८

[१२] कृ. प. श्लोक १६९

विहाय सर्वादा रात्रीः एवं उभयोः (प्रातः एवं सायम्) सन्ध्याकालं विहाय राहुनक्षत्रानुसारेण बीजोप्तिचक्रपुरस्सरं बीजवपनकार्यं शुभं, श्रेयस्करं, फलदायकञ्च भवति।

**निगूढतत्त्वम् –**

कृषिप्राधान्योऽयं भारतदेशः। अतः कृषिकर्मणि सर्वेषां भारतीयानां कर्मानुष्ठानम् (योगदानम्) अस्त्येव। उपर्युक्त-मन्त्रेण कृषि-यज्ञकर्मणोः समानान्तमं दृश्यते एव। यथा –यज्ञकर्मणि द्रव्यम्, देवता, त्यागः इति त्रयाणां मन्त्रैः अभिधानं क्रियते। उभयत्र कार्यसादृश्यमस्ति। यथा – धीराः = ध्यानवन्तः देवताप्रीत्यर्थं यागान् आचरन्ति तथा कृषकाः जीवतुष्यर्थं, पुष्ट्यर्थञ्च हलानि चालयन्ति। अत्र परोपकाररूपं निगूढतत्त्वं दृश्यते।

**मन्त्रः – ॐ युनक्त सीरा ॥ अ.-१२ मं.-६८**

**निगूढतत्त्वम् –**

कर्षतीति कृषकः। किं कर्षतीति जिज्ञासायां रूढार्थत्वेन हलम् इति क्षेत्रप्रसङ्गे समाधानम्। रज्जुबन्धनादिना बलाच्चालनं कृषेरर्थः स्वीक्रियते चेत् मनुष्योऽपि पशुः इत्यवोचो भवति। कथम् ? उच्यते – धर्मरज्जुना मनुष्याः अपि निबन्धाः सन्तः पुण्यक्षेत्राणि कर्षयन्ति। फलरसास्वादनाय बीजवपनकर्म आद्यसाधनम्। तच्च मन्त्रपुरस्सरं सिद्ध्यति। अतः मन्त्राणां प्रभावः किषिक्षेत्रे अत्यधिकमस्तीति प्रायोगिकपक्षः। सर्वेऽपि साधकाः, प्रयोजकाः वा फलवतीः क्रियाः वाञ्छन्ति। इमं भावः सम्यक् विज्ञाय निरुक्तशास्त्रे स्व-वचनं ध्वनयति आचार्यः यास्कः [१३]**'फलप्रधानमाख्यातम् सत्त्वप्रधानानि नामानि।'**

**मन्त्रः – ॐ शुन सुफना ॥ अ.-१२ मं.-६९**

**निगूढतत्त्वम् –**

अस्मिन् मन्त्रे जडपदार्थेऽपि चेतनत्वव्यवहारः दृश्यते। तद्यथा – [१४]**ओषधे त्रायस्व। स्वधिते मा हिंसीः। श्रृणोतु ग्रावाणः।** इत्यादिषु वाक्येषु भाष्यादिकथने चेतनत्वव्यवहारः दर्शितः। मन्त्रेऽस्मिन् भूमेः मृदुतायाः वर्णनमस्ति। लाङ्गलाग्रस्थितस्य फालस्य तीक्ष्णलौहविशेषस्य (शङ्कोः) कर्णिकार्ये विद्यत एव। तत्र भूमिः मातृपदवाच्या। कुतः इति चेत् – [१५]**'माता भूमिः पुत्रोऽहं पृथिव्याः'** इति श्रुतिप्रमाणात्। अतः मातृस्वरूपाणां भूमौ न केनापि कष्टं सहते। पूजाविधौ भूमिः

---

[१३] निरुक्तम् (का.१, अ.१)

[१४] ऋ. भा. भू.

[१५] अथर्ववेद पृथ्वीसूक्तम् (१२-१-०७)

देवत्वेन गृह्यते। तत्रापि देवतायै कष्टं कस्यापि नेष्टम्। षड्डोषशय्यानाम्, मासैकभोजितानाम्, सुरद्विषाम् असुराणां वार्ता भिन्ना।

वस्तुतस्तु सर्वेषां जीवानां बीजगर्भा पृथिवी वर्तते। इयं मातृस्वरूपा च। उक्तञ्च - [१६] **'या देवी सर्वेभूतेषु मातृरूपेण संस्थिता।'** अत इयं शक्तिषु-आद्या, अस्मान् कौमुदीव आह्लादयति। अस्मिन् मन्त्रे ऋषिः विज्ञापयति यत् कृषिकार्यं प्रेम्णा भवतु। पृथिवी- माता, जननी, धरित्री, आश्रयरूपा च विद्यते। अज्ञानवशात् क्वचित् बालः मातरं पीडयेत् किन्तु मुदा माता पुत्रं लालयति। अत उक्तम् – [१७] **'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।'**

**मन्त्रः –ॐ घृतेन सीता ॥ अ.-१२ मं.-७० ॥**

**निगूढत्वम् –**

विश्वदेवः मरुच्च हलपङ्क्तेः इष्टदेवौ। इष्टदेवाभ्यां समनुज्ञातः लब्धकृपाः हलपङ्क्तयः मधुरेण घृतेन अभिसिञ्चिताः स्युः। येन अस्माकं कृते तस्यांहलपङ्क्तौ उत्पस्यमान अन्नादिबहुविद्यधान्यानि सतः सुम्नप्रदवन्तानि = सुखप्रदानि स्युः। अस्माकं गृहाणि पयोदधिघृतादिभिः परिपूर्णानि स्युः। अनेन स्पष्टीभवति यत् बीजवपनकाले प्रयुज्यमानमन्त्रस्य प्रभावः अन्नादिषु कथं प्रत्यक्षीभवतीति।

वस्तुतः अत्र भावः अयं वर्तते – कृषौ हलचालनेन यानि सीराणि = हलपङ्क्तयः सन्ति तानि मधुराणि स्युः। ततः उत्पन्नानि धान्यादि-अन्नानि स्वभावतः एव स्निग्धानि भविष्यन्ति इति मानसिकी प्रार्थना वर्तते। वैदिकपरम्परायां भोजनविधौ मधुर-स्निग्धयोः महत्त्वम् अत्यधिकं वर्णितम्। तद्यथा – [१८] **भोजनं मधुरं स्निग्धम् ॥**

**मन्त्रः – ॐ लाङ्गलं पवीरवत् ॥ अ.-१२ मं.-७१**

**निगूढतत्त्वम् –**

मन्त्रेऽस्मिन् प्रार्थना विद्यते यत् गवादीनां पशूनां यत् पोषकत्वं विद्यते तत् लाङ्गलादेव सम्भवति। अतः कृषिकर्मणि वक्रतुण्डवत् प्रार्थ्यते लाङ्गलम् (हलः)। अपेक्षते तत् क्षेत्रादेव सम्भवति। अतः कृषेः आश्रयरूपं क्षेत्रं (कृषिक्षेत्रम्) सर्वैः संरक्षणीयमिति भावः। अस्मिन् सन्दर्भे अथर्ववेदे प्रार्थना वर्तते – [१९]**उपस्थाने अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवी प्रसूताः। दीर्घं न आयुः प्रतिबुद्ध्यमाना वयं तुभ्यं बलिहृतः स्याम ॥**

---

[१६] दुर्गासप्तशती अध्याय-५, श्लोक- ७१

[१७] देव्यापराधक्षमापनस्तोत्रम् श्लोक- ०२

[१८] शुक्लयजुर्वेद प्रातिशाख्य अध्याय-१, मन्त्र-२५

[१९] अथर्ववेद ६-७८-६२

**मन्त्रः – ॐकुर्व्वन्नेवेह कर्म्माणि ॥अ.-४० मं.-२ ॥**

**निगूढतत्त्वम् –** जगति सर्वाऽपि जीवः दीर्घकालपर्यन्तं जीवितुम् इच्छति। असङ्गतिप्रभावात् जीवगत-अज्ञानाच्च स कर्म विहाय आनन्देन जीवनं प्रयतीति किन्तु एषो विधिः अवैदिकः। अतः एतादृश्यां परिस्थितौ किं कर्तव्यम् अस्मिन् मन्त्रे उपदिशति। कर्माणि सम्पादयन् शतवर्षपर्यन्तं वयं जीवामः इति भावनया मनुष्याः, प्राणिनश्च तथाविध-आचरणं कुर्युः। कृषकाः सपरिश्रमं कृषिकार्यं कुर्वन्तः शतवर्षात्मकीं जिजीविषां हृदि धारयेयुः इति भावः। उक्तञ्च – [२०] **जीवेम शरदः शतम्।**

**९ कृषेः घातकतत्त्वानि–**

अस्माकं शरीरं सदैव स्वस्थं भवेत्। एतदर्थम् आहार-विहार-मनोव्यापारादि-विषयेषु नियन्त्रणं करणीयं भवति। यद्यपि [२१]**"शरीरं व्याधिमन्दिरम्"** इति उक्तिः केनापि दुःखत्रयपीडितेन पुरुषेण रोगाधिक्यकारणात् सहसा कथतिम्। तथापि [२२]**"आनन्दभुक् चेतोमुखः प्राज्ञः"** इति श्रुतिवचनात् शरीरस्थितः जीवात्मा सदैव आनन्दयुक्तः, प्रसन्नचेतश्च भवति। (प्राज्ञः =प्रकृषेण अज्ञः) साधारणजीवोऽपि शरीरकष्टं परित्यज्य साश्वानन्दमवाप्तुम् इच्छति। अत्रैव दार्शनीकानां तात्पर्यम्। प्रकृते कृषेः घातकतत्त्वानि कानि ? इति जिज्ञासायाम्, प्रत्यक्षप्रमाणपुरस्सरम् उच्यते – उर्वरायां भूमौ धान्यादि-सस्यानि, वृक्ष-लता-पादकादिभिः युक्तानि उद्यानानि सर्वैः दृष्टान्येव। यत्र कृषिः न फलति, वृक्षादीनां पोषणं, वर्द्धनञ्च असम्भवति तत्रावश्यं विज्ञेयं कृषौ=भूमौ दोषः अस्त्येव। अर्थात् भूमिः अनुचितपदार्थादिभिः ग्रस्ता पीडिताश्च वर्तते। यथा – वयं दूषितान्न-भक्षणेन रोगग्रस्ताः भवामः। तथैव भूमौ रासायनादि-पदार्थप्रक्षेपणेन, प्लाष्टिकस्यूतादीनां यत्र, तत्र, सर्वत्र प्रक्षेपणेन च अद्यत्वे भूमिः अति-पीडिता, रोगग्रस्ता, प्रजननशक्तिहीना च दरीदृश्यते।

अस्माकं भारतेदेशे जनसम्मर्दः अधिकः वर्तते। देहल्याम्, सूरते, वापीनगरे, मुम्बईमहानगरे च महन्ति उद्योगाराणि सन्ति। तत्र विविधवस्तूनां निर्माणं भवति। ततः आगतं प्रदूषितं जलं यत्र प्रक्षिप्यते तत्रत्या भूमिः निश्चप्रचं दूषिता भवत्येव। तां भूमिं परितः पर्यावरणमपि प्रदूषितं भवति। अतः नागरिकाः जनाः अत्यधिक-चिन्ताग्रस्ताः भवन्ति। ग्राम्यास्तु स्वच्छ-जलादि-पानेन (सेवनेन) चिन्तामुक्ताः सन्ति।

**कृषेः हानिकारकतत्त्वसन्दर्भे केचन बिन्दवः–**

पारम्परिककृषेः ह्रासः।

जैविकमलाम् अभावः।

---

[२०] शुक्लयजुर्वेद अध्याय-३६, मन्त्र-२४

[२१] आचार्यमहाश्रमणः

[२२] माण्डूक्योपनिषद्

कीटनाशादि-औषधीनाम् अत्यधिक-प्रयोगः।
बहु-उत्पादनाय यन्त्रीकरणस्य प्रभावः।

प्रासादादि-निर्माणाय आधुनिक-यन्त्र-निर्मित-यानेन खननं क्रियते अतः भूमौ पोषकतत्त्वानां प्रतिदिनं नाशः जायमानः दृश्यते।

कृषि-विज्ञाने-देहली [२३](आई.सी.ए.आर) इति अनुसन्धानकेन्द्रानुवैश्विक-स्तरे एकलक्ष्यम् (१ लाख हैक्टेयर) गुणवत्तायुक्तभूमेः हानिः प्रतिवर्षं जायमानमस्ति।

## १०. वैदिकसाहित्ये संगृहीतानि प्रसिद्धानि कृषितत्त्वानि–

| | | |
|---|---|---|
| १.धान्यम् | २.भूमिः | ३.पर्जन्यः |
| ४.ऋतुः | ५.बीजम् | ६.कर्षणम् |
| ७.वृक्षाः | ८.लताः | ९.पुष्पाणि |
| १०.नदी | ११.पर्वताः | १२.फलम् |
| १३.पशुः | १४.खगः | १५.अनड्वाहौ |
| १६.सूर्यः | १७.चन्द्रः | १८.नक्षत्राण |
| १९.वरुणदेवः | २०.इन्द्रदेवः | २१.कृषकः |

२२.कृषेः उपकरणानि (हल-लाङ्ल-योक्रादीनि)

## सन्दर्भग्रन्थसूची


१. अग्निपुराणम्, हिन्दीव्याख्योपेतम्, शिवप्रसादद्विवेदी, चौखम्बा, दिल्ली-संस्कृत-प्रतिष्ठान-२००९
२. अथर्ववेदसंहिता, रामस्वरूपशर्मागौडः, चौखम्बाविद्याभवन-वाराणसी, २०११
३. आपस्तम्बीयधर्मसूत्रम् - Dr. S.K. Belvalkal Bhandarkar, O.R.Institutepoona,
४. ईशादि नौ उपनिषद्शङ्करभाष्यम्आदिशङ्कराचार्यः, गीताप्रेस, गोरखपुर- वि.सं.२०५९
५. उपनिषत्सङ्ग्रहः पं. जगदीशशास्त्री मोतीलाल बनारसीदास – दिल्ली, १९९०
६. ऋग्वेदप्रातिशाख्यम्, उवटभाष्यसंवलितम्, डॉ. वीरेन्द्रकुमारवर्मा, चौखम्बा-संस्कृत-प्रतिष्ठान-दिल्ली,२०११
७. ऋग्वेदभाष्यभूमिकासायणाचार्यः श्रीजगन्नाथपाठकःचौखम्बा-विद्याभवन, वाराणसी, २०१५
८. ऋग्वेदसंहिता (मूलमात्रम्) चौखम्बासंस्कृतप्रतिष्ठान-दिल्ली, २०१६


[२३] राष्ट्रीय समेकित नाशीजीव प्रबन्धन अनुसन्धान केन्द्र, नई दिल्ली

९. कात्यायनश्रौतसूत्रम्, सरला ( खण्ड - १-२) श्रीविद्याधरशर्म चौखम्बासंस्कृतप्रतिष्ठान दिल्ली, २०११

१०. चतुर्वर्गचिन्तामणिः- हेमाद्रिः भरतचन्द्रशिरोमणिः चौखम्बा-संस्कृत-संस्थान, वाराणसी, २०१३

११. छन्दोमञ्जरी ('प्रभा' रुचिरा संस्कृत-हिन्दी) - हरदत्तशास्त्री, शङ्करदेवपाठकः अनन्तरामशास्त्री चौखम्बा-अमर-भारतीप्रकाशन, २०१०

१२. तर्कसङ्ग्रहः पदकृत्यन्यायबोधिनीसहितम्केदारनाथत्रिपाठी 'दर्शनरत्नम्' - मोतीलाल-बनारसी दास - वाराणसी, १९८५

१३. तैत्तिरीयसंहिता (मूलमात्रम्) चौखम्बा-संस्कृत-प्रतिष्ठान, २०१३

१४. निर्णयसिन्धुःहिन्दीभाषाटीकासहित)- श्रीकमलाकारभट्टःपं. दौलतरामगौडःसावित्रीठाकुर प्रकाशन - वाराणसी, २०१५

१५. निरुक्तम्, निघण्टुभाष्यरूपम् कश्यप प्रजापतिः मुकुन्दझा शर्मा, चौखम्बा-संस्कृत-प्रतिष्ठान, २०१२

१६. पाणिनीसूत्राष्टाध्यायी महर्षिपाणिनिः डॉ. पुष्पादीक्षिता संस्कृतभारती, २०१०

१७. ब्रह्मसूत्रम् (शाङ्करभाष्यम्) आदिशङ्कराचार्यः स्वा. हनुमानदासशास्त्री, चौखम्बा-सुरभारती-प्रकाशन, वाराणसी, १९६४


~~~~~*~~~~~*~~~~~*~~~~~
~~~~~

वर्षम्-०५ अङ्कः-०५ शोधज्योतिः
जनवरी-दिसम्बर, २०२३ ISSN-2350-0700

# नामकरण संस्कार का प्रायोगिक लाभ

**- राजकुमार झा**[१]
**- प्रो. बृजमोहन सिंह**[२]

❖ प्रस्तावना (Preface)

भारतीय संस्कृति ईश्वरीय सत्ता से ओतप्रोत मनुष्य की नैतिक, मानसिक, आध्यात्मिक, उन्नति के लिये, बल, वीर्य, प्रज्ञा और दैवीय गुणों के प्रस्फुटन के लिये शास्त्रों द्वारा निर्दिष्ट संस्कारों से व्यक्ति को संस्कारित करने की आवश्यकता हैं। संस्कार शब्द का अर्थ ही है, दोषों का परिमार्जन करना। जीव के दोषों और कमियों को दूर कर उसे धर्म, अर्थ, काम और मोक्ष इन चारों पुरुषार्थ के योग्य बनाना ही संस्कार करने का उद्देश्य है। संस्कारो हि गुणान्ताराधानम्[३] Any process which brings continuous positive change in a given material (Dravya), physical body (Shareera), intellectual capacity (Mana) and the personality (Aatma) is called Sanskar. Addition of new qualities, skilful activities, bringing fitness, self-productive and impression creating quality etc. सम् उपसर्ग पूर्वक 'कृ' धातु से 'घञ्' प्रत्यय करने पर संस्कार शब्द निष्पन्न होता है। कुछ शास्त्रों में भिन्न-भिन्न अर्थों में संस्कार शब्द का प्रयोग हुआ है। **"संस्कार: पुसं एवेष्टः प्रोक्षणाभ्युक्षणादिभि:"**[४] यह समस्त चराचर जगत नामरूपात्मक है।

❖ **नामकरण संस्कार** (Naming ceremony)

संसार में जितने भी प्राणी तथा वस्तुएँ हैं, सबका कोई-न-कोई रूप है और कोई-न-कोई नाम है। लोकव्यवहार की सिद्धि बिना नामके सम्भव ही नहीं है। नाम की महिमा से अगुण-अगोचर भी सगुण-साकार हो जाता है। Name has impact on person for whole of his life. भगवान के तो अनन्त नाम हैं, अनन्त रूप हैं। आचार्य बृहस्पति बताते हैं कि

---

[१] शोधच्छात्र, कौमारभृत्य/बालरोग,आयुर्वेद संकाय,चिकित्सा विज्ञान संस्थान, BHU

[२] मार्गदर्शक, Prof/HOD, कौमारभृत्य/बालरोग,आयुर्वेद संकाय,चिकित्सा विज्ञान संस्थान, BHU

[३] चरक संहिता,विमान स्थान, १/२४

[४] न्यायकुसुमाञ्जलि १.११

